January 1906

THE

CHOWKHAMBÂ SANSKṚIT SERIES

A

COLLECTION OF RARE & EXTRAORDINARY SANSKRIT WORKS.

NO. 97.

शुद्धाद्वैतमार्तण्डः ।

गोस्वामिश्रीश्रीगिरिधरजीमहाराजविरचितः ।

श्रीरामकृष्णभट्टविरचितप्रकाशाख्यव्याख्यासंवलितः ।

प्रमेयरत्नार्णवः ।

श्रीबालकृष्णभट्टविरचितः ।

श्रीमदाचार्यश्रीवल्लभाधीश्वर शुद्धाद्वैतसंप्रदायविदुषा रत्नगोपालभट्टेन परिशोधितः ।

ŚUDDHÂDVAITAMÂRTAṆḌA,

BY GOSWÂMÎ ŚRÎ GIRIDHARAJEE MÂHÂRÂJ,

With a Commentarycalled Prakâśa.

BY Sri-Ramakrishna Bhatta.

And PRAMEYARATNARṆAVA

BY ŚRÎ BÂLAKRISHṆA BHAṬṬA.

EDITED BY

Ratna Gopal Bhaṭṭa.

PUBLISHED AND SOLD BY THE SECRETARY

CHOWKHAMBÂ SANSKṚIT BOOK-DEPÔT:

BENARES.

AGENTS:—OTTO HARRASSOWITZ LEIPZIG:

PAṆḌIT JYESHṬHÂRÂMA MUKUNDJÎ, BOMBAY.

Printed by Harî Dâs Gupta, Proprietor,

AT THE VIDYÂ-VILÂSA PRESS,

BENARES.

Price Rupee One.

Registered Acco[rding to Act XXV] of 1867.

॥ श्रीः ॥

-*-

आनन्दवनविद्योतिसुमनोभिः सुसंस्कृता ।
सुवर्णाऽङ्कितभव्याभग्रतपत्त्रपरिष्कृता ॥ १ ॥
चौखम्बा-संस्कृतग्रन्थमाला मञ्जुलदर्शना ।
रसिकालिकुलं कुर्यादमन्दामोदमोहितम् ॥ २ ॥

स्तबकः—९७

THE

CHOWKHAMBÂ SANSKRIT SERIES

A

COLLECTION OF RARE & EXTRAORDINARY SANSKRIT WORKS.

NO. 97.

शुद्धाद्वैतमार्तण्डः ।

गोस्वामिश्रीश्रीगिरिधरजीमहाराजविरचितः ।

श्रीरामकृष्णभट्टविरचितप्रकाशाख्यव्याख्यासंवलितः ।

प्रमेयरत्नार्णवः ।

श्रीबालकृष्णभट्टविरचितः ।

श्रीमदाचार्यश्रीवल्लभाधीश्वर शुद्धाद्वैतसंप्रदायविदुषा

रत्नगोपालभट्टेन परिशोधितः ।

ŚUDDHÂDVAITAMÂRTAṆḌA,

BY GOSWÂMÎ ŚRÎ GIRIDHARAJEE MÂHÂRÂJ,

With a Commentarycalled Prakâśa.

BY Sri Ramakrishna Bhatta.

And PRAMEYARATNARṆAVA

BY ŚRÎ BÂLAKṚISHṆA BHAṬṬA.

EDITED BY

Ratna Gopal Bhaṭṭa.

PUBLISHED AND SOLD BY THE SECRETARY

CHOWKHAMBÂ SANSKṚIT BOOK-DEPÔT:

BENARES.

AGENTS:-OTTO HARRASSOWITZ LEIPZIG:

PAṆḌIT JYESHṬHÂRÂMA MUKUNDJÎ, BOMBAY.

Printed by Harî Dâs Gupta, Proprietor,

AT THE VIDYÂ-VILÂSA PRESS,

BENARES.

Price Rupee One.

1906

श्रीहरिः ।

अथैष किल परिशोध्य प्रकाशितो वरीवर्ति श्रीमदाचार्यवर्य-श्रीवल्लभाधीश्वरशुद्धाद्वैतसिद्धान्तप्रकाशकः सप्रकाशाख्यव्याख्यः शुद्धाद्वैतमार्तण्डग्रन्थः । तत्साहित्येन संमुद्रितो, नाम्नैवाभिव्यक्तप्रतिपाद्यस्तत्सिद्धान्तानुसारी प्रमेयरत्नार्णवनिबन्धश्च ।

तत्र, शुद्धाद्वैतमार्तण्डः, श्रीश्रीवल्लभाचार्यात्मजगोस्वामिश्रीश्रीविट्ठलनाथदीक्षिततनूजनुःश्रीमहाराजगोस्वामिश्रीयदुनाथजीवंशावतंसषष्ठगृहतिलकितकाशीवास्तव्यगोस्वामिश्रीगिरिधरजीमहाराजविरचितः ।

तद्व्याख्या च तच्चरणारुणाब्जचञ्चरीकचेतोभिः श्रीरामकृष्णभट्टैः कृता ।

तथा, प्रमेयरत्नार्णवस्तु गोकुलस्थश्रीबालकृष्णभट्टैः कृतः ।

एतद्द्वयं च मधुवनदासद्वारकादासकोठीसमध्यक्ष—श्रीकृष्णभगवच्चरणभक्तिशास्त्ररसिकश्रीबालकृष्णदास—श्रीयुतश्यामदाससंगृहीतं पुस्तकद्वयं समवलम्ब्य प्रकाशितवानस्मि ।

अत्र संमुद्रणे नानाविधदर्शनप्रकाशनपरायणश्रीहरिदासगुप्ताऽभिधमहाशयसमुत्साहितो यथामति संशोधितवानस्मि ग्रन्थरत्नद्वयम् । तथापि मानवापरिहार्येण मतिदृष्टिदोषेण जातानि स्खलितानि नानुलक्ष्यीकृत्य सुधीभिर्ग्राह्यस्तत्त्वभाग इत्यलं विस्तरतः ।

सत्पक्षपातिनो हंसा नूनं नालीकवल्लभाः ।
गुणं गृह्णीत मा दोषं नीरक्षीरविवेकिनः ॥

प्रकाशको,
रत्नगोपालभट्टः ।

श्रीकृष्णाय नमः ।

शुद्धाऽद्वैतमार्तण्डः ।

गोस्वामिश्रीश्रीगिरिधरजीमहाराजविरचितः ।

श्रीरामकृष्णभट्टप्रणीतप्रकाशाख्यव्याख्यासहितः ।

श्रीमदाचार्यचरणौ श्रीविठ्ठलपदाम्बुजे ।
श्रीमतां यदुनाथानां श्रीमद्गिरिधरः सुधीः ॥ १ ॥
चरणाम्बुजकिञ्जल्कपरागान् प्रणिपत्य तम् ।
शुद्धाऽद्वैतविचारार्कं तनुते सुधियां मुदे ॥ २ ॥

श्रीमन्मुकुन्दरायाख्यश्रीमद्गोपाललालयोः ।
अङ्घ्री श्रीवल्लभाचार्यश्रीविठ्ठलपदाम्बुजे ॥ १ ॥
श्रीमतां यदुनाथानां तदीयाऽन्वयशोभिनाम् ।
श्रीमद्गिरिधराख्यानां पादपद्मे प्रणम्य हि ॥ २ ॥
शुद्धाऽद्वैतविचारे ये तैः श्लोकाः समुदाहृताः ।
तदाज्ञया तान् विशदीकरवाणि यथामति ॥ ३ ॥

तत्र मङ्गलमाचरन्तो यथार्थसिद्धान्तबोधकचरणान्नमन्ति । श्रीमदाचार्यचरणावित्यादि * श्रीमदाचार्याणां पुरुषोत्तमास्यत्वेन श्रुतीनां वाग्रूपत्वेन तत्कृपया तदर्थस्फूर्त्यर्थं नमनमिति भावः । भवत्पदाम्भोरुहनावमत्र ते निधाय यातास्सदनुग्रहो भवानिति वाक्याच्चरणयोरुद्धारकत्वात् स्वस्याप्युद्धार आभ्यामेवेति भावः । विदा ज्ञानेन ठान् शून्यान् लाति स्वदासत्वेनाङ्गीकरोति स विठ्ठलः। एतेन पूर्णकरुणामयत्वं सूचितम् । पदाम्बुजत्वोक्त्या भक्तिप्रवर्त्तकत्वं, भक्तिमतां सन्तापहारकत्वं, भक्तरूपमधुपसेवितत्वं च ध्वनितम् । प्रेमपूरभरितमानसेषु प्रादुर्भावो भवतीत्यपि ध्वन्यते । यदोः पुष्टिभक्तत्वेन तन्नाथत्वात् पुष्टिभक्तानामिष्टफलदातृत्वं सूचितम् ।

श्रीमद्गिरिधरचरणाः श्रीप्रभुचरणतनयश्रीयदुनाथवंशोद्भवा अस्मदाराध्यचरणाः ॥ १ ॥

चरणाम्बुजेत्यादि * परागसम्बन्धेन मनोमुकुरनिर्मलतया सर्वसिद्धान्तप्रतिफलनं ध्वन्यते । प्रणिपातः साष्टाङ्गप्रणामः । 'तद्विद्धि प्रणिपातेन परिप्रश्नानुसेवया । उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिन' इति श्रीभगवदुक्तेः । तनुते विस्तारयति । एतेन स्वकल्पितत्वमपास्तम् । सुधीत्वं च भगवदेकशरणत्वम् । तेषां सिद्धान्तावलोकनेनानन्दो भविष्यतीत्यर्थः ॥ २ ॥

एवं प्रतिज्ञायाऽद्वैतज्ञानस्य द्वैतज्ञानसापेक्षत्वेन द्वैतपदार्थमाहुः ।

द्विधाज्ञानं तु यद्यत् स्यान्नामरूपात्मना मुहुः ।
ईशजीवात्मना वापि कार्यकारणतोऽथवा ॥ ३ ॥
द्वीतं तदेव द्वैतं स्यादद्वैतं तु ततोऽन्यथा ।
सर्वं खल्विदं ब्रह्म तज्जलानिति पठ्यते ॥ ४ ॥

द्विधाज्ञानं त्वित्यादि * द्विप्रकारकं ज्ञानमित्यर्थः । नामरूपे व्याकरवाणीति श्रुत्या नामरूपव्यवहारस्य भगवत्कृतत्वेन भगवद्रूपत्वम् । एतेन 'अस्ति भाति प्रियं रूपं नाम चेत्यर्थपञ्चकम् । आद्यं त्रयं ब्रह्मरूपं मायारूपं ततः परम्' इति नामरूपयोर्मायिकत्वमिति निरस्तम् । केचित्त्वत्र जगद्रूपं ततः परमिति पठन्ति । तत्र नामरूपयोर्जगत्पद्रूत्वेन जगतः कार्यत्वात् कार्यकारणयोरभेदान्नातिप्रतिकूलम् । यथा मृद्घटयोः । अत एव, नामरूपविभेदेन जगत् क्रीडति यो यतः इति श्रीमदाचार्यचरणैरुक्तम् । यदि च सधर्मत्वभिया तयोर्मायिकत्वमुच्यते तर्हि अस्तित्वादिनापि सविशेषत्वापत्तेः । तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति । एष ह्येवानन्दयातीत्यादिश्रुतिभिः स्वतः प्रकाशकत्वं सर्वावभासकत्वं सर्वानन्ददातृत्वं यथोक्तं तथा, नामरूपे इतिश्रुत्या नामरूपप्रकाशकत्वमतो न तयोर्मायिकत्वमिति दिक् । नामरूपभेदज्ञानमेवाविद्यकं, न तु ते । एवमीशजीवभेदज्ञानं, तथा कार्यकारणभेदज्ञानमिति ॥ ३ ॥

द्वीतमिति * । ये गत्यर्थकास्ते ज्ञानार्थका इति न्यायेन गत्यर्थकादिण्धातोर्भावे क्ते इतमिति सिद्धौ द्विधा इतं द्वीतं तस्मात्

स्वार्थेऽणि द्वैतमिति निष्पन्नम् । तस्य च द्विप्रकारकं ज्ञानमित्यर्थः । *अन्यथा* भेदज्ञानाभावे । न द्वैतमद्वैतमिति विग्रहः । ननु कया श्रुत्याऽभेद उक्त इति तत्राहुः । *सर्वमित्यादि* छान्दोग्ये शाण्डिल्यविद्यायां पञ्चमे प्रपाठके पठितमस्ति, तज्जलानित्यस्याग्रे, शान्त उपासीतेति । अर्थस्तु जायते लीयते अनितीति जलान् तस्मिन् जलान् तज्जलान् । इदं सर्वं विश्वं खलु उत्पत्तिस्थितिलयावस्थासु तस्मिन्नतः सर्वं ब्रह्मेत्युपासीतेति ॥ ४ ॥

श्रुत्यर्थमाहुः ।

सर्वं ब्रह्मात्मकं विश्वमिदमा बोध्यते पुरः ।
सर्वशब्देन यावद्धि दृष्टश्रुतमदो जगत् ॥ ५ ॥
बोध्यते तेन सर्वं हि ब्रह्मरूपं सनातनम् ।
कार्यस्य ब्रह्मरूपस्य ब्रह्मैव स्यात्तु कारणम् ॥ ६ ॥

सर्वमित्यादि* । *इदमेति* इदंशब्दस्य प्रत्यक्षवाचित्वात् ॥५॥

सनातनमिति * सदा वर्त्तमानं नित्यमिति यावत् । सन्मूलाः सौम्येमाः प्रजाः सदायतनाः सत्प्रतिष्ठाना इति, कथमसतः सज्जायेत, तत्सत्यं, यदिदं किञ्च तत्सत्यमित्याचक्षत इत्यादिश्रुतेः । असत्यत्वेन ज्ञानं त्वासुराणामेव । तथाच गीतायाम्, असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरमिति । ननु जगतो नित्यत्वे द्वैतापत्तिरित्याशङ्कायामाहुः *कार्यस्येति* विश्वस्य नित्यत्वेपि मृद्घटयोरिव कार्यकारणयोरैक्यान्न द्वैतापत्तिरिति भावः । सर्वं खल्विदं ब्रह्मेत्यादिना बोधितब्रह्मरूपस्य ब्रह्मैवेत्येवकारेण मायादिकारणं निरस्तम् ॥ ६ ॥

ब्रह्मणः कारणत्वे मानमाहुः ।

जन्माद्यस्येत्यादिसूत्रैर्व्याससपादैर्निरूपितम् ।
यतो वेत्यादिवाक्येषु वेदे स्पष्टं प्रतीयते ॥ ७ ॥

जन्माद्यस्येत्यादीति * अत्राधिकरणचतुष्टयेन ब्रह्मणः कारणत्वं विचारितम् । तत्र जन्माद्यस्य यतः शास्त्रयोनित्वादिति सूत्रे, यतो वा इत्यादिवाक्यं विषयीकृत्य, किं ब्रह्म कर्तृ उताकर्तृ इति संशये, ब्रह्मविदाप्नोति परमितिश्रुत्या ब्रह्मविदः परप्राप्तिं प्रतिज्ञाय सत्यं

ज्ञानमनन्तं ब्रह्मेति श्रुत्या स्वरूपलक्षणमुक्त्वा परस्य सर्वान्तररूपत्व-बोधनायाकाशाद्वायुरित्यादिसृष्टिरुक्ता। तत्र प्रकृतिगतं कर्तृत्वं ब्रह्मणि आरोप्यते। एवं भृगुर्वै वारुणिरित्यत्रापि गौणमेव कर्तृत्वमनूद्यत इति पूर्वपक्षे। अस्येति। प्रत्यक्षस्य जगतो जन्मादि जन्मस्थितिप्रलया यतो यस्मात् तत् कर्तृ, कुतः शास्त्रयोनित्वात्। शास्त्रे योनिः शास्त्रयोनिस्तस्य भावः शास्त्रयोनित्वं तस्माच्छास्त्रोक्तकारणत्वादित्यर्थः। पूर्वोत्तरकाण्डसृष्टिवाक्यानां सङ्ग्रहार्थं सामान्यग्रहणम्। स्वरूपलक्षणवाक्यशेषे कर्तृत्वनिषेधाकथनात्। प्रत्युत कारणत्वस्य कथनादुपनिषदन्तरेऽस्थूलादिवाक्ये धर्मनिषेधनिरूपणेऽपि विरुद्धधर्माश्रयत्वेन प्राकृतधर्मनिषेधपरत्वेनोपपत्तौ लक्षणापादकस्यारोपस्य दुष्टत्वात्। किञ्च प्रकृतौ कर्तृत्वस्य निषिद्ध्यमानत्वेन जीवस्य स्वातन्त्र्याभावेन च कर्तृत्वाभावाद् ब्रह्मण्यारोपासम्भवः। तस्मात् सकलजगत्कारणं ब्रह्म।

अत्र, जन्माद्यस्य यतः, शास्त्रयोनित्वादिति योगविभागः सर्वेषां मते। तन्न। अग्रिमसूत्रेषु साध्यहेतुनिर्देशपूर्वकमेव दर्शनेनात्रापि तथैव युक्तत्वात्। ये तु जन्माद्यधिकरणं, शास्त्रयोनित्वाधिकरणं भिन्नमङ्गीकुर्वन्ति, तत्र हि प्रथमसूत्रे हेतोरभावाद् द्वितीये साध्याभावान्न वाक्यार्थसिद्धिरित्यादिदोष इति श्रीपुरुषोत्तमचरणैर्भाष्यप्रकाशे बहुशः खण्डितो योगविभागः।

द्वितीयेऽधिकरणे, तत्तु समन्वयादितिसूत्रे ब्रह्म समवायि उत नेति संशये समवायित्वे विकारित्वापत्तिरिति न तादृश इति पूर्वपक्षे, तत् समवायिकारणं ब्रह्म। कुतः। समन्वयात् सम्यगनुवृत्तत्वाद् अनारोपितानागन्तुकरूपेणान्वयात्। घटे मृद इवास्तिभातिप्रियाणाञ्जगत्यनुवृत्तत्वादित्यर्थः। तादात्म्यसम्बन्धेन यदाश्रयं कार्यं भवति तत् समवायिकारणम्। अस्यैवावस्थाविशेष उपादानम्। तल्लक्षणं च स्वसमानसत्ताककार्याकारेण यदाविर्भवति तदुपादानम्। तृतीयेऽधिकरणे चिद्रूपेण कारणत्वम्। आनन्दमयाधिकरणे आनन्दरूपेण कारणत्वं व्यासपादैर्विचारितमित्यर्थः। *यतो वेत्यादीति* भृगुर्वै वारुणिर्वरुणं पितरमुपससार। अधीहि भगवो ब्रह्मेति, तꣳ होवाच यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत् प्रयन्त्यभिसंविशन्ति तद् ब्रह्मेति तद्विजिज्ञासस्वेति स्पष्टमेव कारणत्वं

ब्रह्मणि प्रतीयत इत्यर्थः ॥ ७ ॥

एवं ब्रह्मणः कारणतामुपपाद्य ब्रह्मणो लक्षणमाहुः ॥

साकारं सर्वशक्त्येकं सर्वज्ञं सर्वकर्तृ च ।
सच्चिदानन्दरूपं हि ब्रह्म तस्मादिदं जगत् ॥ ८ ॥

साकारमित्यादि * आनन्दाकारमित्यर्थः । विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोबाहुरुत विश्वतस्पात् । सम्बाहुभ्यां धमति सम्पतत्रैर्द्यावाभूमी जनयन् देव एक इति तैत्तिरीये श्वेताश्वतरे चास्ति श्रुतिः । अत्र मुखादीनां सर्वत्र विद्यमानत्वमुक्तं सर्वेन्द्रियोपलक्षणम् । तेन साकारस्यैव व्यापकत्वम् । बाहुभ्यामितिद्विवचनेन ब्रह्मणो द्विभुजत्वं श्रुतिसिद्धम् । चतुर्भुजत्वं तु स्मृतिप्रसिद्धम् । देव इत्यनेन लीलास्थपुरुषोत्तमस्यात्र ग्रहणम् । दिव्धातोः क्रीडार्थकत्वात् । छान्दोग्ये सर्वकामः सर्वगन्धः सर्वरस इत्युक्तम् । रसो वै स इति तैत्तिरीये । सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपादिति पुरुषसूक्तेऽपि साकारत्वम् । अग्रे, ततो विराडजायतेतिकथनान्नायं विराट् पुरुषः । सर्वतःपाणिपादान्तं सर्वतोऽक्षिशिरोमुखमित्यादिगीतायाम् । आनन्दमात्रकरपादमुखोदरादिरिति नारदपञ्चरात्रे । अथवा परमात्मानं परमानन्दविग्रहमिति याज्ञवल्क्यस्मृतौ । नन्वपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुस्सश्रृणोत्यकर्णः । अस्थूलमनण्वित्यादिषु श्रुतिषु निषेधात् कथं साकारत्वमिति चेन्न । अपाणिपादत्वमुक्त्वा यज्जवनग्रहीतृत्वमुक्तं, तेन लौकिकपाणिपादादिनिषेधपरम् । अनण्वित्यादिवाक्येऽप्यग्रे, एतस्य प्रशासने गार्गि द्यावाभूमी विधृते तिष्ठत इत्युक्तम् । यथा सैन्धवो बाह्योऽन्तरः कृत्स्नो रसघन एवं वारे अयमात्मा कृत्स्नः प्रज्ञानघन एवेति श्रुतौ घनपदेन साकारत्वलाभात् । अर्थस्तु यथा सैन्धवः सर्वपरिदृश्यमानो रसघन एवं ब्रह्मापि यावत् तावत् सर्वं प्रज्ञानघन एवेति । परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया चेतिश्रुतेः । यः सर्वज्ञः सर्वविदितिश्रुतेः । सर्वकर्त्ता सर्वभोक्ता चेति । सत्यं ज्ञानमानन्दं ब्रह्मेतिश्रुतेरानन्दमात्रमेव । एवञ्च करादिरपि ब्रह्मैव । *इदं* परिदृश्यमानम् ॥ ८ ॥

सच्चिदानन्दरूपब्रह्मणः सकाशाज्जगदुत्पत्तौ जडजीवान्तर्यामिणां सदादिभ्य उद्गम इत्याहुः ।

जडजीवान्तःस्थितानां यथाक्रमश उद्गमः ।
अग्नेर्यथा विस्फुलिङ्गास्तथा जीवोद्गमः स्फुटः ॥ ९ ॥

जडेत्यादि * उद्गमो निःसरणम् । जीवोद्गमे श्रुत्युक्तं दृष्टान्तमाहुः * अग्नेरिति * यथा सुदीप्तात् पावकाद्विस्फुलिङ्गा व्युच्चरन्ति, एवमेव तस्मादात्मनः सर्वे प्राणाः सर्वे लोकाः सर्वे जीवाः कपूयचरणा रमणीयचरणा इति मुण्डकश्रुतौ । एतेन जीवस्योत्पत्तावनित्यत्वापत्तिरिति निरस्तम् । जीवस्य निःसरणमेवोच्यते, न तूत्पत्तिः ॥ ९ ॥

ननु जीवस्य विस्फुलिङ्गवन्निःसरणेऽशत्वे सर्वशरीरगतचैतन्यानुपलम्भस्तत्राहुः ।

विसर्पिगुणचैतन्योऽणुर्जीवोंशो हरेः स्मृतः ।
जडे चिदानन्दयोस्तु चिदानन्दस्य सर्वशः ॥ १० ॥

विसर्पीत्यादि * विसर्पि प्रसरणशीलं चैतन्यं गुणो यस्य सः । यथा मणेः प्रभा । तथा च व्याससूत्रम् । गुणाद्वाऽऽलोकवत् । अर्थस्तु । जीवस्य चैतन्यं गुणस्तस्मात् सर्वशरीरव्यापी । तत्र दृष्टान्तः । आलोकवत् । सूर्यमण्यादिप्रभा यथा बहुदेशं व्याप्नोति तद्वदित्यर्थः । अग्रे, व्यतिरेको गन्धवत् । अर्थस्तु । व्यतिरेकः । अधिकदेशवर्त्ती चैतन्यं गुणः । गन्धवत् । यथा चम्पकादेर्गन्धश्चम्पकाधिकदेशस्थले उपलभ्यते तद्वदित्यर्थः । नच चम्पकात्तदवयवानां निस्सरणे गन्धोपलब्धिरिति वाच्यम् । निस्सरणे न्यूनत्वापत्तेः । भोग्यादृष्टत्वेन तदवयवपूरणकल्पनायां गौरवात् । किञ्चोग्रगन्धादेः स्पर्शे मुहुर्मुहुः क्षालनेन सुगन्धानपगमादनेकचर्मपुटवेष्टितस्य मृगमदस्य सुगन्धोपलब्धेश्चातोऽवयवकल्पना निरस्तेति दिक् । किञ्च तृतीयोपि दृष्टान्तः । अविरोधश्चन्दनवत् । अर्थस्तु । यथा चन्दनमेकदेशस्थितं सर्वशरीरे सुखं शैत्यं च जनयति तद्वदणुत्वेऽपि सर्वशरीरचैतन्योपलब्धिमित्यर्थः । एषोऽणुरात्मा चेतसा वेदितव्य इतिश्रुतेः । नित्यः सर्वगतस्थाऽणुरिति स्मृतेश्च । सर्वगतेन ब्रह्मणा सह तिष्ठतीति सर्वगतस्थः । द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते इति श्रुतेः । स चासावणुश्चेति तदर्थः । यदि यथाश्रुतार्थः स्यात् । तर्हि स्थाण्वचलपदयोः पर्यायत्वापत्तौ पौनरुक्त्यं स्यात् । अंशो नाना-

व्यपदेशादिति व्याससूत्राद् अंशः। अर्थस्तु। जीवो ब्रह्मणोंऽशः। कुतः नानाव्यपदेशात्। क्वचिद् ब्रह्मत्वेन क्वचिदज्ञत्वेन क्वचिदीशितव्यत्वेनाणुत्वेन व्यापकत्वेन निरूपणादेकस्यैव विरुद्धधर्माश्रयत्वं ब्रह्मातिरिक्तस्य न सम्भवति। अतो जीवो ब्रह्मांश इति। *हरेरिति * ममैवांशो जीवलोके जीवभूतः सनातनः इति गीतावाक्यतः। ननु सर्वस्य ब्रह्मात्मकत्वेन कथं त्रैविध्यमत आहुः *जडे चिदानन्दयोरित्यादिना *। आनन्दतिरोभावेन भेद इति भावः ॥ १० ॥

तिरोधानं हरीच्छातो निबन्धादिषु वर्णितम् ।
आविर्भावे तु सर्वं हि ब्रह्मैवेति न संशयः ॥ ११ ॥

तिरोधानमिति *। एकोऽहं बहु स्यामितिश्रुतिसिद्धेच्छात इत्यर्थः। ननु तर्हि भेदापत्तिरत्राहुः *आविर्भावे त्वित्यादि *। आनन्दाविर्भावो जीवे, चिदानन्दयोर्जडे ॥ ११ ॥

ननु जीवादिभावे किं प्रयोजनमत आहुः।

रमणार्थमिदं सर्वं ब्रह्मैव स्वेच्छयाऽभवत् ।
यथा सर्पः स्वेच्छया हि कुण्डलाकारतां गतः ॥ १२ ॥

रमणार्थमिति*। एकाकी न रमते स द्वितीयमैच्छत्, तदात्मानं स्वयमकुरुतेत्यादि श्रुतेः। ननु तर्हि विकारित्वापत्तिस्तत्राहुः * यथेति * ॥ १२ ॥

न विकारि तथा ब्रह्म व्यासैः सूत्रे निरूपितम् ।
सुवर्णस्याविकारित्वं कामधेनोर्मणेरपि ॥ १३ ॥

सूत्रे इति *। उभयव्यपदेशात्त्वहिकुण्डवदिति सूत्र इत्यर्थः। अर्थस्तु, उभयोर्विरुद्धधर्मयोर्व्यपदेशस्तस्मात्। निर्गुणत्वेनाऽनन्तगुणत्वेन परिणामित्वेनाविकारित्वेन विरुद्धधर्मरूपेण व्यपदेशाच्छ्रुतौ कथनात् सर्वाकारं ब्रह्मेत्यर्थः। तथाच श्रुतिषु, साक्षी चेता केवलो निर्गुणश्चेत्युक्त्वा, एको वशी निष्क्रियाणां बहूनामेकं बीजं बहुधा यः करोति। ततो यदुत्तरं तद्रूपमनामयमित्यग्रे सर्वाऽऽननशिरोग्रीव इति श्वेताश्वतरे। तैत्तरीये यदेकमव्यक्तमनन्तरूपं, विश्वतश्चक्षुरुत विश्वतोमुख इत्यादि चोक्तम्। तथानन्दवल्यां, तदात्मा-

न* स्वयमकुरुत, यद्वैतत्सुकृतमिति । अविनाशी वा अरेऽयमात्मेत्यादिकं चान्यत्रोक्तमेवं विरुद्धधर्माश्रयत्वेन बहुशो व्यपदेशादित्यर्थः । तर्हि कथमेकमनेकधेति तत्राह । अहिकुण्डलवत् । यथा सर्पः सरलः कुण्डलाकारश्च भवति । तद्वद् ब्रह्म सर्वाकारं भवति । न हि सर्पस्य कुण्डलाकारे कोऽपि विकारः । भाष्ये तु, सर्वाणि तैजसान्यविकृतानीत्युक्तम् । एवञ्च सुवर्णस्यानेकाकारत्वेऽपि न सुवर्णस्यान्यथाभावः । सुबोधिन्यां तु, कामधेनुकल्पद्रुमचिन्तामणेश्च जायमानाः पदार्था दृश्यन्ते, तेन न कामधेन्वादीनां विकृतत्वमित्युक्तमिति दिक् ॥ १३ ॥

ननु सर्वस्य घटादेरुत्पत्तिनाशदर्शनेनानित्यत्वात् कथं भगवद्रूपत्वं कार्यस्येत्याशङ्कामपनयन्ति ।

आविर्भावतिरोभावौ पदार्थानां यतस्ततः ।
नानित्यता तु विज्ञेया शास्त्रविद्भिर्विचक्षणैः ॥ १४ ॥

आविर्भावेत्यादि* । घटपटादिसर्वाकारस्वरूपेण या भगवत आविर्भावेच्छा तया आविर्भवति । तथाच श्रीमदाचार्यचरणैर्निबन्धे ।

मृदादि भगवद्रूपं घटाद्याकारसंयुतम् ।
मूलेच्छातस्तथा तस्मिन् प्रादुर्भावो हरेस्तदेति ।

व्याख्यातं च तैरेव । मृदि घटादयो यावन्तो भविष्यन्ति ते सर्वे कारणत्वेन वर्तन्त इत्यङ्गीकर्त्तव्यम् । अन्यथा ततः प्रादुर्भावो नोपपद्यते । ततः सामर्थ्यं भगवत्त्वेन सङ्गच्छते । अतो मृदादिभगवद्रूपं घटादिकार्यं च भगवद्रूपं तत्रैव तिष्ठति । मूलेच्छातः पुरुषोत्तमेच्छात इति ।

तदेतदक्षयं नित्यं जगन्मुनिवराखिलम् ।
आविर्भावतिरोभावजन्मनाशविकल्पवद् इति विष्णुपुराणे प्रथमेऽशे । वस्तुतो नित्यं, किन्त्वाविर्भावतिरोभावजन्मनाशविकल्पवत् । आविर्भावश्च तिरोभावश्च आविर्भावतिरोभावौ तावेव जन्मनाशविकल्पौ तद्वदित्यर्थः । 'आविर्भावतिरोभावौ शक्ती वै मुरवैरिण इति वाक्यं श्रीमदाचार्यचरणैरुक्तम् । भगवच्छक्तित्वादेव वीर्यादिपरिणामानां देहादिभावः । परास्य शक्तिर्विविधैव श्रू-

यते स्वाभाविकी ज्ञानबलक्रिया चेति श्रुतेः । अनन्तशक्तित्वाद् भगवतः ॥ १४ ॥

आविः प्रकटं भावयति कारणान्तःस्थं कार्यं बहिः प्रकटीकरोति या शक्तिर्निमित्तगतोपादानगता च सा आविर्भावशक्तिः । कार्यं कारणे तिरोभावयति सा शक्तिस्तिरोभावशब्दवाच्येत्यभिप्रेत्याहुः ।

तिरोभावे तु कार्यं हि वर्तते कारणात्मना ।
आविर्भावे तु कार्यं हि यथा मृदि घटादयः ॥ १५ ॥

तिरोभावे त्वित्यादि* । अत्रैवं ज्ञेयम् । तन्तुतुरीवेमादिभ्यः पटोत्पत्त्या मृद्दण्डचक्रादिभ्यश्च घटोत्पत्त्या तस्य तस्य पटघटजनने शक्तिरिति निश्चीयते । सा च न स्वभावो, नापि स्वरूपम् । तथा सति तस्य सार्वदिकत्वाच्छीर्णेभ्योऽपि तन्त्वादिभ्यः पटाद्युत्पत्तिःस्यात् । भर्जिताद् बीजादप्यङ्कुरोत्पत्तिः स्यात् । प्रतिबन्धकमणिसमवधानेऽपि वन्हेस्तृणादिकं दह्येत । स्वभावस्यानपायात् । स्वरूपस्य च सत्त्वात् । अतः शीर्णतन्त्वादिषु कालेन, भर्जितेषु भर्जनेन च नाश्या, अग्नेर्मणि सन्निधाने प्रतिबध्या च काचित् स्वभावात् स्वरूपाच्चातिरिक्तैव शक्तिरङ्गीकार्या । ननु तन्त्वादीनामविशीर्णत्वेन बीजानामप्यभर्जितत्वेन रूपेणैव कार्यजननदर्शनात्तेनैव रूपेण कारणतेति नातिरिक्तशक्तिकल्पनं गुरुभूतम् । वन्हिस्थलेऽपि प्रतिबन्धकमण्यभावेन निर्वाहाच्चेति चेन्न । दावदग्धवेत्रबीजेभ्यः कदलीकाण्डजननस्य भामत्यां प्रदर्शितत्वात् काचिच्छक्तिर्भर्जनेन नाश्यते, अपरा आधीयत इति मन्तव्यम् । वन्हिस्थले प्रतिबन्धकमणिसमवधाने उत्तेजकेन मणिना दाहदर्शनादुत्तेजकाभावविशिष्टमण्यभावविशिष्टवन्हेरेव कारणत्वेऽतिगौरवम् । तथाहि । मण्यभावत्वेन प्रवेशे नानाकार्यकारणभावकल्पनाऽत्यन्तमेव गुर्वी । मन्त्रौषधादिनापि दाहाभावात् । एवमुत्तेजकानामपि नानात्वात्तत्तत्स्वरूपेण प्रवेशे ततोप्यत्यन्तगौरवम् । यत्किञ्चित्त्वेन प्रवेशे यावत्तदभावविशिष्टमण्यभावविशिष्टस्याग्नेर्दाहं प्रत्यकारणत्वात्ततो दाहाभावापत्तिः । यावत्त्वेन प्रवेशे यत्किञ्चिद्वैशिष्ट्ये दाहाभावापत्तिः । यथाकथञ्चित्त्वेन प्रवेशोऽपि तादृशकार्यकारणभावज्ञानस्योत्तेजकतदभावतद्वैशिष्ट्यज्ञानाधीनतया

तादृशगुरुशरीरकारणतास्वरूपज्ञानस्यैव दौर्घट्यमिति तदपेक्षया शक्तिकल्पनमेव ज्याय इति सर्वनिर्णयावरणभङ्गे श्रीपुरुषोत्तमचरणैर्विस्तरशो निरूपितमिति ततोऽवधेयम् । तस्मादाविर्भावतिरोभावयोः शक्तित्वम् । सा शक्तिमति भगवद्रूपे घटे तिष्ठति । अत एव घटो भवतीति कर्तरि प्रयोगः । स्वमते सर्वेषां भगवद्रूपत्वात् । इच्छासहकारेण नित्ययोरप्याविर्भावतिरोभावयोर्न सदैवोदयः । विशेषस्तु विद्वन्मण्डने श्रीमत्प्रभुचरणैरुक्तम् ॥ १५ ॥

आविर्भावतिरोभावलक्षणमाहुः ।

यदाऽनुभवयोग्यत्वं वर्त्तमानस्य वस्तुनः ।
आविर्भावः स विज्ञेयः स्तिरोभावस्ततोऽन्यथा ॥ १६ ॥

यदेत्यादि * । योग्यतानिवेशेन दरीविवराङ्कुरेष्वपूर्वं च नाव्याप्तिः । शशशृङ्गादौ च नातिव्याप्तिः । वृद्धिविपरिणामादिष्वपि पूर्वरूपतिरोभावेन द्वितीयस्याविर्भावः । परिणामे रूपान्तरस्य । क्षये तु तिरोभावः । * अन्यथेति * तदयोग्यत्वमित्यर्थः ॥ १६ ॥

नन्वनयोरङ्गीकारे प्रागभावदिसत्त्वे चातिगौरवमत आहुः ।

प्रागभावादयो नाङ्गीकार्या आभ्यां यतोऽखिलम् ।
तद्विस्तरभिया नात्र लिख्यतेऽन्यत्र दृश्यताम् ॥ १७ ॥

प्रागभावादय इति * । प्रागभावः प्रध्वंसाभावोऽत्यन्ताभावोऽन्योन्याभाव एते नाङ्गीकार्याः । यत आभ्यामाविर्भावतिरोभावाभ्याम् ।कया रीत्या सिद्धिस्तत्राहुः * तदित्यादि * । अन्यत्र * प्रागभावखण्डनसर्वनिर्णयनिबन्धावरणभङ्गादिषु । तत्र प्रागभावः कारणावस्थातो नातिरिच्यते । तस्य भिन्नकारणत्वकल्पनायां प्रमाणाभावात् । अग्रिमजननज्ञानेनैव तस्यानुभव इति श्रीमदाचार्यचरणैरुक्तं निबन्धे । नचेह कपाले घटो नास्तीति प्रतीतिस्तत्र मानम् । तस्या घटत्वावच्छिन्नप्रतियोगिताकाभावविषयतया सामान्यत्वेन प्रागभावाख्यविशेषानवगाहित्वात् । एवं ध्वंसेऽपि दण्डादिस्वरूपमेव । तिरोभावशक्त्यतिरिक्तस्य ध्वंसस्य निरूपयितुमशक्यत्वात् । तेन रूपान्तरं पश्यन् पूर्वस्य तिरोभावमेव मन्यते ध्वस्त इति, श्रीमदा-

चार्यचरणैस्तत्रैव विनिरूपितम् । तिरोऽप्रकटं भावयति । तिरोभवनं वा तिरोभावः । उभयथाऽपि निमित्तोपादानान्यतरस्वरूपातिरिक्तो ध्वंसो न निरूपयितुं शक्यः । तदतिरिक्तस्यादर्शनात् । तथाच कार्यप्रतिकूला कारणावस्थैव ध्वंस इति तदर्थः । प्रागभावादिप्रयोगाश्च, घटस्यानन्यथासिद्धनियतपश्चाद्भावित्वं दण्डस्य तादृशपूर्वभावित्वं चापेक्ष्य यथा घटदण्डयोः कार्यकारणप्रयोगस्तथा घटादेरग्रिमजननमाकारान्तरं चापेक्ष्य कारण एव प्रागभावध्वंसपदप्रयोगः। घटः पटो नेत्यन्योन्याभावप्रतीतावपि घटे मूलेच्छया पटादीनां तिरोभावः । एवं पटे घटादीनाम् । यद्यपि सर्वेषां पदार्थानां ब्रह्मरूपत्वेन सर्वधर्मवत्वम् । तथापि मत्स्याद्यवतारवज्जलहरणकार्यार्थमेव घटब्रह्मण आविर्भावः । एवमावरणकार्यार्थमेव पटरूपब्रह्मणः । एतेनाऽन्योन्याभावानङ्गीकारे घटेन पटकार्यं स्यादित्यादि निरस्तम् । भगवतस्तथेच्छातः सर्वमनवद्यम् । एवमत्यन्ताभावोऽपि तिरोभावेनैव गतार्थ इति दिक् । अभावस्याधिकरणरूपत्वमित्यन्यत्र विस्तरः ॥ १७ ॥

एवं प्रपञ्चस्य सत्यत्वमुपपाद्य तत्प्रसङ्गेनाविर्भावतिरोभावौ निरूप्य प्रस्तुतं कार्यस्य कारणस्याधिकरणस्य करणस्यापादानस्य सम्बन्धस्य सम्प्रदानस्य कर्मणः कर्त्तुः प्रकारस्य ब्रह्मरूपत्वमेवेति श्रीभागवतपद्येनाहुः ।

यत्र येन यतो यस्य यस्मै यद्यद्यथा यदा ।
स्यादिदं भगवान् साक्षात् प्रधानपुरुषेश्वरः ॥ १८ ॥
इति भागवते पद्ये सर्वस्य ब्रह्मता श्रुता ।
श्रुतिसूत्रैः स्मृतिगणैर्दृष्टिः स्वर्णार्थिनो यथा ॥ १९ ॥

यत्रेत्यादि * । *यदेति* कालार्थकदाप्रत्ययेन कालस्यापि ब्रह्मत्वमुक्तम् । अत एव, कालोऽस्मीति श्रीभगवद्वाक्यम् । एतेनाऽस्मन्मते न द्वैतलेशः । एतेनोपादानत्वे निमित्तत्वानुपपत्तिस्तत्त्वे चोपादानस्येति परास्तम् । सर्वभवनसमर्थत्वाद् ब्रह्मणः । विरुद्धधर्माश्रयत्वस्य ब्रह्मणो लक्षणत्वात् । तच्च प्रागेव निरूपितम् ॥१८॥

इतीत्यादि*। श्रुतयः, सर्वं खल्विदं ब्रह्मेत्यादयः । एवञ्चात्मा-

ऽकात्स्न्र्यमित्यादिसूत्राणि । भूतानि विष्णुर्भुवनानि विष्णुरिति विष्णुपुराणे । वासुदेवः सर्वमिति स महात्मा सुदुर्लभ इति गीतायाम् ॥ १९ ॥

दृष्टान्तमुपपादयन्ति ।

सुवर्णस्य च ये खण्डाः कटका मुद्रिकादयः ।
सुवर्णत्वेन गृह्णाति तथा ब्रह्मविदो मतिः ॥ २० ॥

सुवर्णस्येत्यादि * । 'यथा हिरण्यं बहुधा समीयते नृभिः क्रियाभिर्व्यवहारवर्त्मसु । एवं वचोभिर्भगवानधोऽक्षजो व्याख्यायते लौकिकवैदिकैर्जनैरिति' श्रीभागवताष्टमस्कन्धवाक्यात् । 'यथा सुवर्णं सुकृतं पुरस्तात् पश्चाच्च सर्वस्य हिरण्मयस्य । तदेव मध्ये व्यवहार्यमाणं नानापदेशैरहमस्य तद्वद्' इति तस्यैवैकादशस्कन्धवाक्याच्चेति भावः ॥ २० ॥

तत्र श्रुतिं प्रमाणयन्ति ।

यथा सौम्येत्यादिश्रुतौ स्पष्टमेव निरूपितम् ।
तथा तत्त्वमसीत्यत्राऽभेदोंऽशांशिविचारतः ॥ २१ ॥

यथेत्यादि* । यथा सौम्य एकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं भवतीत्यादिश्रुतौ यथा मृत्तदवयवयोरभेदस्तथा तत्त्वमसीत्यत्राभेदोंऽशांशिनोरभेदादित्यर्थः ।

अत्र सर्वेषां मतसङ्ग्रहश्लोकः ।

केचित्तत्त्वमसीतिवाक्यविषये तत्त्वम्पदे लक्षणां
केचित्तत्र ङसो लुकं विदधते भाष्यं तु केचिज्जगुः ॥
केचिच्चिद्विषयादभेदमपरे छिन्दन्त्यतत्त्वं पदं
सिद्धान्ते तु सुवर्णवज्जगदिदं ब्रह्मैव जीवस्तथा ॥ १ ॥

अस्यार्थस्तु । केचिच्छङ्कराचार्याः । तच्छब्देन सर्वज्ञत्वादिविशिष्टं ब्रह्म, त्वंशब्देनाल्पज्ञत्वादिविशिष्टो जीवस्तयोरभेदो न सम्भवतीति भागयोः सर्वज्ञत्वाल्पज्ञत्वयोस्त्यागे केवलं चिदंशमात्रग्रहणेनाभेदः । सोऽयं देवदत्त इतिवद्भागत्यागलक्षणां विदधते । केचिद् रामानुजमाध्वशैवाः, तत्त्वमित्यत्र, सुपां सुलुक्पूर्वसवर्णाच्छेयाडा-

ङ्यायाजाल इति सूत्रेण ङसो लुकं विदधते। तस्य त्वमसि तत्सम्बन्ध्यसि। सम्बन्धश्च सेव्यसेवकभावः। केचिद् रामानुजादिमतव्याख्यातारो भाष्यं व्याकरणभाष्यं, प्रातिपदकनिर्देशे यां यां विभक्ति बुद्धिरुपजायते सा सा आश्रयितव्येत्यचः परस्मिन्निति सूत्रे। तदिति प्रातिपदिकम्। तेन षष्ठीविभक्तेराश्रयणम्। अर्थः पूर्ववत्। केचिन्निम्बार्काश्चिद्द्वियाचित्त्वसाधर्म्याद् अभेदः। केचिन्माध्वैकदेशिनः, अतत्त्वमसीति पदं छिदन्ति। तत्रार्थस्तु, तद् ब्रह्म त्वं नासि, किं तर्हि, जीवोऽसीत्यर्थः। सिद्धान्ते ब्रह्मवादिसिद्धान्ते। सुवर्णस्यांशाः सुवर्णरूपास्तथा ब्रह्मांशं जगद् ब्रह्मैव, तथा जीवोऽपि चिदंशो ब्रह्मानेन वाक्येन बोध्यत इत्यर्थः॥ १॥

एवमुक्तानां खण्डनसङ्ग्रहश्लोकः।

> तत्रोपक्रमसङ्गतिर्बहुविधा भग्ना प्रतिज्ञाश्रुति-
> र्भक्तिः स्याद्यदि, न त्वमेव कथयेद्भेदे च नो तुल्यता॥
> साधर्म्येऽपि तु भेद एव रसितश्छेदो न सम्यग्यतः
> सिद्धान्तः श्रुतिसंमतो विलसति प्राज्ञैर्विचार्य मुहुः॥२॥

एतदर्थस्तु, शङ्कराचार्यादिव्याख्यानेषु उपक्रमस्य सङ्गतिर्बहुप्रकारेण भग्ना स्यात्। तथाहि। तत्त्वमसीतिवाक्यं श्वेतकेतूपाख्यानेऽस्ति। तत्रोपक्रमे, अपि वा तमादेशमप्राक्षो येनाश्रुतं श्रुतं भवत्यमतं मतं भवत्यविज्ञातं विज्ञातं भवतीत्यादिना एकविज्ञाने सर्वविज्ञानं प्रतिज्ञातम्। तदेकमेव चेत् सर्वं भवेत् तदोपपद्यते। यथा सुवर्णकार्यं सुवर्णखण्डाः सर्वं सुवर्णमिति सुवर्णज्ञानेन तज्ज्ञानम्भवति। तदर्थं सदेव सोम्येत्यारभ्य निरूपितम्। ततो जडस्य सर्वस्याऽपि सदात्मकत्वार्थम्, ऐतदात्म्यमिदं सर्वमित्युक्तम्। तर्हि जडगताऽसत्यत्वादिदोषस्तत्परिहारार्थमाह। तत्सत्यमिति। तेनाविर्भावतिरोभावौ पदार्थानां ज्ञेयौ। पूर्वोत्तरयोर्जडजीवयोः सदात्मकत्वे हेतुमाह। स आत्मेति। एवं जडस्य ब्रह्मात्मकत्वमुक्त्वा जीवस्याप्याह। तत्त्वमसीति। उपदेशश्चाऽयम्। आवृत्तिरसकृदुपदेशादिति ब्रह्मसूत्रात्। अतः सम्पूर्णमहावाक्यमुपदेशः। तत्र यथा ऐतादात्म्यमिति सदंशे न भागत्यागलक्षणा, तथोत्तरत्रापि चिदंशे न भागत्यागलक्षणा। नापि श्वेतकेतुरवतारः, पूर्वं स्तब्धत्वादिदोषकीर्तनात्।

अतो ब्रह्मवाक्यत्वात्तदेकदेशस्तत्त्वमसीति केवलं जीवब्रह्मणोरैक्यं न बोधयति, वाक्यभेदप्रसङ्गाद् उपक्रमविरोधाच्चेति सर्वं श्रीमदाचार्यचरणैरुक्तम् । एवञ्च ।

उपक्रमोपसंहारे योऽर्थस्तु प्रतिपद्यते ।
स एवोत्तरपक्षः स्यात् पूर्वपक्षस्ततोऽन्यथा ॥

इत्यभियुक्तोक्तेरुपक्रमविरोधेन लक्षणा नाङ्गीकार्येत्यर्थः । भेदवादिनां मते सर्वविज्ञानप्रतिज्ञाभङ्गो, जगतो भिन्नत्वात् । न हि सुवर्णज्ञाने मृद्विकारा ज्ञायन्ते । किन्तु सुवर्णविकारा एव । वास्तविकभेदाभेदवादिनां मते भेदज्ञानस्य वास्तवत्वेन तेषां भेदवादिवदुपक्रमविरोधः, प्रतिज्ञाहानिश्च । किञ्च भक्तिर्लक्षणा यदि स्यात् तर्हि त्वंशब्दवाच्यस्य पिण्डस्य ब्रह्मत्वमिष्टं न स्यात्तर्हि, न त्वमसीत्येव ब्रूयात् । त्वमल्पगुणोपाधिको ब्रह्म नासीत्यर्थः । कथयति त्वेवं, तस्माल्लक्षणा नाभिमता । भेदे च, तस्य त्वमसीति व्याख्याने भेद एव स्थितः । तथाच जीवस्य भिन्नत्वात् कस्यचित् सुखं कस्यचिद् दुःखमिति ब्रह्मणि वैषम्यमित्यर्थः । एतच्चाग्रे वक्ष्यन्ति । भेदाभेदवादिमते चित्त्वसाधर्म्येणाभेदस्तथाच भेद एव रसितः पर्यवसित इत्यर्थः । एवञ्च भेदवादिवत्तेषामपि मते दोषः । अतत्त्वमसीतिच्छेदस्तु न वैदिकसंमत इति श्रीमदाचार्यचरणोक्तेर्न सम्यक् । तस्मिन् पक्षे, अतत् ब्रह्म त्वं नासीत्यर्थे, जीवोऽसीति पर्यवसिते जीवस्य स्वतः सिद्धत्वेन ब्रह्मत्वस्याप्राप्त्या च तादृशपदच्छेदो न सम्यगित्यर्थः । अतः पूर्वश्लोके, छिदन्त्यतत्त्वं पदमित्युक्तम् । तत्रातत्त्वम् । अवैदिकसंमतं पदं छिन्दन्तीत्यपि श्लोकार्थः । सिद्धान्तः शुद्धाऽद्वैतसिद्धान्तः । श्रुतिसंमत उपक्रमोपसंहारश्रुतिसंमत इति प्राज्ञैः पण्डितैर्विचार्यमित्यर्थः ॥ २१ ॥

एवमद्वैतपदार्थं निरूप्य शुद्धपदव्यावर्त्यमाहुः *

अत्रैव शाङ्कराः प्राहुर्मायिकं नश्वरं जगत् ।
मायासम्बन्धतो ब्रह्म कारणं नान्यथैव हि ॥ २२ ॥

अत्रैवेत्यादि * । कार्यकारणविचारे । शङ्करा एव शाङ्कराः ।

स्वार्थेऽण्। ईदृशं घटपटाद्यात्मकं जगन्मायिकमतो नश्वरं नाशशालि। एषां मते प्रपञ्चस्य मायिकत्वेन तस्य कारणेन तादृशेनैव भवितव्यम्। कारणासजातीयत्वात्कार्यस्य तच्चाज्ञानमेव कारणम्। ब्रह्मणस्तु निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्। अथात आदेशो नेति नेतीत्यादिश्रुतिभ्यः। इन्द्रो मायाभिः पुरुरूप ईयते, यद्वाचानभ्युदितं येन वागभ्युद्यते तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासत इत्यादिश्रुतिभ्यो निराकारत्वमकर्त्तृत्वमुपास्यस्याब्रह्मत्वम् । किञ्च यद्यत् कर्त्तृ तत्तत् सधर्मकम् । यद्यत् साकृति तत्तन्नश्वरमित्यनुमानत आकारस्य नश्वरत्वेन च ब्रह्मणो निराकारत्वसिद्धिः । अज्ञानं चाऽहमज्ञ इत्यनुभवसिद्धम् । तस्य नामान्तरं माया चाविद्येति । सा विचित्रपरिणामशीलातया विचित्रं जगत् प्रतीयते । शुद्धसत्त्वप्रधाना माया। मलिनसत्त्वप्राधानाऽविद्येति भेदः । तत्र यथा जलदर्पणादिषु सूर्यादिप्रतिबिम्बस्तद्वन्मायाविद्यादिब्रह्मप्रतिबिम्बतयेशजीवव्यवहारः । यथा वाऽऽकाशस्य वृक्षवनादिना परिच्छेदप्रतीतौ वृक्षवनाकाशादिव्यवहारस्तथाऽविद्यामायासम्बन्धेन जीवेशादिव्यवहारः। यथा वाङ्गुलिसम्पर्कादिना द्विचन्द्रादिप्रतीतिस्तथा मायासम्बन्धतो जीवेशादिप्रतीतिः। अत एव, आभास एव चेति सूत्रेण व्यासैर्जीवस्याभासत्वमुक्तम्। यथा रज्जौ सर्पाभासस्तथा ब्रह्मणि जीवाभास इति। अत एव, वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यमिति श्रुतौ वाचैवारभ्यते विकारो घटादिर्न वस्तुतः सदित्यर्थः। 'यदिदं मनसा वाचा चक्षुर्भ्यां श्रवणादिभिः। नश्वरं गृह्यमाणं च विद्धि मायामनोमयम् । इति श्रीभगवद्वाक्येनापि मायिकत्वेन नश्वरत्वसिद्धेरतो भ्रान्त्यैव जगत्प्रतीतिरतो ब्रह्मण्यपि कर्त्तृत्वादिकं भ्रान्तिरेव ।

ननु विश्वतश्चक्षुः, सहस्रशीर्षा, सम्बाहुभ्यां धमति, प्रज्ञानघनः, विश्वस्य कर्त्ता भुवनस्य गोप्ता, जन्माद्यस्य यतः, कर्त्ता कारयिता हरिः, अहं सर्वस्य प्रभव इत्यादिश्रुतिसूत्रस्मृतिभिः साकारत्वं कर्तृत्वं च सिद्धत्वादितिचेन्न। शुद्धब्रह्मणो दुर्ज्ञेयत्वेन शाखारुन्धतीन्यायेनोपासनार्थं सधर्मकत्वं ब्रह्मण्यारोप्य पश्चान्निषेधकतया कर्त्तृत्वाद्यपेतं ब्रह्म बोधयति । उपासनया हि चित्तशुद्धौ सत्यामद्वैतस्फूर्त्याऽविद्यानिवृत्त्या ब्रह्मैव भवतीति तेषां मतम् ।

तन्न । यदिदं किञ्च तत् सत्यमित्याचक्षते । तत्सत्यम् । सर्वं

खल्वित्यादि। तदेतदक्षयं नित्यं जगन्मुनिवराखिलमित्यादिवाक्याद्युक्तवाक्यैश्च जगतः सत्यत्वं ब्रह्मत्वं चोक्तमिति जगतो मायिकत्वे मानाभावात्। प्रत्यक्षैकादशशाखासु च मिथ्यात्वकथनाभावात्। कार्यकारणयोः साजात्याद् ब्रह्मणः कर्त्तृत्वं यतो वेत्यादि, जन्माद्यस्येत्यादिवाक्यैः प्रतिपादितम्। असतोऽज्ञानस्य कारणत्वाभावात्। नचासतः स्वप्नस्य शुभाशुभफलसूचकत्वेन कारणत्वमिति वाच्यम्। जागरितदशायां दृष्टश्रुतस्य मननसम्बन्धेन स्वप्नदर्शनादतः सत एव कारणत्वम्। अन्यथा स्वाप्निकभोजनाद् वास्तविकी तृप्तिः स्यात्। निष्कलमित्यादिश्रुतौ लौकिकक्रियाकलासत्त्वादिगुणजन्यशरीरविकारीन्द्रियजडधर्मनिषेधपरत्वेन कथनात्। सामान्यनिषेधे तु एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्तीतिकलाया, आसीनो दूरं व्रजतीत्यादौ क्रियाया, एको देवः सर्वभूतेषु गूढ इत्यादिगुणानाम्, अपाणिपादो जवनो ग्रहीतेति, उताऽमृतत्वस्येशान इत्युक्त्वा सर्वतः पाणिपादकथनादन्यथाशरीरस्याविकारीन्द्रियाणाम्, अणोरणीयान्महतो महीयानित्यादावणुत्वादिबोधकानां विरोधापत्तेः। अथात इत्यत्रेतिशब्दः प्रकारवाची। तेन लौकिकप्रकारकं न भवतीत्यर्थः। व्यासचरणैः, प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूय इति सूत्रं पठितम्। तत्र निषेधवाक्यैरेतावत्त्वस्थूलत्वादिकं प्रकृतं लौकिकं प्रतिषेधति, न तु ब्रह्मधर्मान्। ततो ब्रवीति च भूय इति। यत्र वाक्ये प्रकरणे वा निषेधति तत्रैव पुनस्तद्धर्ममाह श्रुतिः। अस्थूलाद्युक्त्वा, एतस्यैवाऽक्षरस्य प्रशासने गार्गि द्यावाभूमी विधृते तिष्ठत इत्यर्थः। यदीदं सूत्रं मूर्त्तामूर्त्तनिषेधपरं तर्हि प्रकृतैतावत्पदयोरन्यतरवैयर्थ्यापातः। अथवा प्रकृते ब्रह्मणि यदेतावत्त्वं, तत् प्रतिषेधतीति। इन्द्रो मायाभिरिति तु, 'रूपं रूपं प्रतिरूपो बभूव यत्तस्य रूपं प्रतिचक्षणाय। इन्द्रो मायाभिः पुरुरूप ईयते' इति मन्त्रः। तत्र माया ज्ञानं प्रति करणं, न तु ब्रह्मणो बहुस्वरूपत्वे। अन्यथा पूर्वार्द्ध एव मायाभिः पुरुरूपो बभूवेति वदेत्। यद् वाचेत्यस्यार्थस्तु, यद् वागाद्यगम्यं तत्। प्रेरयितृ ब्रह्म विद्धि, नेदं वागादि। तर्हि कथं तस्य ज्ञानं तत्राह। यदिदं श्रुतिप्रसिद्धम् उपासते, वैदिका इति शेषः। यद्युपास्यस्याब्रह्मत्वमभिप्रेयात् पुनरिदङ्कारं न ब्रूयात्। नेदं यदुपासत इत्येतावतैव सिद्धेः। यद्यत् साकृति तत्तन्नश्वरमित्यनुमाने

तु जन्यत्वात्प्राकृताद्वेति हेतोरवश्यं वाच्यत्वेनेश्वरे तदभावात् । अज्ञानं चेत्यादिकथनं त्वपेशलम् । तदज्ञानं ब्रह्मणि जीवे वा । आद्ये ब्रह्मण आधारत्वापत्तौ सविशेषत्वापत्तिः । अज्ञानित्वापत्तिश्च । जीवस्य त्वज्ञानरूपत्वमेवेति । न द्वितीयः । जलादौ स्वच्छाधारे रूपवत्प्रतिबिम्बदर्शनेन मायाया मलिनत्वेन मिथ्यात्वेन ब्रह्मणश्चारूपत्वेन प्रतिबिम्बासम्भवः । अन्यथा वायोरपि काष्ठे स्यादित्यादि विद्वन्मण्डने बहुशो निरूपितम् । आकाशस्य तु न प्रतिबिम्बः, किन्तु प्रभामण्डलस्य । किञ्च पञ्चीकरणप्रक्रिययाऽऽकाशे पृथिव्यंशसत्त्वेन रूपवत्तया प्रतिबिम्बत्वोपपत्तेः । वायौ त्वनुद्भूतरूपवत्त्वेन रूपवत्त्वाप्रतीतेः । एकधा बहुधा चैव दृश्यते जलचन्द्रवदिति दृष्टान्त एकस्य नानात्वे, न तु प्रतिबिम्बत्वे । किञ्च । प्रतिबिम्बपक्षे ब्रह्मणो बिम्बत्वापत्तौ सविशेषत्वापत्तेः । आभास एव चेति सूत्रं त्वनाचारिब्राह्मणे यथा ब्राह्मणाभासस्तथा तिरोहितानन्दांशे ब्रह्माभास इतिबोधकम् । रज्जुसर्पदृष्टान्तोऽपि न सम्भवति । अन्यत्र वास्तविकदृष्टसर्पस्य दृश्ये रज्जौ तृतीयस्य द्रष्टुः सर्पाभासः । अत्र जगतो वास्तविकस्याभावाद् ब्रह्मणश्चादृश्यत्वेन द्रष्टुश्चाभावेन वैषम्यात् । किञ्च, घटपटाद्यात्मनाभासे यथा रज्जौ नाश्वाकाराभासः, किन्तु सर्पाभास एव तत्सादृश्यात् । एवं ब्रह्मण्यपि तादृशत्वापत्तौ साकारत्वापत्तिः । गन्धर्वनगरादिष्वपि वायुसम्बन्धेन जायमानत्वेनात्रान्यस्याभावान्नात्र दृष्टान्तसम्भवः । वाचारम्भणवाक्यं तु ब्रह्माभिन्नत्वबोधकमित्यग्रे वक्ष्यते । यदिदमितिश्लोके तु चक्षुराभिर्नश्वरं गृह्यमाणं यत् तन्मायामनोमयं विद्धीत्यन्वयेन स्वाप्निकस्यैव नश्वरत्वेन तस्यैव मायिकत्वात् । अत एव, मायामात्रं तु कार्त्स्न्येनानभिव्यक्तस्वरूपत्वादिति व्यासपादैः स्वाप्निकप्रपञ्चस्य मायिकत्वमुक्तम् । अत एव च, वैधर्म्याच्च न स्वप्नादिवदित्यनेन जगतः स्वप्नादिवन्निषेधेन जगतो मायिकत्वाभाव उक्तः । श्रीप्रभुचरणैस्तु, यदिदं यादवकुलं चक्षुरादिभिर्गृह्यमाणं तन्मायिकं नश्वरं विद्धि । विप्रशापः कथमभूद् वृष्णीनामिति प्रश्नोत्तरप्रकरणे निरूपितत्वादित्युक्तम् । अतो न केनापि वाक्येन मायिकत्वम् । किञ्च, मायिकत्वं पुराणेषु वैराग्यार्थमुदीर्यत इति श्रीमदाचार्यचरणैरुक्तम् । उपासनार्थं धर्मारोप इत्यादिकमप्ययौक्तिकम् । न हि शाखावत् प्रत्यक्षं ब्रह्म, यस्मि-

अरुन्धतीव धर्मा आरोप्यन्ते । किञ्चोपहितस्य त्याज्यत्वेन पुत्रादि-वत् तत्त्यागापत्तिः । किञ्च, न मिथ्याज्ञानेन चित्तशुद्धिः । अन्यथा प्रापञ्चिकज्ञानेनाऽपि चित्तशुद्धिः स्यात् । किञ्च, जीवन्मुक्त्युच्छेदापत्तिः । ज्ञानोदयेऽविद्याशरीरनिवृत्तिः । किञ्च, प्रवेशानुपपत्तिः । जीवहानिरेव मोक्षः । जीवस्य मायिकत्वेन मायानाशे तन्नाश इति दिक् ॥ २२ ॥

मायामूलत्वमस्य मतस्यातो मायाजन्याजन्यत्वे पृष्ट्वोभयं दूषयन्ति ।

किञ्च जन्या त्वजन्या वा माया ऽऽद्ये जनको हि कः ।
अन्याभावात्तु ब्रह्मैव सविशेषत्वमागतम् ॥ २३ ॥
द्वितीये त्वद्वैतभङ्गः कादाचित्कं त्वसङ्गतम् ।
आत्मैवेदमग्र आसीदित्यादिश्रुतिबाधतः ॥ २४ ॥

किञ्चेत्यादि * आद्ये जन्येति पक्षे । ब्रह्मैव जनक इति चेत् तर्हि भद्रं, सविशेषत्वं ब्रह्मण्यागतमित्यर्थः ॥ २३ ॥ २४ ॥

अनादित्वे तु सान्तत्वमिति पक्षोऽप्यसङ्गतः ।
अनादित्वे त्वनन्तत्वं मायाया इति निश्चयात् ॥ २५ ॥

यद्यदनादि तत्तदनन्तम् । यथा ब्रह्मेत्यनुमानेन मायाया अप्यनन्तत्वापत्तेः । अथानादिः सान्तः प्रागभाव इति, नायं नियम इति चेन्न । प्रागभावखण्डनस्योपपादितत्वेन न व्यभिचारः ॥ २५ ॥

एवं तन्मतं खण्डयित्वा प्रकृतमाहुः ।

एतन्मते सुनिष्पन्नं साङ्कर्यं कार्यकारणे ।
तन्निवृत्त्यर्थमाचार्यैः पदं शुद्धं विशेषतम् ॥ २६ ॥

एतन्मतइति * शङ्कराचार्यमत इत्यर्थः । अविद्यावच्छिन्नचैतन्यं कार्यं, मायावच्छिन्नं चैतन्यं कारणमिति साङ्कर्यमित्यर्थः । तन्निवृत्त्यर्थं साङ्कर्यनिवृत्त्यर्थम् । अद्वैतपदे विशेष्ये विशेषणतयाऽन्वितमित्यर्थः ॥ २६ ॥

एवं शुद्धपदप्रयोजनमुक्त्वा समासमाहुः ।

शुद्धाद्वैतपदे ज्ञेयः समासः कर्मधारयः ।
अद्वैतं शुद्धयोः प्राहुः षष्ठीतत्पुरुषं बुधाः ॥ २७ ॥

शुद्धाद्वैतपद इत्यादि * । *कर्मधारय इति* शुद्धं च तदद्वैतमिति विग्रहः । नचाद्वैते सति साङ्कर्याभावः स्पष्ट एवेति शुद्धपदमपार्थमिति वाच्यम् । परेषां मते पूर्वं साङ्कर्यं, ततोऽद्वैतम् । अस्मन्मते तु सदैव शुद्धत्वमिति ज्ञेयम् । अत एव स्पष्टतया बोधाय षष्ठीतत्पुरुषमाहुः । अत्र शुद्धे कारणे कार्यस्याद्वैतमिति पक्षे कार्येऽशुद्धत्वम् । अयं दोषः, शुद्धेन ब्रह्मणाऽद्वैतमिति तृतीयातत्पुरुषेऽपि । शुद्धाभ्यामद्वैतमिति पक्षे तार्तीयोऽपेक्षितः। शुद्धाभ्यां नामरूपाभ्यामिति समासे कारणेऽशुद्धत्वम् । एवं शुद्धस्य कार्यस्येति पक्षे कारणेऽशुद्धत्वं प्राप्तम् । एवं शुद्धानां पदार्थानामद्वैतमित्यत्रापि ॥ २७ ॥

मायासम्बन्धरहितं शुद्धमित्युच्यते बुधैः ।
कार्यकारणरूपं हि शुद्धं ब्रह्म न मायिकम् ॥ २८ ॥

मायासम्बन्धरहितमिति *। नचाहन्ताममताऽध्यासस्य मायाकृतत्वेन मायासम्बन्धस्य स्वमतेऽपि सम्भव इति वाच्यम् । स्वमते मायाया अपि, मम मायेति वाक्याद् भगवच्छक्तित्वेन तस्याश्चाभिन्नत्वेन न परमतवन्मायासम्बन्धः । किञ्चाध्यास एव मायिको, न जीवः । जीवस्य मायिकत्वं तु पूर्वं निरस्तम् ॥ २८ ॥

इति ब्रह्मविदां हार्दं शुद्धाद्वैतं श्रुतेर्मतम् ।
तत्रोत्तमा मध्यमाश्च कनिष्ठा ह्यधिकारिणः ॥ २९ ॥

इतीति * । * श्रुतेरिति * जातावेकवचनम् । नृसिंहतापिन्यां, योनित्वं ब्रह्मणः समर्थयित्वा, सर्वं सर्वमयं सर्वे जीवाः सर्वमयाः सर्वावस्थासु तथाऽप्यल्पा इत्युक्तम् । तथापि सर्वरूपत्वेऽप्यल्पा अणुपरिमाणाः । अग्रे चेश्वरः सर्वभूतादीनि सृष्ट्वा प्रविश्यास्त इति निरूप्याग्रे, सन्मात्रो नित्यः शुद्धो बुद्धः सत्यो मुक्तो निरञ्जनो विभुरद्वय आनन्दः परः प्रत्यगेकरसः प्रमाणैरेतैरवगत इति वाक्यं पठितम् । अनेन परमात्मनः शुद्धत्वमुदितम् । अग्रे च जगतोऽविद्यायाश्च सद्रूपत्वेन ब्रह्माभेदो, ब्रह्मण्यविद्याभावो निरूपितः। उपसंहारे,

विष्णुरीशानो ब्रह्मान्यदपि सर्वं सर्वगमिति वाक्यं पठितम्। यत् सर्वगं कारणभूतं ब्रह्म तदेव विष्ण्वादिरूपं घटादिरूपं चेतनाचेतनाऽऽत्मकमित्यर्थः। एतदग्रे सर्वस्य जगतः शुद्धात्मत्वाय वाक्यं पठितम्। सर्वमत एव, शुद्धोऽबाध्यस्वरूपो, बुद्धः सुखरूप आत्मेति। एवञ्च श्रुतिषु सर्वस्य शुद्धाद्वयत्वं स्पष्टमतः श्रुतेर्मतमित्यर्थः ॥२९॥

तेषां प्रतीतिः प्रथमस्कन्धे तु श्रीहुताशनैः।
इदं हि विश्वमित्यत्र सुबोधिन्यां निरूपिता ॥ ३० ॥

तेषामिति * अधिकारिणामित्यर्थः। * श्रीहुताशनैः श्रीमदाचार्यचरणैः। * इदं हि विश्वमित्यत्रेति * 'इदं हि विश्वं भगवानिवेतरो यस्मिञ्जगत्स्थाननिरोधसम्भवाः। तद्धि स्वयं वेद भवाँस्तथापि वै प्रादेशमात्रं भवतः प्रदर्शितम्' इति श्लोक इत्यर्थः। अत्रेदं विश्वं भगवानित्युत्तमस्य प्रतीतिः। इदं विश्वं भगवानिवेति मध्यमस्य। तत्र यथा भगवान् सच्चिदानन्दरूपस्तथा जगदिति। इदं विश्वं, भगवानितरो जगत्कारणत्वादिति कनिष्ठस्येति श्लोकार्थः ॥ ३० ॥

सर्वं ब्रह्मैव तत्राद्ये द्वितीये भगवान् यथा।
तथा विश्वमिदं सर्वं ब्रह्मकार्यं निजेच्छया ॥ ३१ ॥
कार्यरूपेण भेदो हि न भेदः कारणात्मना।
भेदसह्यस्त्वभेदोऽत्र तादात्म्यं परिकीर्त्तितम् ॥ ३२ ॥
तृतीये भगवान् भिन्नो जगतः कर्तृतः स्फुटः।
इति द्वैतप्रतीतिस्तु श्रुतिबाधान्न गृह्यते ॥ ३३ ॥

तत्रेति * अधिकारिष्वित्यर्थः। आद्ये * उत्तमाधिकारिणि। सर्वं भगवानेवेति सर्वत्र भगवत्स्फूर्त्तिः सदेत्युत्तमाधिकारिणः प्रतीतिः। द्वितीये * मध्यमेऽधिकारिणि ॥ ३१ ॥ ३२ ॥

तृतीये * कनिष्ठेऽधिकारिणि। यथा घटोत्पादकः कुलालो घटतो भिन्नस्तथा भगवाञ्जगतो भिन्न इत्यर्थः। * श्रुतिबाधादिति * सर्वं खल्विदं ब्रह्म, ऐतदात्म्यमिदं सर्वम्। आत्मैवेदं सर्वम्। पुरुष एवेदं सर्वं यद् भूतं यच्च भाव्यम्। द्वितीयाद्वै भयं भवति। य एत-

स्मिन्नुदरमन्तरं कुरुतेऽथ तस्य भयं भवति, योऽन्यां देवतामुपास्तेऽन्योऽसावन्योऽहमस्मि न स वेद यथा पशुरित्यादिश्रुतिबाधादित्यर्थः ॥ ३३ ॥

शुद्धाद्वैतविदां या हि प्रतीतिः सोत्तमा मता ।
भेदाभेदप्रतीतिस्तु मध्यमानां प्रकीर्त्तिता ॥ ३४ ॥

शुद्धाद्वैतविदामिति * सर्वत्र भगवत्स्फूर्त्त्या विषयान्तरानुसन्धानानुदयादिति भावः । * भेदाभेदप्रतीतिरिति * कार्यरूपेण भेदः कारणात्मनाऽभेद इति प्रतीतिरित्यर्थः । * मध्यमानामिति * अधिकारिणामित्यर्थः ॥ ३४ ॥

अतो हि मध्यमः पक्षः शुद्धाद्वैतानुरोधतः ।
बोधाय बहु सन्दर्भे गोस्वामिपुरुषोत्तमैः ॥ ३५ ॥

शुद्धाद्वैतानुरोधत इति * । कार्यत्वेन कारणत्वेन भेदेऽपि ब्रह्मत्वं न व्यभिचरतीति शुद्धाद्वैतानुरोधस्तस्मादित्यर्थः । *सन्दर्भ इति* ग्रन्थ इत्यर्थः । वाक्यसन्दर्भो ग्रन्थ इति लक्षणात् ॥ ३५ ॥

श्रीमदाचार्यचरणैर्यत्र कुत्रापि दर्शितः ।
निम्बार्कभास्कराचार्यौ भेदाभेदनिरूपकौ ॥ ३६ ॥

श्रीमदाचार्यचरणैरिति * सुबोधिन्यादिषु यत्रकुत्रापि दर्शित इत्यर्थः । ननु भेदाभेदपक्षस्तु निम्बार्कभास्कराणामिति शङ्कायां स्वस्माद्भिन्नत्वं समर्थयन्ति * निम्बार्केत्यादि * ॥ ३६ ॥

तत्राद्यानां वास्तवः स भास्कराणामुपाधितः ।
तत्राद्ये वास्तवो भेदो माध्वाचार्यवदेव हि ॥ ३७ ॥

तत्रेति * उभयोर्मध्य इत्यर्थः । आद्यानां * निम्बार्काणाम् । स *भेदाभेदः । * उपाधित इति * उपाधिकृत इत्यर्थः । *तत्रेति* भेदाभेदपक्ष इत्यर्थः । आद्ये * निम्बार्कभेदाभेदे । तत्राभेदो भेदश्चेति कोटिद्वये भेदो वास्तवः । * माध्वाचार्यवदिति दृष्टान्तेन माध्वाचार्यस्य मतमनूदितम् ॥ ३७ ॥

विभिन्नांशाः सदा जीवा न स्वांशा इति निश्चयः ।
अभेदश्चित्त्वसाधर्म्यादेवं तेषां मतस्थितिः ॥ ३८ ॥

माध्वाचार्याणां मते अंशा द्विविधाः । करचरणादिवत् स्वांशाः । पुत्रादिवद् विभिन्नांशाः । तत्र स्वांशा मत्स्यादयः । विभिन्नांशा जीवाः । अंशत्वं नाम राश्येकदेशत्वम् । माध्वानुयायिवनमालिदासस्तु, तद्भिन्नत्वे सति तत्सदृशत्वमंशत्वम् । यथा चन्द्रमण्डलाच्छतांशो गुरुमण्डलः । तथांऽशो नानाव्यपदेशादित्यादिष्वित्याह । तेन जीवेषु न कदापि ब्रह्मत्वमिति । तद्वन्निम्बार्काचार्याणाम् । तर्हि कथं भेदाभेदस्तत्राहुः * अभेद इति * । * चित्त्वसाधर्म्यादिति * यथा मुखं चन्द्र इत्यत्राह्लादकत्वादिधर्मसाम्यान्मुखे चन्द्रारोपान्मुखं चन्द्र इति व्यवहारस्तथा चित्त्वसाधर्म्याज्जीवो ब्रह्मेति व्यवहार इति भावः । तेषां * निम्बार्काणाम् ॥ ३८ ॥

कनिष्ठा सा प्रतीतिस्तु नास्मन्मतमपेक्षते ।
अभेदो वास्तवस्स्वांशा जीवा इति निजे मते ॥ ३९ ॥

कनिष्ठाधिकारिप्रतीतिरतः कनिष्ठेत्यर्थः । निम्बार्कभेदाभेदप्रतीतिस्त्वित्यर्थः । अस्मन्मतं शुद्धाद्वैतमतम् । एवं निम्बार्काणां भेदाभेदं निरूप्य स्वमते प्रतीयमानं भेदाभेदं निरूपयन्ति * अभेदो वास्तव इति * स्वांशा ब्रह्मांशाः । तेनांशांशिनोरभेदः । स च वास्तव इत्यर्थः ॥ ३९ ॥

भेदः कार्यतया जातः क्रीडार्थं तु हरीच्छया ।
पश्चाल्लये कारणे हि स्थितिर्दृष्टा यथा मृदि ॥ ४० ॥

क्रीडार्थमित्यादि * । एकाकी न रमते स द्वितीयमैच्छत्, एकोऽहं बहु स्यामित्यादिश्रुतेः । क्रीडार्थमात्मन इदं त्रिजगत् कृतं ते स्वाम्यं तु तत्र कुधियः पर ईश कुर्युरिति वाक्यात्, क्रीडाभाण्डमिदं विश्वमिति वाक्याच्च । * लय इति * तिरोभावे । कारणे कार्यस्येति शेषः । 'त्वय्यग्र आसीत्त्वयि मध्य आसीत्त्वय्यन्त आसीदिदमात्मतन्त्रे । त्वमादिरन्तो जगतोऽस्य मध्यं घटस्य मृत्स्नेव परः पर-

स्मादु' इत्यष्टमस्कन्धे अमृतमन्थने ब्रह्मवाक्यात् । तदेव दृष्टान्तमुपपादयन्ति * यथा मृदीति * ॥ ४० ॥

पूर्वावस्था तु मृद्रूपा घटावस्था ततो भवत् ।
घटोऽपि मार्त्तिकारूपो लये पश्चाच्च मृत्तिका ॥ ४१ ॥

पूर्वावस्थेति * कारणावस्थेत्यर्थः । ततः कारणरूपान्मृदः । ननु घटावस्थायां कथमद्वैतं तत्राहुः *घटोऽपीति*। एवञ्च तिसृष्वप्यवस्थासु मृदेवैवं जगद् ब्रह्मैवेति न द्वैतसञ्चारः। अनेन, वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यमिति श्रुत्युक्तं संगृहीतम् । श्रुत्यर्थस्तु। यो विकारः पृथुबुध्नोदरादिः स वाचारम्भणं, वाचिकक्रियात्मको न तु कारणाद् व्यक्तिभेदापादकः ।यथा सुप्त उत्थिते उपविष्टे च पुरुषेऽवयवविन्यासभेदो न पुरुषभेदः । अतो नामधेयङ्कारणस्यैव नामधेयं, कारणमेव हि तत्तदर्थक्रियानिष्पत्त्यर्थं घटशरावादिनाम्ना व्यवह्रियत इति कारणादभिन्नं कार्यम् । तदाह, मृत्तिकेत्येव सत्यम् । कारणरूपेण सत्यम् । न तु मिथ्या । अन्यथा कार्याभावेन ब्रह्म कस्य कारणं भवेत् । कारणाभावे कारणप्रतिपादिका यतो वेत्यादिश्रुतयो विरुध्येरन् । यदि विकारे वाङ्मात्रतामभिप्रेयाद्दु वाचारम्भणं विकारो मृत्तिकैव सत्यमिति वदेत् । तावतैव कार्यस्य मिथ्यात्वसिद्धेः । वदति तु नामधेयमितिपदाभ्यां घटितम् । तेन कारणादभिन्नं कार्यमित्यभिप्रायादुक्त एवार्थः । किञ्च, वाचारम्भणमिति वाक्यमुपक्रम्याग्रे, कथमसतः सज्जायेतेति, सदेव सौम्येदमग्रमासीदिति पठितम् ।अत एव सूत्रकार इमामेव श्रुतिं विषयीकृत्य, तदनन्यत्वमारम्भणशब्दादिभ्य इत्यवदत् । अर्थस्तु, वाचारम्भणमित्यादिशब्देभ्यस्तदनन्यत्वं कारणादभिन्नत्वं बोध्यत इति। अत्राऽऽदिपदेनेतिशब्दो, नामधेयपदं, सदेवेत्यादीनि वाक्यानि संगृह्यन्ते ॥ ४१ ॥

तदाहुः ।

कार्यकारणयोरैक्यं स्वमते न परे मते ।
नैम्बार्के नेदृशो मार्ग इति बोद्धव्यमञ्जसा ॥ ४२ ॥

कार्यकारणयोरित्यादि * । परे * स्वमताद्भिन्ने । शङ्कराचार्या-

स्तावत् कार्यकारणयोरनन्यत्वं कार्यस्य मिथ्यात्वाश्रयेण कथयन्ति । तेषां कार्यकारणयोरनन्यत्वं न सिध्यति । सत्यमिथ्ययोरभेदानुपपत्तेः । अत्र सर्वमतोपन्यासः, खण्डनं च विस्तरभिया नोच्यते । *नैम्बार्के इति * निम्बार्कस्येदं नैम्बार्कं मतं, तस्मिन्मत इत्यर्थः । ईदृशः * जगद्ब्रह्मणोरैक्यबोधको मार्गः ॥ ४२ ॥

भास्कराचार्यमतमाहुः ।

> सोपाधिको भास्करे हि स्वस्माद्भिन्नस्तु सर्वथा ।
> भेदपक्षे तु जीवानां सुखदुःखादिदानतः ॥ ४३ ॥

सोपाधिक इति * तदनन्यत्वाधिकरणे वाचारम्भणवाक्यव्याख्याने कारणमेव हि कार्यात्मनाऽवतिष्ठते मृत्समन्वितं हि त्रिष्वपि कालेषु कार्यं, नाश्वमहिषवद्देशतः कालतो वा व्यतिरिक्तमुपलभ्यते । कारणस्यावस्थामात्रं व्यतिरिक्ताव्यतिरिक्तम् । शुक्तिरजतवदागमापायधर्मत्वात् । अनृतमनित्यमिति च व्यपदिश्यते । तदर्थमेव मृत्तिकेत्येव सत्यमित्युक्तम् । भेदस्त्वौपाधिक इति । तस्माद्वा एतस्मादात्मन आकाशः सम्भूत आकाशाद्वायुः वायोरग्निरग्नेराप इत्यादिक्रमेण । जीवस्योत्पत्तेरनुक्तत्वाद्, अजो नित्यः शाश्वतोऽयं पुराणः, अविनाशी वा अरेऽयमात्मेत्यादिश्रुतीनामन्यथा कर्त्तुमशक्यत्वेन चोपाधिकृतभेदाभिप्रायेण विस्फुलिङ्गश्रुतिर्विपरिणेयेत्यङ्गीकृत्याणुत्वं संसारदशायां लिङ्गशरीराभिप्रायेण मनसो लिङ्गस्य चाणुत्वाद्, वस्तुतो व्यापक इति चाङ्गीकृत्य जीवस्यांशत्वम् उपाध्यवच्छिन्नत्वेनाङ्गीकृतम् । तथाच ब्रह्मणो निरवयवत्वमिति । यथाग्नेरिति श्रुतौ दृष्टान्तकथनेन यथाऽऽकाशस्य पार्थिवाधिष्ठानावच्छिन्नं कर्णच्छिद्रं तथा जीवोऽपि ब्रह्मणो भिन्नाभिन्नस्वरूपम् । अतस्तस्य भिन्नरूपमौपाधिकमभिन्नरूपं तु स्वाभाविकमित्यादिप्रतिपादितं भास्कराचार्यैरतस्तेषां मते सोपाधिको भेदाभेद इत्यर्थः ।

स्वमतादतिरेकमाहुः * स्वस्मादिति * स्वमते जीवस्याणुत्वं वास्तवम् । एषोऽणुरात्मा चेतसा वेदितव्य इति श्रुतेः । लिङ्गशरीराभिप्रायकथनेन लक्षणाङ्गीकारे गौरवाज्जीवाभावाश्च । एष महानज आत्मेत्यादिव्यापकश्रुतीनां ब्रह्मप्रकरणस्थत्वादत एव, नाणुरतच्छ्रुतेरिति चेन्नेतराधिकारादिति तत्त्वसूत्रं सङ्गतं भवति । सूत्रार्थ-

स्तु, जीवोऽणुर्न अतच्छ्रुतेः। अणुत्वाभावस्य महत्त्वस्य श्रुतेः। एष महानित्यादिनेति चेन्नेतराधिकारात्। इयं श्रुतिर्ब्रह्माधिकारे पठिता तस्मादित्यर्थः। विस्फुलिङ्गश्रुत्या जीवस्योद्गम एवोच्यते, नोत्पत्तिरिति सिद्धान्तादतो नानित्यतेति। नाप्यजो नित्य इत्यादिश्रुतिविरोधः। आकाशादिसृष्टौ तु क्रमेणोत्पत्तिः। तत्राप्यन्नात् पुरुषः, स वा एष पुरुषोऽन्नरसमय इत्युक्तेर्जीवस्य प्रादुर्भावोक्तेः। तच्छब्देनोपादानाद् विस्फुलिङ्गन्यायेन तु सर्वस्योत्पत्तिरेकरीत्या। उपाधिकल्पनायां प्रमाणाभावः। व्यापकत्वं तु ब्रह्मत्वेनोत जीवत्वेन?। आद्ये शङ्करमतप्रवेशः। द्वितीये नैयायिकमतप्रवेशेनौपाधिकभेदस्य निरासेन स्वमतप्रच्युतिः। किञ्च व्यापकत्वे देवदत्तेनाम्रे भक्षिते यज्ञदत्तस्यापि तद्रसानुभवापत्तिः। आत्ममनःसंयोगकारणस्य तत्रापि सत्त्वात्। किञ्च जीवब्रह्मणोर्व्यापकत्वे नियम्यनियामकश्रुतिविरोध इति दिक्।

नचाणुत्वे सकलशरीरचैतन्यानुपलम्भः। प्रभावदुपपत्तेरित्यादि पूर्वमुदितम्। स्वमते भेदस्तु सुवर्णखण्डवदंशांशिभावेन स्पष्ट एवेति पूर्वापरावलोकनेन महद्वैलक्षण्यमत आहुः। * सर्वथेति *।

एवं भास्करमतं दूषयित्वा वास्तविकभेदे दूषणमाहुः। * भेदपक्षे त्विति *। भेदपक्षे तावदपि वा तमादेशमप्राक्षो येनाश्रुतं श्रुतं भवत्यविज्ञातं विज्ञातं भवति सौम्य यथैकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं प्रतिज्ञातमित्यादिषु श्रुतिषु सर्वविज्ञानप्रतिज्ञा मृत्पिण्डदृष्टान्तश्च विरुध्यते॥ ४३॥

किञ्च।

वैषम्यनैर्घृण्यसंज्ञे दूषणे द्वे परे स्थिते।
अनादिकर्म चाश्रित्य समाधाने त्वनीशता॥ ४४॥

कस्यचित् सुखं कस्यचिद् दुःखमिति वैषम्यम्। परक्लेशाभावकरणसामर्थ्यवत्त्वे तदकरणं नैर्घृण्यम्। परे * ब्रह्मणि। ननु स्वार्जितकर्मणा प्राप्तं सुखं दुःखं भुज्यते। उत्तरोत्तरकर्मणः पूर्वं पूर्वं कर्म निमित्तम्। कर्मणश्चानादित्वान्नेश्वरे दोषप्रसक्तिरतआहुः। * अनादिकर्मेति *। कर्मण एव फलदातृत्वे ईश्वरस्याप्रयोजनतयाऽनीश्वरवादापत्तिः। कर्मणो जडत्वेन तदनुसारेण फलभोक्तृत्वमीश्व-

ऽङ्गीक्रियते तर्हीश्वरस्य कर्माधीनत्वेन स्वातन्त्र्याभावात् कर्तृत्वानुपपत्तावीशत्वासिद्धिः । यत्र तु कर्मानुसारेण फलभोक्तृत्वमुक्तं तत्रापि कर्मकारयितृत्वमीश्वरस्यैव । तथाह श्रुतिः । तमेव साधु कर्म कारयति यमेभ्यो लोकेभ्य ऊर्ध्वमुन्निनीषति । तमेवासाधु कर्म कारयति यमेभ्यो लोकेभ्योऽधोनिनीषतीति । एतेन साधुकारी साधुर्भवति । पापकारी पापो भवतीतिश्रुतौ भगवत्प्रेरणया साधुपापकर्तृत्वं बोध्यम् । तमेवेतिश्रुत्युनुरोधात् । अत एव, कर्त्ता शास्त्रार्थवत्वादितिसूत्रेण विध्यादिबोधितकर्मकर्तृत्वं जीवस्य । विध्यादिशास्त्रार्थो जीवोद्देशेन प्रवृत्त इति कर्तृत्वं जीवस्योक्त्वा, स्वतो वा भगवत्प्रेरणया वेति संशये, परात्तु तच्छ्रुतेरितिसूत्रेण परादीश्वरात् तस्य कर्तृत्वस्य श्रुतेरिति समाधानं सङ्गच्छते । तस्मात्, कर्माश्रयत्वेन समाधाने त्वनीशत्वापत्तिः । ॥ ४४ ॥

अत्र सर्वेषां मतस्य दुष्टत्वेन तेषां नामान्याहुः ।

अत्रापि शाङ्कराः शैवा माध्वा रामानुजादयः ।
निम्बार्का भास्करा भिक्षुर्येऽन्ये ते दोषसंश्रिताः ॥ ४५ ॥

अत्रापीति * कर्माश्रयत्वेन परिहारेऽपि । शबलस्य ब्रह्मणो दोषपरिहाराय कर्माश्रयेण समाधानं शङ्कराचार्यैः कृतम् । शैवो रामानुजमततस्करो विशिष्टाऽद्वैतवादी । तस्य मतं त्वग्रे विवेच्यम् । भिक्षुमतमप्यग्रे । * दोषसंश्रिता इति * । ईश्वरेऽनीश्वरापत्तिरूपदोषविशिष्टा इत्यर्थः ॥ ४५ ॥

ननु तर्हि सिद्धान्तेऽपीमौ दोषौ स्थितौ, नेत्याहुः ।

आत्मसृष्टेर्न वैषम्यं नैर्घृण्यं चापि विद्यते ।
श्रीमदाचार्यचरणैर्निबन्ध इदमीरितम् ॥ ४६ ॥
श्रीमत्प्रभुवरैर्विद्वन्मण्डनेऽपि निरूपितम् ।
रमणार्थमिदं विश्वमुच्चनीचादिभावतः ॥ ४७ ॥
आत्मरूपं चकाराऽतो हरिर्यस्मान्न दूषणम् ।
शक्तिशक्तिमतोर्भेदाभेदो यः स न बाधकः ॥ ४८ ॥

तत्र भेदो न चैवास्ति शक्तेर्ब्रह्मत्वनिश्चयात् ।
भिन्नत्वे तु जडत्वं स्याद् भेदो यो बोधनाय सः ॥ ४९ ॥

आत्मसृष्टेरिति * । तदात्मानं स्वयमकुरुतेतिश्रुत्या ब्रह्मैव जगदाकारेण स्वेच्छयैव रमणार्थमुच्चनीचादिभावेन जातमिति बोधितमतोऽभिन्नत्वान्न वैषम्यं, नापि नैर्घृण्यमित्यर्थः । निबन्धे * शास्त्रार्थे ॥ ४६ ॥

विद्वन्मण्डने इति * । तत्र हि पूर्वं जीवानामानन्दादितिरोधाने मिथ्याज्ञानादिप्रसक्तावुपस्थितहान्यकृताभ्यागमदोषपरिहाराय स्वेच्छाया एव हेतुत्वमुक्त्वाऽन्यथा जगत्स्थितिसंहारेऽपीमौ दोषौ प्रसज्येयातामित्युक्त्वैतत्साधकयुक्तीर्विस्तरशो निरूप्य, कृतप्रयत्नापेक्षस्तु विहितप्रतिषिद्धावैयर्थ्यादिभ्य इति सूत्रमुपन्यस्य, एकोऽहं बहु स्यामिति प्रपञ्चे रमणेच्छया हि भगवान् क्रीडार्थं कृतः प्रयत्नो विविधमर्यादादिरूपस्तदपेक्षः । जन्मकालादारभ्याऽऽमोक्षं विचारितवान् । तदा हि क्रीडैव मुख्याऽन्यत् सर्वमुपसर्जनीभूतम् । तथाच तदपेक्षो भगवांस्तदनुसारेणैव कारयति । यतो विहितस्य यागादेः, प्रतिषिद्धस्य विप्रहननादेरवैयर्थ्यमेवं भवेत् । मर्यादाभावे त्वीश्वरस्यैव स्वर्गनरकादिदातृत्वेन विधिनिषेधवैयर्थ्यं भवेदित्युक्तम् । अतः कृतहानिरकृताभ्यागमवैषम्यनैर्घृण्यादिरूपदूषणे नेत्यर्थः ॥ ४७ ॥

एवं प्रासङ्गिकं वैषम्यादिदोषं परिहृत्य शक्तिशक्तिमतोर्भेदाभेदं परिहरन्ति ।

शक्तिशक्तिमतोरिति * ॥ ४८ ॥

तत्रेति * ब्रह्मणीत्यर्थः ॥ ४९ ॥

ननु, प्रकाशाश्रयवद्वा तेजस्त्वादितिन्यायेन प्रकाशप्रकाशाश्रययोर्भेदाभेद इतिचेत्तत्राहुः ।

धर्मधर्मिविचारेऽपि ज्ञेयमेवं विचक्षणैः ।
प्रकाशाश्रयदृष्टान्तेऽप्यभेदो बोध्यते किल ॥ ५० ॥

प्रकाशाश्रयेत्यादि * । सूत्रार्थस्तु ब्रह्मधर्मा भिन्ना, उताऽभिन्ना इति संशये धर्माणां नित्यत्वेन भिन्ना इति प्राप्ते, आह । प्रकाशेत्यादि । वाशब्दः पूर्वपक्षनिरासार्थः । यथा प्रकाशाश्रयाः सूर्याद-

यः प्रकाशतो न भिन्ना एवं ब्रह्मधर्मा ब्रह्माऽभिन्नाः । कुतः । तेजस्त्वात् । यथा तेजः सूर्यश्च तेज एव । सैन्धवघनोऽनन्तरोऽबाह्यो रसघन एवं वारेऽयमात्मा प्रज्ञानघन एवेति श्रुत्या एकरूपत्वकथनादत्रापि तेजस्त्वदृष्टान्तेन सर्वं ब्रह्मैवेति धर्मिधर्माऽभेद एवेति बोध्यते ॥ ५० ॥

धर्माणां ब्रह्मत्वे द्वितीयं सूत्रं प्रमाणमाहुः ॥

अरूपवत्सूत्रवाक्ये धर्माणामपि ब्रह्मता ।
निरूपिता प्रभुवरैः श्रीविद्वन्मण्डने स्फुटम् ॥ ५१ ॥

अरूपवदित्यादि * सूत्रं तु, अरूपवदेव हि तत्प्रधानत्वादिति । तत्र सूत्र इत्यर्थः । अर्थस्तु, रूप्यते व्यवह्रियत इति रूपं सर्वव्यवहारविषयत्वम् । तद्वद्भिश्वम् । तद्विलक्षणं ब्रह्मेत्यर्थः । अथवा रूप्यते व्यवह्रियतेऽनेनेति रूपं कराद्युच्यते। यथा लोके करादि भिन्नं तदभिमानी रूपवाद्भिन्नः । एवं ब्रह्म न निरूप्यते, किन्तु ब्रह्मैव निरूप्यत इति रूपवदित्यर्थः । तत्राह।तत्प्रधानत्वात् । सर्वेषां वेदान्तानां ब्रह्मैव प्रतिपाद्यं यतः । करादीनामपि ब्रह्मत्वेनैव निरूपणम् । अन्यथा तेषामब्रह्मत्वे, सर्वे वेदा यत्पदमामनन्ति, वेदैश्च सर्वैरहमेव वेद्य इति नियमव्याहतिरतः करादिनिरूपकाः साक्षाद् ब्रह्मप्रतिपादका एवेति । हि युक्तोऽयमर्थः । यथा सैन्धवघन इात, सत्यं विज्ञानमानन्दं ब्रह्मेति, आनन्दमात्रकरपादमुखोदरादिरिति, आनन्दमयोऽभ्यासादिति श्रुतिस्मृतिन्यायैकवाक्यतया सच्चिदानन्दरूपत्वं करादीनामवधेयम् । अत एव, आह च तन्मात्रमिति सूत्रकारो जगाद । अर्थस्तु, तन्मात्रम् आनन्दमात्रं करादीनां श्रुतिः स्मृतिश्चाहेति श्रीविद्वन्मण्डने धर्माणां ब्रह्मता स्फुटं निरूपितेत्यर्थः । योगियाज्ञवल्क्यस्मृतावपि, अथवा परमात्मानं परमानन्दविग्रहमित्युक्तम्॥५१॥

अतः परं रामानुजाचार्यमतमेकदेशीति सूचयितुं स्वमतं तन्मते प्रविष्टमित्याशङ्क्य स्वमतस्य तस्मादतिरेकं साधयन्ति ।

अथ श्रीमन्निजाचार्यैर्निबन्ध इदमीरितम् ।
यः सर्वत्रैव सन्तिष्ठन्नन्तरः संस्पृशेन्न तत् ।
शरीरं तं न वेदेत्थं योऽनुनिश्य प्रकाशते ॥ ५२ ॥

इति तेन शरीरं तु हरेर्हि चिदचित् स्मृतम् ।
जडजीवान्तःस्थितानां भेदेन सुनिरूपणैः ॥ ५३ ॥

* अथेत्यारभ्य * । * विचक्षणैरित्यन्तम् * । * निबन्ध इति* शास्त्रार्थे इत्यर्थः ।

यः सर्वत्रेति *। सर्वत्र पृथिव्यादिषु। अन्तरो मध्यः । तत् पृथिव्यादि न संस्पृशेल्लोकवत् तद्गतसुखदुःखादिभाङ् न भवतीत्यर्थः । शरीरं पृथिव्यादि कर्तृ, नम् ईश्वरं न जानाति। यः पृथिव्यादिषु प्रवेशं कृत्वा प्रकाशत इत्यर्थः । तथाच श्रुतिः । यः पृथिव्यां तिष्ठन् पृथिवीमन्तरो यं पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथिवीमन्तरो यमयति । य आत्मनि तिष्ठन्नात्मानमन्तरो यमात्मा न वेद यस्यात्मा शरीरं य आत्मानमन्तरो यमयतीत्यादि ॥ ५२ ॥

इतीति * निबन्धे यन्निरूपितं तेन निरूपेणेनेति योजना ॥५३॥

तत्त्वत्रयं समायाति विशिष्टाद्वैतवादिनाम् ।
रामानुजानामिति चेन्न दोषोऽस्मन्मते शृणु ॥ ५४ ॥

तत्त्वत्रयमिति * विशिष्टाऽद्वैतवादितां तत्त्वत्रयं समायाति, स्वमत इति शेषः । विशिष्टाद्वैतमित्यस्य विशिष्टं च विशिष्टं च विशिष्टे विशिष्टयोरद्वैतं विशिष्टाद्वैतमिति समासः । सूक्ष्मचिदचिद्विशिष्टं कारणम् । स्थूलचिदचिद्विशिष्टं कार्यम् । तयोरद्वैतमित्यर्थः ॥ ५४ ॥

जडजीवान्तरात्मान इति कार्ये भिदा श्रिता ।
बहु स्यां तु प्रजायेयेत्यादिश्रुतिषु वर्णनात् ॥ ५५ ॥
न कारणे भिदा ज्ञेया तत्रैकोऽहं निरूपणात् ।
आत्मैवेदमग्र आसीदित्यादिषु च दर्शनात् ॥ ५६ ॥

कार्ये भिदेति * । भेदोऽपि न घटपटवत्, किन्तु मृद्घटशराववत् । रामानुजाचार्याणां तु वस्तुतो भेदः ॥ ५५ ॥

तत्र * कारणावस्थायाम् । आत्मैवेत्येवकारेणाऽचितो निषे-

धात् । इत्यादिषु * श्रुतिषु ॥ ५६ ॥

तत्रैकाकी न रमते द्वितीयेच्छा निरूपिता ।
श्रुतिभिस्तदितरो ज्ञेयं ब्रह्मैकं नान्यदेव हि ॥ ५७ ॥
अन्यस्य च स्थितौ तत्र द्वितीयस्य च सम्भवात् ।
रमणार्थं द्वितीयेच्छा श्रुत्युक्ता भग्नतामियात् ॥ ५८ ॥
एकोऽहमित्यपि मुधा तस्माच्छ्रुतिविरोधतः ।
तत्त्वत्रयं कारणे हि त्याज्यमेव विचक्षणैः ॥ ५९ ॥

नान्यदिति * ब्रह्मातिरिक्तं नान्यदित्यर्थः ॥ ५७ ॥ ॥ ५८ ॥
त्याज्यं * नाङ्गीकर्त्तव्यमित्यर्थः ॥ ५९ ॥

यत्त येनेति पद्ये तु निबन्धे सुनिरूपितम् ।
प्रकृतिः पुरुषश्चैव कालश्च हरिरेव हि ॥ ६० ॥

यत्तयेनेतीति * । पद्ये * पद्य व्याख्याने । निबन्धे * शास्त्रार्थे । * सुनिरूपितमिति * श्रीमदाचार्यचरणैरिति शेषः । इदं पूर्वं निरूपितं पद्यं श्रीभागवतस्थं श्रीमदाचार्यचरणैर्निबन्धे स्थापितम् ॥६०॥

एकमेवाद्वितीयं तु ब्रह्म सर्वत्र रूप्यते ।
यः सर्वत्रैवेति पद्ये गोस्वामिपुरुषोत्तमैः ॥ ६१ ॥
सृष्टिकाले भगवतः शरीरं चिदचित् स्मृतम् ।
अन्तर्यामिण एतेन विशिष्टाऽद्वैतमेव यत् ॥ ६२ ॥

यः सर्वत्रैवेति पद्य इति * निबन्धटीकाव्याख्याने आवरणभङ्ग इत्यर्थः ॥ ६१ ॥ ॥ ६२ ॥

तदेकदेशि विज्ञेयमित्युक्तं तैर्विचक्षणैः ।
शैवोऽप्येतेन विध्वस्तो यतस्तच्चोर एव हि ॥ ६३ ॥

विचक्षणैरिति * एतन्मतस्यैकदेशित्वनिरूपणेन बुद्धिमत्त्वरूपाकाङ्क्षाया उत्थितत्वान्न समाप्तपुनरात्तदोषः । एवं रामानुजाचा-

र्यमतं दूषयित्वा तत्तस्करमतखण्डनमाहुः । * शैवोपीति * शैवस्तावद्विशिष्टाऽद्वैतमेवाङ्गीकृत्य ।

मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम् ।

तस्यावयवभूतेन व्याप्तं सर्वमिदं जगदितिश्वेताश्वतरश्रुतिम्, आत्मा तस्याष्टमीमूर्त्तिरिति स्मृतिं चोदाहृत्य ब्रह्मावयवत्वेन विशिष्टांयं जीवस्य प्रकृतेश्चाह । सर्वत्र शिवपरत्वेन श्रुतिस्मृतीराह च । स तु, एतेन * विशिष्टाऽद्वैतखण्डनेन । मायां त्वित्यात्मेति श्रुतिस्मृती कार्याभिप्राये इति न दोषः। शिवपरत्वादिखण्डनं च श्रीपुरुषोत्तमचरणैर्भाष्यप्रकाशे प्रहस्ताख्ये पण्डितकरिभिन्दिपालाख्ये च वादे निरूपितम् । ततोवलोकनीयम् । * तच्चोर इति * रामानुजमतचोरः । क्वचिन्मध्वमतस्यापि । तदेवोक्तं श्रीपुरुषोमचरणैर्भाष्यप्रकाशे, रामानुजस्यैव चोरो मध्वमतस्य च क्वचित्क्वचित्तद्विरुद्धां शैवश्रुतिमुदाहरन् भिन्नप्रस्थानं मन्यत इति ॥ ६३ ॥

एवं शैवमतं दूषयित्वा विज्ञानेन्द्रभिक्षुमतखण्डनमाहुः ।

मायोपाधिककर्तृत्वं भैक्षवे दृश्यते तु यत् ।
तन्मायिवादध्वंसेन ध्वस्तप्रायं विशेषतः ॥ ६४ ॥

मायोपाधिककर्तृत्वमिति * । भिक्षोरिदं भैक्षवं तस्मिन् भैक्षवे मत इत्यर्थः । स हि, ब्रह्म न समवायी, नाऽसमवायी, नापि निमित्तम् । किन्त्वधिष्ठानकारणम् । तल्लक्षणं च, यत्राविभक्तं येनोपष्टब्धं च सदुपादानकारणं कार्याकारेण परिणमते तदधिष्ठानकारणम् । एतल्लक्षणसमावेशस्तु, यत्र ब्रह्मणि अविभक्तं विभागरहितं, येन ब्रह्मणा उपष्टब्धं च सत् साक्षितामात्रेणाङ्गीकृतं च सदुपादानकारणं प्रकृतिरूपं कार्याकारेण जगद्रूपेण परिणमते तद् ब्रह्म अधिष्ठानकारणमित्यर्थः। ब्रह्मणश्च कर्तृत्वं सोपाधिमायौपाधिकम् । परिणामित्वरूपोपादानत्वं च प्रकृतितत्कार्याद्यौपाधिकमिति जगाद । तदसङ्गतम । आत्मैवेदमग्र आसीदित्यादिश्रुतिषु प्रत्यक्षस्य जगतः पूर्वमात्मत्वादिकथनेनेतरस्याभावादविभागाख्यस्वरूपसम्बन्धस्य तदानीं वक्तुमशक्यत्वेनाधिष्ठानलक्षणेनातिव्याप्तेः । एकोऽहमिति श्रुतिविरोधाच्च । ब्रह्म ह वा इदमग्र आसीत्, आत्मैवेदं सर्वम्, तदा-

त्मानं स्वयमकुरुत, बहु स्यां प्रजायेयेत्यादिश्रुतिषु ब्रह्मण उपादानत्वकथनान्न प्रकृतेरुपादानत्वसिद्धिः । मायौपाधिकं कर्तृत्वं प्रकृतितत्कार्यौपाधिकं परिणाम्युपादानत्वमप्यसङ्गतम् । आनन्दरूपममृतं यद् विभाति, सच्चिदानन्दरूपाय कृष्णायेत्यादिश्रुतिभिरानन्दमात्रकरपादमुखोदरादिरित्यादिस्मृतिभिश्च ब्रह्मण आनन्दाकारत्वे सिद्धे मूलरूपस्यौपाधिकल्पनायां बीजाभावात् । विकारित्वपरिहारायौपाधिकत्वमुच्यते, तन्निरस्तं प्राक् ।

किञ्चौपाधिकपक्षस्य मायावादानुसारित्वात् तत्खण्डनेनैतस्यापि खण्डितप्रयत्वाच्चेत्याहुः।*तन्मायिवादध्वंसेन ध्वस्तप्रायमिति*। प्रायपदात् सर्वांशतो न ध्वस्तमतस्तन्मतमनूद्य खण्ड्यते। तथाहि। यज्जीवानां नित्यभिन्नत्वं व्यापकत्वं चाङ्गीकृत्याविभागलक्षणमभेदं चाङ्गीकृत्य, सजातीयत्वे सत्यविभागप्रतियोगित्वमंशत्वं, तदनुयोगित्वं चांशित्वम्। अविभागश्च, सति सम्पद्य न विदुः सति संपद्यामह इत्यादिश्रुत्या, प्रकृतिः पुरुषश्चोभौ लीयेते परमात्मनि इत्यादिस्मृत्या बोधितः । लीङ् श्लेषणे, पद गतावित्याद्यनुशासनेन लयसंम्पत्त्यव्ययशब्दानामविभागार्थकत्वात् । एवञ्च यथा शरीरकेशादिरंशो, राशेश्चैकदेशः, पितुश्च पुत्र इति दृष्टान्तत्रयमुक्त्वा सर्वे जीवाः पितरि पुत्रचेतना इव चिन्मात्रे ब्रह्मणि नित्यसर्वावभासके विषयभासनरूपं स्वलक्षणं विहाय प्रलये लक्षणानन्यत्वं गच्छन्ति । सर्गकाले च तत एव लब्धचैतन्यफलोपधाना आविर्भवन्ति । पितुरिव पुत्रः । अतो जीवा ब्रह्मांशा भवन्ति । आत्मैव जायते पुत्र इत्यादिश्रुत्या पुत्रे पितुरविभागलक्षणाऽभेदवज्जीवब्रह्मणोरविभागलक्षणाऽभेदस्य बहु स्यां प्रजायेयेत्यादिश्रुत्या सिद्धेरिति । अतो जीवा ब्रह्मांशा मुख्या एव भवन्तीत्याह । तदप्यरमणीयम् । नित्यभेदे सर्वविज्ञानप्रतिज्ञाभङ्गो, वैषम्यादिदोषप्रसक्तिश्च । व्यापकत्वे, एषोऽणुरात्मा चेतसा वेदितव्य इति श्रुतिविरोधः । ब्रह्मणो व्यापकत्वे जीवस्यापि व्यापकत्वे लयकथनस्य, नद्यः प्रविष्टा इव नामरूपे इति श्रुत्या, विशते तदनन्तरमिति स्मृत्या च प्रवेशकथनस्यासङ्गतत्वं स्यात् । देहमात्रव्यापकताङ्गीकारे हस्तिकायव्याप्तजीवस्य पिपीलिकाकाये प्रवेशोऽनुपपन्नः । अविभागेन स्थितिरपि न सम्भवति। ब्रह्मैव सन् ब्रह्माप्येतीति, ब्रह्मवेद ब्रह्मैव भवतीति श्रुतिविरोधात् ।

एवकारेण ब्रह्मातिरिक्तस्थितिनिषेधात् । दृष्टान्तत्रयमपि स्वमताननुगुणम् । तथाहि । केशादिकं शरीरस्य विकारः । एवं ब्रह्मणो विकारो जीव इति विकारित्वं ब्रह्मण्यागतम् । प्रकृतेः परिणामित्वाङ्गीकारे शरीरस्थानापन्ना प्रकृतिः केशादिस्थानापन्नो जीव इति प्रकृत्यंशत्वं, न ब्रह्मांशत्वं स्यात् । एवं दृष्टान्तद्वयेऽपि बोध्यम् । बहु स्यामिति श्रुत्या ब्रह्मण एव सर्वभवनसिद्ध्यौपाधिकल्पनाया असङ्गतत्वात् स्वमतभङ्ग इति दिक् ॥ ६४ ॥

एवं भिक्षुमतं खण्डयित्वा शक्तिमतमुपन्यस्यन्ति ।

शाक्तानां तु मते ब्रह्म विश्वोपादानमेव हि ।
निमित्तकारणं शक्तिर्विकारित्वभयादतः ॥ ६५ ॥
तत्रात्मनो विकारित्वं श्रुतिशास्त्रविरोधि हि ।
प्रकृतिर्ह्यस्योपादानमाधारः पुरुषः परः ॥ ६६ ॥
सतोऽभिव्यञ्जकः कालो ब्रह्म तत्त्रितयं त्वहम् ।
इति भागवते पद्ये उपादानत्वमीरितम् ॥ ६७ ॥
तद् विरुध्येत मम तु ब्रह्मतो न पृथक् च सा ।

शाक्तानां त्वित्यादि * ॥ ६५ ॥
तद् दूषयन्ति तत्रेत्यादि * ॥ ६६ ॥ ॥ ६७ ॥
शङ्कराचार्यरचितसौन्दर्यलहरीश्लोकविरोधमाहुः ।

मरुत्त्वमिति पद्ये तु शङ्कराणां च शाम्भवी ।
परिणामं तु सम्प्राप्तेत्युक्तेर्बाधः प्रसज्ज्यते ॥ ६८ ॥

मरुत्त्वमिति * । पद्यं तु ।
मरुत्त्वं व्योम त्वं मरुदसि मरुत्सारथिरसि ।
त्वमापस्त्वं भूमिस्त्वयि परिणतायां न हि परम् ॥
त्वमेव स्वात्मानं परिणमयितुं विश्ववपुषा ।
चिदानन्दाकारं शिवयुवतिभावेन बिभृषे ॥ इति ॥ ६८ ॥

पवनमयि पावकमयि
क्षोणिमयि गगनमयि कृपीटमयि ।

रविमयि शशिमयि दिङ्मयि
समयमयि प्राणमयि शिवे पाहि ॥ ६९ ॥
इति दुर्वाससा प्रोक्तं सर्वात्मत्वं विरुध्यते ।
सर्वोपनिषदो या हि ब्रह्मतत्त्वनिरूपिकाः ॥ ७० ॥
नास्ति शक्तेर्वर्णनं हि कारणत्वं तु दूरतः ।
व्यासैस्तु प्रकृतेः सर्वकारणत्वं तिरस्कृतम् ॥ ७१ ॥

दुर्वाससेति * ललितास्तवरत्न इति शेषः ॥ ७० ॥

नास्तीति * यत्र वर्णनमेव नास्ति, तत्र कारणत्वस्य सम्भावनापि नास्तीत्यर्थः ।

ननु केषाञ्चिच्छाक्तानां मते शक्तिरेव ब्रह्म । सैव समवायिकारणम् । किञ्च । साङ्ख्यमतेऽपि प्रकृतेरपि तत्त्वमिति चेत् । तत्राहुः । * व्यासैरिति * साङ्ख्यमतखण्डनेन सर्वकारणत्वं समवायिनिमित्तकारणत्वं तिरस्कृतं ब्रह्मसूत्रैरित्यर्थः ॥ ७१ ॥

तर्हि समवायिनिमित्तकारणं किं ब्रह्मेतिचेल्लोके समवायिनिमित्तकारणयोर्भेदात् कथमुभयं ब्रह्म । यथा समवायिकारणं मृन्निमित्तकारणं कुलालदण्डचक्रचीवरादीत्याशङ्कामपहरन्ति ।

ब्रह्मणः समवायित्वनिमित्तत्वे निरूपिते ।
ऋग्वेदे तु यतो देवीसूक्तमस्ति तु तत्र हि ॥ ७२ ॥
अहमेव स्वयं वदामि जुष्टं देवेभिरुत मानुषेभिः ।
यं कामये तं तमुग्रं कृणोमि तं ब्रह्माणं तमृषिं तं सुमेधाम् ।
अहं सुवे पितरमस्य मूर्द्धन्
मम योनिरप्स्वन्तःसमुद्रे ॥ ७३ ॥

* ब्रह्मण इति * । * निरूपिते इति * व्यासैरिति शेषः । प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधाद्, योनिश्च हि गीयते इत्यादिना । अनयोरर्थस्तु, पूर्वं समवायिकारणं प्रकृतिरेवेति प्राप्ते आह । प्रकृतिश्चेति । मृत्प्रकृतिर्घटः, तन्तुप्रकृतिः पट इत्यादौ प्रकृतिशब्दः समवायिनमाह । एवञ्च ब्रह्म समवायि-

कारणं, चकारान्निमित्तकारणम् । कुतः । प्रतिज्ञादृष्टान्तानुपरोधात् । अपि वा तमादेशमप्राक्षो येनाश्रुतं श्रुतं भवत्यमतं मतं भवत्यविज्ञातं विज्ञातं भवतीति प्रतिज्ञा । दृष्टान्तो, यथा, सौम्यैकेन मृत्पिण्डेन मृण्मयं विज्ञातं भवतीति । अनयोरनुपरोधाद् अबाधनादित्यर्थः । द्वितीये, जडानां ब्रह्मैव कारणं चेतनेषु तु योनिबीजयोः समवायित्वदर्शनादित्याशङ्कां परिहरति । योनिश्चेति । योनिश्च ब्रह्मैव । शक्तिवादनिराकरणाय चकारः । किञ्च, तदात्मानꣳ स्वयमकुरुत । यतो वेत्यादि । जन्माद्यस्य यतः शास्त्रयोनित्वात् । तत्तु समन्वयात् । कर्ता कारयिता हरिः । जन्माद्यस्य यतोऽन्वयादितरतश्चेत्यादिश्रुतिस्मृतिश्रीभागवतादिषु ब्रह्मण एव समवायिनिमित्तत्वयोः सिद्धिः । तत्राऽन्वयात् समवायिकारणात् । इतरतो निमित्तकारणादिति श्रीमदाचार्यचरणैः सुबोधिन्यामुदितम् । तत्तु समन्वयादित्यस्यार्थस्तु, तद् ब्रह्म समवायिकारणम् । कुतः । समन्वयात् । सम्यगन्वयो यथा मृदो घटे, तथा ब्रह्मणो जगतीति । विशेषतस्तु भाष्यकारैर्बहुशो निरूपितं, ततोऽवधेयम् ।

ननु ब्रह्मरुद्रादिकारणत्वं देव्या उदितं तत्राहुः ।

ऋग्वेद इति ॥ ७२ ॥

देवीसूक्तेऽपि विष्णुरेव देव्याः कारणमितिबोधाय देवीसूक्तमन्त्रमाहुः ।

अहमेवेत्यादि * देवेभिर्देवैः । मानुषेभिर्मानुषैः । जुष्टं सेवितम् । यं जीवं कामये इच्छामि तं तं जीवमुग्रं रुद्रं कृणोमि करोमीत्यर्थः ॥ ७३ ॥

एवं श्रुतौ तु देव्या हि स्वकारणतयोदितः ।
पयोऽधिशायी यो विष्णुः स उक्तोऽतो न सा परा ॥७४॥

एवमित्यादि * एवं रीत्येत्यर्थः । सेति * देवीत्यर्थः । एवञ्च परत्वं सर्वजगत्कारणत्वं विष्णोरेवेति सिद्धम् ॥ ७४ ॥

उग्रः कपर्दी श्रीकण्ठ इति कोशाच्छिवः स्मृतः ।
अस्येति रुद्रो निर्दिष्टोऽहं रुद्रायेति वाक्यतः ॥ ७५ ॥

कोशाद् * अमरकोशात् * वाक्यत इति * अहं रुद्राय ध-

नुरातनोमीति तत्रत्यश्रुतिवाक्यत इत्यर्थः ॥ ७५ ॥

प्रक्रान्तत्वात् पिता ब्रह्मा तद्योनिः शक्तिरत्र हि ।
तस्यास्तु जनको विष्णुः सिन्धुशायी निरूपितः ॥ ७६ ॥

प्रक्रान्तत्वादिति * प्रक्रमप्राप्तत्वादित्यर्थः । * पितेति * रुद्रः पिता निर्दिष्ट इति पूर्वेणान्वयः । एवं शक्तिपदेऽपि । * तद्योनिरिति * तस्य ब्रह्मणो योनिः कारणम् । अत्र हि देवीसूक्ते मन्त्रे मूर्द्धन्नित्यस्य मुख्यमित्यर्थः । सुपां सुलुगिति सूत्रेण सुब्लोपः । तर्हि शक्तेः किं कारणं तत्राहुः * तस्यास्त्विति * मम योनिरप्स्वन्तःसमुद्रे इति मन्त्रेण निरूपित इत्यर्थः । मम शक्तेः, योनिः कारणं समुद्रे अप्सु अन्तः । अस्तीति शेषः । समुद्रशायित्वं विष्णोरेवेति विष्णुः कारणमित्यर्थः ॥ ७६ ॥

अस्माकं व्यासचरणैर्यदुक्तं न ततोऽन्यथा ।
अथाऽतो ब्रह्मजिज्ञासेत्युक्त्वा तल्लक्षणेन हि ॥ ७७ ॥

अस्माकमिति * मत इति शेषः । * व्यासचरणैरिति * । तदेव ग्राह्यमिति शेषः । अन्यथा * व्यासोक्तिविरुद्धम् । ननु व्यासचरणैः कस्य कारणत्वमुक्तं तत्राहुः * अथात इत्यादि * इदं चोत्तरतन्त्रादिमं सूत्रम् । ब्रह्मणः ब्रह्मसम्बन्धी । जिज्ञासा विचारः । अथशब्दस्तावदारम्भार्थकः । आरभ्यत इत्यर्थः । यतः कर्मादिभ्यो ब्रह्मज्ञानं पुरुषार्थसाधकमतस्तज्ज्ञानाय विचार इत्यतःशब्दार्थः ॥७७॥

जन्माद्यस्येत्यादिसूत्रैः कारणं ब्रह्म कीर्त्तितम् ।
तन्त्रशास्त्रेण चेद् ब्रूषे तदवैदिकसंमतम् ॥ ७८ ॥

ब्रह्म किंलक्षणकमिति शङ्कायां, जन्माद्यस्य यतः शास्त्रयोनित्वादित्युक्तम् । अर्थस्त्वधस्तात् प्रतिपादितः ।

असंशयं समग्रं मां यथा ज्ञास्यसि तच्छृणु ।
यज्ज्ञात्वा नेह भूयोऽन्यज्ज्ञातव्यमवशिष्यत इति प्रतिज्ञाय ।
अहं सर्वस्य जगतः प्रभवः प्रलयस्तथा ।
मत्तः परतरं नान्यत् किञ्चिदस्ति धनञ्जय ॥
बीजं मां सर्वभूतानां विद्धि पार्थ सनातनमिति गीतायां पुरुषोत्तमवाक्यात् । अग्रेऽपि तत्रैव ।

परं ब्रह्म परं धाम पवित्रं परमं भवान् ।
पुरुषं शाश्वतं दिव्यमादिदेवमजं विभुम् ॥
आहुः स्त्वामृषयः सर्वे देवर्षिर्नारदस्तथा ।
असितो देवलो व्यासः स्वयं चैव ब्रवीषि मे इत्यर्जुनवचनात् ।

अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्त्तत इति पुरुषोत्तमवाक्याच्च जगत्कारणत्वं श्रीकृष्णस्यैव, न देव्याः । नन्वनेकेषु तन्त्रेषु तस्याः कारणत्वोक्तिरित्यत आहुः । * तन्त्रशास्त्रेणेति * ।

श्रौतार्चनं तु विप्राणां विशेषेण भवेत् सदा ।
श्रौतागमार्चनं क्षत्रे वैश्ये केवलमागमिति वाक्यात् ॥
तन्त्रेषु दीक्षितो मर्त्यो वैदिकं न स्पृशेत् सदा ।
वैदिकश्चापि तन्त्रेषु दीक्षितं न स्पृशेत्सदेतिवाशिष्ठलैङ्गोक्तेः॥
क्वचित् तन्त्रानुरोधेन धर्मं पौराणिका अपि ।
वदन्ति तादृशोऽशस्तु ग्राह्यस्तन्त्रावलम्बिनेति पराशरोक्तेः ।

पराशरीयपुराणे ।

प्रत्यक्षवेदसिद्धार्थः संग्राह्यः सर्वचेतनैः ।
अप्रत्यक्षं श्रुतेरर्थं स्मरन्ति मुनिसत्तमाः ॥
स्मृतयश्च पुराणानि भारतप्रमुखान्यपि ।
क्वचित् कदाचित् तन्त्रार्थकटाक्षेण मुनीश्वराः ॥
अधिकारविशेषाणां प्रवदन्त्यर्थमास्तिकाः ।
ब्राह्मणः क्षत्रियो वाऽन्यो निःशङ्कं तत् परित्यजेत् ॥
वर्णाश्रमपरिभ्रष्टः प्रायश्चित्तेष्वनुन्मुखः ।
वेदेतरागमं गत्वा पापी तद्धर्ममाचरेत् ॥

वेदबाह्यरताः सक्ता बहवो नरकं गता इति । कौर्मपुराणेऽपि ब्राह्मणानां गौतमशापेन त्रयीबाह्यत्वे जाते तैः स्तुतौ शिवकेशवावित्युपक्रम्य ।

चकार मोहशास्त्राणि केशवः स शिवस्तथा ।
कापालं लाकुलं वामं भैरवं पूर्वपश्चिमम् ॥
पाञ्चरात्रं पाशुपतं तथान्यानि सहस्रशः ।
क्वचित् क्वचित् पुराणादौ वेदमूलेऽपि सर्वथा ।

सन्ति निर्मूलतन्त्रांशास्ते तु ग्राह्या न वैदिकैरित्यादिवाक्यानि सप्तशतीटीकायां नागोजीभट्टेन, भट्टोजिदीक्षितादिभिरप्युपनिब-

द्धानि । अत एवाऽऽश्वलायनगृह्यपरिशिष्टे सन्ध्याप्रकरणे । साविध्या ऋषिदैवतच्छन्दांस्यनुस्मृत्य तामेतां चतुरक्षरेणविभक्तां मन्त्रयोजितैः षड्भिश्चागममन्त्रैर्यथाभागमात्मनि विन्यस्य भावयेदित्युक्त्वा हृदयादिषडङ्गन्यासमुक्त्वा, एनमप्येके नेच्छन्ति, स हि विधिरवैदिक इति निरूपितं सङ्गतं भवतीति दिङ्मात्रमुदितम् । तदेवाहुः । * तदवैदिकसंमतमिति * । अवैदिकानां संमतमित्यर्थः । वेदविरुद्धार्थस्य तन्त्रत्वेन व्यवहारः । सर्वनिर्णयनिबन्धे श्रीमदाचार्यचरणैः ।

छलयोगस्तथा सांख्यं शाक्तो मार्गोऽभिधीयते इति ।

सांख्ययोगौ मिलितौ धर्ममार्गविरोधेनाऽमेध्यभक्षणसुरापानादिपोषितौ । शाक्तो मार्गस्तत्र सप्तभेदा उक्ताः । वैदिकाः ॥ १ ॥ वैष्णवाः ॥ २ ॥ शैवाः ॥ ३ ॥ शाक्ताः ॥ ४ ॥ वामाः ॥ ५ ॥ सिद्धान्ताः ॥ ६ ॥ कौलाः ॥ ७ ॥

लोके व्यामोहकं शास्त्रं सप्तानां बोधकः शिवः ।
कलौ जनिष्यमाणानामसुराणां क्षयाय हि ॥

सर्वेषां नरके वास इत्युक्तम् । एतट्टीकायां त्याज्यत्वे हेतुरुक्तो महापातकिसंसर्गेऽपि महापातकित्वश्रवणादिति । तत्र कर्मासक्तास्तु ये तत्र वैदिकाः समुदाहृताः । लोके संमाननार्थं कर्मासक्ताः । सिद्धान्तानां तु आसुरसिद्धान्तः सर्वं मिथ्येति । कर्म सर्वथा त्यक्तव्यं बाधकमिति, तथा भक्तिरपि । केवलं वाचःपेशैर्मोहयन्ति ये ते सिद्धान्तास्तेषां लोकसङ्ग्रहो नियामकः । कौलानां तु न लोकापेक्षेति भेदः ।

पत्नीत्वे दीक्षया रण्डाश्चण्डा अपि भजन्ति हि ।
दिगम्बराश्चर्मचिन्हाः सुरामांसपरायणाः ।
पापरूपा दुराचारास्ते कौला परिकीर्त्तिताः ।

तेषामनुग्रहनिग्रहादिकं दृष्टं फलं, तन्मार्गसेवितया दुष्टतामसशक्त्या सिद्धान्तस्य लोके संमाननं फलम् । ततो व्यामोहो लोकस्य भवतीत्युक्तम् । वैष्णवास्तु गोपालनृसिंहसंयुक्तां शक्तिमुपासते । ते यथा गोपालसुन्दरीनृसिंहसुन्दर्याविति । एवमेव शिवयुक्तां तामुपासते, ते शैवाः । केवलशक्त्युपासकाः शाक्ताः वामाश्च वामाचारेण सुरासम्बन्धादिना तामुपासते ।

अत्र तन्त्र उक्तम् ।

पञ्चप्रेतासनारूढां परब्रह्मस्वरूपिणीम् ।
ब्रह्मा विष्णुश्च रुद्रश्च ईश्वरश्च सदाशिवः ॥
एते पञ्च महाप्रेताः पादमूले व्यवस्थिता इति ।

श्रीमदाचार्यचरणैस्तु तत्रैवैतन्निर्णयः कृतः । तत्र त्रिपुरसुन्दर्यादिशक्तयः सेव्या योगश्च साध्य इति बुद्धिः । तत्रानधिकारे शैववैष्णवौ तस्याः शक्तेः पादत्वेन पञ्चप्रेतमध्ये निरूपितौ । न शब्दमात्रेण किञ्चिद् दुष्यति, पदार्थस्त्वन्य एवातो भूतादिरेव विष्णुशिवादिनाम धृत्वा तथोपास्त इति। तत्रोभयश्लोकेऽपि प्रेतमहाप्रेतत्वेनोक्ताः । एवञ्च तन्त्रशास्त्रस्य वैदिकानामुपेक्षणीयत्वमतश्चतुःषष्टितन्त्राणां प्रतिपाद्यार्थसंहितानां नामानि लिख्यन्ते । तत्र, महामायाशम्वरतन्त्रम् । अन्यस्मिन् पदार्थेऽन्यथा प्रतिभासनरूपमायाप्रपञ्चरचनोपायप्रतिपादककर्मेन्द्रजालविद्यारूपम् १ । योगिनीजालशम्वरतन्त्रं, योगिनीजालप्रतिपादकम् २ । तत्त्वशम्वरतन्त्रमिन्द्रजालविद्याविशेषः पृथिव्यादितत्त्वानामन्यत्रान्यबोधोपायप्रतिपादकम् ३ । सिद्धिभैरवतन्त्रम् ४ । मायिकभैरवतन्त्रम् ५ । कङ्कालभैरवतन्त्रम् ६ । कालाग्निभैरवतन्त्रम् ७ । शक्तिभैरवतन्त्रम् ८ । योगिनीभैरवतन्त्रम् ९ । महाभैरवतन्त्रम् १० । भैरवनाथतन्त्रमिति भैरवाष्टकमिदं कापालिकमतप्रतिपादकम् ११ । ब्राह्मीतन्त्रम् १२ । माहेश्वरीतन्त्रम् १३ । कौमारीतन्त्रम् १४ । वैष्णवीतन्त्रम् १५ । वाराहीतन्त्रम् १६ । इन्द्राणीतन्त्रम् १७ । चामुण्डातन्त्रम १८ । शिवदूतीतन्त्रम् । ब्राह्म्यष्टकमिदं तत्तदेवताप्रतिपादकम् १९ । रुद्रयामलम् २० । भैरवयामलम् २१ । शिवयामलम् २२ । विष्णुयामलम् २३ । स्कन्दयामलम् २४ । ब्रह्मयामलम् २५ । देवीयामलम् २६ । यामलमिति रुद्रयामलान्यष्टौ सिद्धाम्बाप्रतिपादकानि । चतुषष्टितन्त्राणामपियामलत्वेन व्यवहारः २७ । चन्द्रज्ञानतन्त्रम् । कामैश्वर्यादिषोडशनित्याप्रतिपादकम् । तिथिनामधेयं नित्येति २८ । मालिनीतन्त्रम् । समुद्रयानोपायप्रतिपादकम् २९ । महासंमोहनतन्त्रम्, जाग्रतामपि निद्रोपायप्रतिपादकम् ३० । वामसेवितं वामकेश्वरतन्त्रं, चतुःशतीत्यपि कथ्यते ३१ । महादेवतन्त्रं, बटुकादिसिद्धकुलाचारप्रतिपाद-

कम् ३२ । वातुलम् ३३, वातुलोत्तरम् ३४, कामिकश्चेति त्रीण्येतानि तन्त्राणि क्षेत्राकर्षणादिविधिप्रतिपादकानि ३५ । हृद्भेदतन्त्रं, कापालिकाचारप्रदर्शकम् ३६ । तन्त्रभेदगुह्यतन्त्रयोः प्रकाशं रहस्यं वा परकृतमन्त्रतन्त्रप्रयोगाणां परावृत्त्युपायाः प्रदर्शिताः ३७ । ३८ । कालावादं, कामशास्त्रं वात्स्यायनादिमतम् ३९ । कलासारं, रूपादिवृद्ध्युपाय प्रतिपादकम् ४० । कुण्डिकामतं, गुटिकासिद्धिप्रदर्शकम् । गुटिका पानपात्रम् ४१ । मत्तोत्तरतन्त्रं, रससिद्धिप्रकाशकम् ४२ । वीणातन्त्रं, वीणा नाम योगिनी सम्भोगपक्षिणीत्यस्या नामान्तरं, तस्याः साधनोपायनिरूपकम् ४३ । त्रोतलतन्त्रं, गुटिकाञ्जनपादुकासिद्धिप्रदर्शकम् ४४ । त्रोतलतन्त्रोत्तरतन्त्रं, चतुषष्टिसहस्रयोगिनीनां दर्शनोपायनिरूपकम् ४५ । पञ्चाऽमृततन्त्रं. पृथिव्यादिपञ्चभूतानां साधनेन मरणाभावप्रतिपादकं कापालिकतन्त्रम् ४६ । रूपभेदादिपञ्चतन्त्राण्युच्चाटनादिप्रतिपादकानि ५१ । सर्वज्ञानादितन्त्रपञ्चकं कापालिकसिद्धान्तैकदेशिदिगम्बरमताचारप्रदर्शकम् ५६ । पूर्वतन्त्रादिदेवीमतपर्यन्तं तन्त्राष्टकं दिगम्बरैकदेशिक्षपणमताचारप्रदर्शकम् ६४॥

एवमेतानि तन्त्राणि मोहकानि त्याज्यानि वैदिकैरिति बोधाय लिखितानि ॥ ७८ ॥

तन्त्रशास्त्रस्याप्रामाण्यं प्रतिपाद्य चतुष्टयं प्रमाणमित्याहुः ।

वेदाः श्रीकृष्णवाक्यानि व्याससूत्राणि चैव हि ।
समाधिभाषा व्यासस्य प्रमाणं तच्चतुष्टयम् ॥ ७९ ॥

वेदाइति * वेदाः पूर्वोत्तरकाण्डस्थिता अर्थवादादिरूपा अपि । यथा बृहस्पतिः स्वां वपामुदखिददित्यत्र वपोत्खेदे बृहस्पतेर्जीवनं न स्यादत इदं वाक्यं यज्ञप्राशस्त्याधायकम् । एवं, ग्रावाणः प्लवन्ते इत्यपि । यत्रैते प्लवन्ते तत्रान्यप्लवने कः सन्देह इति नाश्मनां प्लवने तात्पर्यमिति केचित् । तन्न । आद्ये बृहस्पतेर्देवत्वेन वपोत्खेदने न जीवत्वहानिरिति । द्वितीये तु सेतुबन्धनसामयिकव्यवस्थानुवादकेयम् ऋगित्यादि ज्ञेयम् । विशेषतस्त्वन्यतोऽवधेयम् । श्रीकृष्णवाक्यानि * गीतायां, चकाराद् व्याससूत्राऽविरुद्धानि जैमिनिसूत्राणि । एवं मन्वादिस्मृतीनां व्यासाविरुद्धत्वेन प्रामाण्यम् । सामाधिभाषा श्रीमद्भागवतम् ॥ ७९ ॥

श्रीमदाचार्यचरणैरत एव निरूपितम् ।
शाक्तास्तांश्चेत्ततो ब्रूयुस्ते सन्मार्गाद् बहिष्कृताः ॥ ८० ॥

श्रीमदाचार्यचरणैरिति * अणुभाष्य इति शेषः । * सन्मार्गाद् * वैदिकमार्गात् ॥ ८० ॥

इति सर्वेषु मार्गेषु दोषाः सन्ति ततो हरिम् ।
शुद्धाद्वैतावलम्बेन भजेत सुविनिश्चितम् ॥ ८१ ॥

शुद्धाद्वैतावलम्बनेति * । अखण्डाद्वैतभाने हि सर्वं ब्रह्मैव नान्यथेति । सर्वत्र भगवद्दृष्ट्या विषयान्तराभावः फलमितिभावः । * सुविनिश्चितमिति * श्रुतिस्मृत्यादिष्वित्यर्थः ॥ ८१ ॥

भजधातोः सेवार्थकत्वेन सेवालक्षणं श्रीमदाचार्यचरणोक्तमाहुः ।

चेतस्तत्प्रवणं सेवा फलरूपा तु मानसी ।
तत्सिद्ध्यर्थं देहवित्तजनिः कार्या ततो भवेत् ॥ ८२ ॥
संसारदुःखनाशो हि ब्रह्मात्मत्वावबोधनम् ।
ब्रह्मज्ञस्य परप्राप्तिरानन्दव्रततौ स्फुटा ॥ ८३ ॥

चेतस्तत्प्रवणं सेवेति * इदं च सिद्धान्तमुक्तावल्यामुदितम् । तत्र हि कृष्णसेवा सदा कार्येति पूर्वमुक्तत्वात्तच्छब्देन श्रीकृष्णस्य ग्रहणम् । अत्रापि * हरिमित्युक्तत्वात् तद्ग्रहणम् । * फलरूपा त्विति * । सा व्रजाङ्गनासु । ता नाऽविदन्मय्यनुषङ्गबद्धधियः स्वमात्मानमदस्तथेदमिति श्रीभागवतवचनात् । इयं सर्वात्मभावकाष्ठा तृतीयाध्याये भाष्ये स्फुटा । तत्सिद्ध्यर्थं * सर्वात्मभावरूपमानसीसेवासिद्ध्यर्थं, तनुवित्ताभ्याञ्जन्यते या सा तनुवित्तजनिः । उभयोः साधकत्वं, नैकस्या इति बोधनाय समस्तपदम् ॥ ८२ ॥

संसारेत्यादि * संसारोऽहन्ताममतारूपः । *ब्रह्मात्मत्वावबोधनमिति * ऐतदात्म्यमिदं सर्वं, सर्वं खल्विदं ब्रह्मेत्यादिश्रुतिसिद्धं, वासुदेवः सर्वमिति स महात्मा सुदुर्लभ इत्यादिस्मृतिसिद्धं सर्वस्य

जगतो ब्रह्मत्वं तस्यावबोधनं याथार्थ्यज्ञानमित्यर्थः । तर्हि ब्रह्मज्ञानस्य किं फलमित्याहुः * ब्रह्मज्ञस्येत्यादि *। श्रीमदाचार्यचरणैर्भाष्ये ब्रह्मज्ञानेनाविद्यानिवृत्त्या प्राकृतधर्मराहित्येन शुद्धत्वसम्पादनेन पुरुषोत्तमप्राप्तौ स्वरूपयोग्यता सम्पद्यते । तादृशे जीवे स्वीयत्वेन वरणे भक्तिभावात् सहकारियोग्यतासम्पत्त्या पुरुषोत्तमप्राप्तिर्भवतीति निर्णीयत इत्युक्तम् । नन्वत्र किं मानमत आहुः ।

आनन्दव्रततताविति * आनन्दवल्ल्यामित्यर्थः । वल्ली तु व्रततिर्लतेत्यमरात् । तस्यां हि ब्रह्मविदाप्नोति परम्, तदेषाभ्युक्ता, सत्यं ज्ञानमनन्तं ब्रह्म, यो वेद निहितं गुहायां परमे व्योमन् सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चितेति । अर्थस्तु । ब्रह्मवित् परं ब्रह्मणः सकाशादुत्कृष्टं पुरुषोत्तमं प्राप्नोतीत्यर्थः । परशब्देनात्र ब्रह्मैवोच्यते तर्हि ब्रह्मप्राप्तेर्ज्ञानात्मकत्वेन ब्रह्म प्राप्तो ब्रह्म प्राप्नोतीत्यर्थः । स त्वसङ्गतः । साध्यसाधनव्याघातस्तस्मात् । परशब्दस्योत्कृष्टवाचित्वेनोत्कर्षस्य सांनिध्याद् ब्रह्मणः सकाशात् परं पुरुषोत्तममित्येवार्थः । विशेषतस्तद्विवक्षमाणानुभवैकगम्योऽयमानन्दो, न मनोवाग्विषय इति सूचयितुमाह । तदेषेत्यादि । तदित्यव्ययम् । तद् ब्रह्मविदः परप्राप्तिलक्ष्यणमर्थं विशदतया प्रतिपाद्यत्वेनाभिमुखीकृत्य ऋगेषा विदितपरब्रह्मकैरुक्ता । पूर्ववाक्यविवरणमनया क्रियत इत्यर्थः । तामेवाह । सत्यमित्यादि । गुहायां हृदयाकाशे, परमे व्योमन् परमव्योम्नीत्यर्थः । अक्षरब्रह्मात्मके व्यापिवैकुण्ठे, निहितं स्थापितमिव यो वेद स भक्तो ब्रह्मणा विपश्चिता । विविधभोगचतुरेणेत्यर्थः । अत्र विविधं पश्यच्चित्त्वं विपश्चित्त्वं, पृषोदरादित्वाद्यच्छब्दलोपः । तेन सह सर्वान् कामानश्नुते भुङ्क्त इत्यर्थः । अत्र तृतीयया ब्रह्मणो, गौणत्वं, भक्तस्य भोगे मुख्यत्वं बोध्यते । अहं भक्तपराधीनो, वशे कुर्वन्ति मां भक्त्या सत्स्त्रियः सत्पतिं यथेत्यादिवाक्यादिदमनुग्रहैकलभ्यमित्यर्थः । विशेषतो भाष्यादवधेयम् ॥ ८३ ॥

नन्वविद्यायाः प्रतिबन्धकत्वे कथं परप्राप्तिरित्याशङ्कायां, 'विद्याविद्ये मम तनू विद्ध्युद्धव शरीरिणाम् । मोक्षबन्धकरी आद्ये मायया मे विनिर्मिते' इति श्रीभागवतवाक्येन मायानिर्मितत्वादविद्याया, अतो मायापगमे तस्या अपि नाशो भविष्यतीत्यभिप्रायेण गीतावाक्यमाहुः ।

मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते ।
इतिवाक्यात्तु भक्तानामविद्याविनिवृत्तितः ॥ ८४ ॥

मामेवेत्यादि * एवकारेणाऽन्यप्रपत्तिर्न मायातरणकारिका । 'अहं सर्वस्य जगतः प्रभवः प्रलयस्तथा । मत्तः परतरं किञ्चिन्नान्यदस्ति धनञ्जय' इत्यादिश्रीमुखवाक्यात् पुरुषोत्तमस्य सर्वोत्कृष्टज्ञाने प्रपत्तिर्भवति । एतादृशज्ञानस्य फलं तु 'असंशयं समग्रं मां यथा ज्ञास्यसि तच्छृणु । यज्ज्ञात्वा नेह भूयोऽन्यज्ज्ञातव्यमवशिष्यत' इति वाक्यादक्षरज्ञानादिकं सर्वं सुलभमतो भक्तानां तु श्रीकृष्णप्रपत्त्यैवाविद्यानिवृत्तिरिति भावः ॥ ८४ ॥

ततः किमत आहुः ।

अलौकिकाकारसिद्ध्यै प्रवेशो हरिणोदितः ।
अव्यक्तोऽक्षर इत्युक्तस्तमाहुः परमां गतिम् ॥ ८५ ॥

अलौकिकाकारसिद्ध्या इति * सिद्ध्यर्थमित्यर्थः । * प्रवेश इति * यथा सैन्धवखिल्य उदके प्रास्त उदकमेवानुविलीयते, नद्यः प्रविष्टा इव नामरूपे इत्यादिश्रुतिसिद्धप्रवेश इत्यर्थः । * हरिणेति * श्रीकृष्णेनेत्यर्थः । गीतायामिति शेषः । विशते तदनन्तरम्, ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परन्तपेत्यादिश्लोकैरित्यर्थः । नन्वक्षरे लये कथं पुरुषोत्तमप्राप्तिरित्याशङ्कायां तस्य पुरुषोत्तमगृहरूपत्वात् तत्र प्रवेशे प्राप्तिर्भवतीति तत्पुरुषोत्तमगृहे गीताप्रमाणमाहुः । * अव्यक्तइत्यादि * । अक्षरब्रह्मणोऽव्यक्त इति नाम । एतेनाऽव्यक्तशब्दो मायावाचक इत्यपास्तम् । अव्यक्तादीनीत्यत्राव्यक्तशब्देनाक्षरब्रह्मैव ज्ञेयम् । एतेन जगतो मायिकत्वं निरस्तम् । परमां * सर्वोत्कृष्टां गतिं मोक्षरूपाम् आहुः । तत्त्वविद इति शेषः ॥ ८५ ॥

यं प्राप्य न निवर्तन्ते तद्धाम परमं मम ।
इति वाक्येन भगवद्गृहं ब्रह्म प्रकीर्तितम् ॥ ८६ ॥

न निवर्त्तन्त इति * । न स पुनरावर्त्तत इति श्रुतेः । मम क्षराक्षरातीतपुरुषोत्तमस्य धाम गृहमित्यर्थः । अत्र भक्तानां त्वक्षरं

ब्रह्म पुरुषोत्तमगृहरूपत्वेन, ज्ञानिनां ब्रह्मत्वेन, पुरुषोत्तमस्यैव, मल्लानामशनिरित्यादिस्वभावानुसारेण । यद्यद्धिया त उरुगाय विभावयन्ति तत्तद्वपुः प्रणयसे सदनुग्रहायेति श्रीभागवतात् ॥ ८६ ॥

तर्ह्यक्षरब्रह्मैव परं प्राप्यस्थानमिति चेत् तत्राहुः ।

पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यया ।
इत्यग्रिमेण वाक्येन गेहाधीशो निरूपितः ॥ ८७ ॥

पुरुष इत्यादि * 'यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तमः । अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तम इति वाक्यात् । परः पुरुषः पुरुषोत्तमः श्रीकृष्ण इत्यर्थः । अत्र सिद्धान्ते जन्ममरणाद्युपाधितया क्षरो जीवः । अक्षरोऽन्तर्यामी । अक्षरातीतः पुरुषोत्तमः । द्वाविमौ पुरुषौ लोक इत्यादिगीतावाक्यात् । अयं विचारः श्रुतिरहस्यप्रकाशे निपुणतया निरूपितो मयेति नेह तन्यते ॥ ८७ ॥

पुरुषोत्तमलाभः कथं तत्राहुः ।

भक्त्या लाभो हि निर्दिष्टो भक्तिश्चाचार्यसंश्रयात् ।
श्रीमदाचार्यचरणभजनादेव नान्यथा ॥ ८८ ॥

भक्त्येति * । * श्रीमदाचार्यचरणेत्यादि * । अत्र क्रमस्तु, पूर्वं भगवत्कृपाङ्कुरस्य स्वतः संस्कारेण भगवन्मार्गीयसङ्गादिना वा उद्बोधे मार्गेऽस्मिन् रुचिः । ततोऽस्मिन् प्रवेशेच्छा । तत्राप्यङ्कुरस्य दृढत्वेऽस्मिन्मार्गे सर्वोत्तमत्वभानम् । प्रवेशश्च द्वारभूतश्रीमदाचार्यकुलगुरुद्वारा शरणागतिः । ततः शुद्धः कृष्णं भजेदितिसिद्धान्तात् सपरिकरस्य स्वस्य च शुद्धिरपेक्षिता । सा लोके दुर्घटाऽतो दारान् सुतान् गृहान् प्राणान् यत् परस्मै निवेदनमिति विधिपूर्वकं सिद्धं समर्पणम् । तेन च, ब्रह्मसम्बन्धकरणादित्यादिवाक्येन सर्वदोषनिरासोक्तेः समर्पणोत्तरं सर्वत्र दोषाभावात् प्रतीयमानानां चाभासमात्रत्वाद् गङ्गाजलन्यायेन दोषाणां गौणभावाच्च सेवायामधिकारः । ततः सतां, द्वारभूतश्रीगुरोर्वा सङ्गेन शिक्षया वा श्रीमदाचार्यचरणेषु भगवदभेदबुद्धिः । सर्वोत्तमस्तोत्रादिभिस्तद्भजनम् । तत एतन्मार्गीयसङ्गेन भगवद्भजनस्वीयग्रन्थावलोकनश्रवणा-

दिना प्रतिबन्धनिवृत्तौ दोषनिवृत्तिः। सेवोपयोगिगुणवृद्धिश्च। ततः सेवानैरन्तर्ये सकुटुम्बस्य भगवत्प्राप्तिरिति। * अन्यथेति *। श्रीमदाचार्यचरणशरणां विनेत्यर्थः। अत एव श्रीहरिराया आहुः।

नाश्रितो वल्लभाधीशो, न च दृष्टा सुबोधिनी।
नाराधि राधिकानाथो वृथा तज्जन्म भूतल इति॥

वृथेत्यस्य निष्फलमित्यर्थः॥ ८८॥

श्रीमदाचार्यचरणद्वाराङ्गीकृतस्य लीलाधिकारिणो यत् करोति भगवाँस्तदाहुः।

ब्रह्मभावं तु सम्पाद्य परमानुग्रहाद् विभुः।
गृहस्थितं स्वीयजीवं समुद्धरति यत्नतः॥ ८९॥

ब्रह्मभावमित्यादि *। यथा सैन्धवखिल्य उदके प्रास्त उदकमेवानुविलीयत इत्यादिश्रुत्या, नद्यः प्रविष्टा इव नामरूपे इत्यादिश्रुत्या, विशते तदनन्तरमिति स्मृत्या निरूपिते ब्रह्मणि लयो ब्रह्मभावसम्पत्तिः। तादृशं कृत्वेत्यर्थः। * परमानुग्रहात् * स्वीयत्वेनाङ्गीकारात्। यमेवैष वृणुते तेन लभ्य इति श्रुतेः। मुक्तिदानं तु सर्वेभ्यः। भक्तिं तु परमानुगृहीतस्यैव। मुक्तिं ददाति कर्हिचित् स्म न भक्तियोगमिति श्रीभागवतोक्तेः। अक्षरं ब्रह्म पुरुषोत्तमस्य गृहम्। तत्र ब्रह्मैक्यतया स्थितं स्वयं समुद्धरति। तस्मात् पृथक् करोतीत्यर्थः। * यत्नत इत्यनेन तस्योपरि स्नेहभरेण तद्वियोगासहिष्णुस्तस्योद्धरणे इच्छां करोतीति सिद्धम्। अत्र प्रमाणं तु व्याससूत्रं, सम्पद्याविर्भावः स्वेन शब्दादिति। ब्रह्मभावं सम्पाद्य स्वेन पुरुषोत्तमेनाविर्भावः क्रियते। एवं कथमुच्यते, तत्राह शब्दादिति। यो वेद निहितं गुहायां परमे व्योमन्, सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चितेतिशब्दात्। अत्र पुरुषोत्तमसाहित्येन सर्वकामोपभोगो जीवस्य निरूपितः। स लीनस्योद्धरणं विना न सम्भवत्यस्मादुद्धरतीत्यर्थः। तथाच। श्रीभागवते।

ते तु ब्रह्महृदं नीता मग्नाः कृष्णेन चोद्धृताः।
ददृशुर्ब्रह्मणो लोकमिति। श्रीमदाचार्यचरणैरपि फलप्रकरणप्रारम्भे॥

ब्रह्मानन्दात् समुद्धृत्य भजनानन्दयोजने ।
लीलाया युज्यते सम्यक् सा तुर्ये विनिरूप्यत इति ॥

शुद्धपुष्टिलीलास्थजीवानां तु न ब्रह्मणि सायुज्यमुद्धरणं च। अत एव गोपानामेव मग्नत्वमुद्धृतत्वमुक्तं, न व्रजसुन्दरीणाम् । अत एव दामोदरदासादिषु लीलानुभवः स्पष्टः सङ्गच्छते । नन्वलौकिकदेहाप्तौ देहस्यानित्यत्वमायातम् । तद्विषयिण्या लीलाया अपीति चेन्न पुरुषोत्तमस्य लीलाया नित्यत्वं श्रुतिस्मृतिन्यायादिसिद्धम्। उपपादितं चास्मत्प्रभुचरणैर्विद्वन्मण्डने भक्तिविषयिण्या लीलाया अपि नित्यत्वं, ध्रुवासोऽस्य कीरय इति श्रुतिसिद्धम् । यथाऽक्षरब्रह्मणः सर्वत्र व्यापकत्वमेवं भगवद्भक्तस्यालौकिकाकारस्य व्यापकत्वेन प्राकृतशरीरेऽपि तिरोहिततया वर्त्तमानमानन्दाकाररूपम् । अत एव, निराकारास्तदिच्छयेत्युक्तं श्रीमदाचार्यचरणैः । आनन्दस्यैवाकारत्वेन तत्तिरोधाने निराकारत्वम्। तत्प्रादुर्भावे साकारत्वमेवं तद्विषयिण्या लीलायास्तदैवाविर्भावः । अतो नानित्यत्वमिति दिक् । येषां तु सायुज्यं, तेषामलौकिकाकारप्रादुर्भावार्थमेव लयः । मर्यादायास्तथात्वात् । येषां च न, तेषां तच्छरीर एवालौकिकाकारस्याविर्भावात् । ननु लीलानुभवार्थमाविर्भावे पुरुषोत्तमेन सह भेदो जीवस्यायात इति चेत्, सत्यम् । अत्र लीलास्थानां ब्रह्मरूपत्वेन न भेद इति । वस्तुतस्तु जीवस्याभेदोऽक्षरब्रह्मणा सह । अभेदबोधकाश्च श्रुत्यादयोऽक्षरब्रह्माऽभेदं बोधयन्ति, न पुरुषोत्तमाऽभेदम् । तथाच श्रीमदाचार्यचरणाः, पुरुषोत्तमे लयेन लीलाऽननुभवे नाश एव स इति। अत एव श्रीमत्प्रभुचरणपौत्रैर्देवकीनन्दनैः, 'अक्षरेण सहैक्यं हि जीवस्य श्रुतयो जगुरित्युक्तम् । अत एव परेणाऽभेदबोधको मार्गस्तामसानामिति पाद्म उत्तरखण्ड उक्तं शिवेन ।

श्रृणु देवि प्रवक्ष्यामि तामसानि यथाक्रमम् ।

येषां स्मरणमात्रेण पातित्यं ज्ञानिनामपीति प्रतिज्ञाय, शैवपाशुपतवैशेषिकन्यायसांख्यचार्वाकबौद्धशास्त्राणि तामसानीत्युक्त्वा ।

मायावादमसच्छास्त्रं प्रच्छन्नं बौद्धमुच्यते ।
मयैव कथितं देवि कलौ ब्राह्मणरूपिणा ॥
अपार्थं श्रुतिवाक्यानां दर्शयँल्लोकगर्हितम् ।

कर्मस्वरूपत्याज्यत्वमत्रैव प्रतिपाद्यते ॥
सर्वकर्मपरिभ्रष्टं विकर्मत्वं तदुच्यते ।
परेशजीवयोरैक्यं मयाऽत्र प्रतिपाद्यते ॥
ब्रह्मणस्तु परं रूपं निर्गुणं वक्ष्यते मया ।
सर्वस्य जगतोऽप्यत्र मोहनार्थं कलौ युगे ॥
वेदार्थवन्महच्छास्त्रं मायावादमवैदिकम् ।
मयैव कथितं देवि जगतां नाशकारणादिति ॥

नागोजीभट्टस्तु मार्कण्डेयान्तर्गतदेवीमाहात्म्यटीकायां, मायावादमितिश्लोके चरणत्रयं यथास्थितं पठित्वा जगतां नाशकारणादिति पपाठेति, तत्तु प्राचीनार्वाचीनसन्दर्भावलोकनेन ब्राह्मणरूपिणेति प्रतिभातीति तुच्छमेवेति । अत एव सायुज्यं लयः । सह युनक्तीति सहयुक्, सहयुजो भावः सायुज्यमित्यर्थद्वयं ब्रह्मपरब्रह्मविषयत्वेन सङ्गतं भवतीति दिङ्मात्रमुक्तम् ॥ ८९ ॥

ननूद्धारानन्तरं तस्य कथं स्थितिस्तत्राहुः ।

उद्धृतौ परमक्लेशो विरहाऽनलसम्भवः
यदा देहादिनाशाय समर्थो जायते तदा ॥ ९० ॥
निजं श्रीमत्कृष्णचन्द्रः स्वाधिकारानुसारतः ।
परमानन्दलीलां तामनुभावयति प्रभुः ॥ ९१ ॥

उद्धृताविति * । भक्तस्य ब्रह्मानन्दादुद्धृतौ । विरहानलाद्वियोगाग्नेः सकाशात् सम्भव उत्पत्तिर्यस्य, एतादृशो यः परमक्लेशो देहादिनाशाय यदा समर्थो जायते, तदेत्यन्वयः । यद्वा परमक्लेशो विरहानलसम्भवस्ताप इति शेषः । तदा तस्मिन् काले ॥ ९० ॥

निजं जीवं परमकारुणिकः श्रीमत्कृष्णचन्द्रो यथाधिकारं परमानन्दलीलामनुभावयतीत्यर्थः । गणितानन्दव्यावृत्त्यर्थं परमेत्यानन्दस्य विशेषणम् । ताम् *अनुग्रहैकलभ्याम् । प्रभुः* समर्थः । अनुभवे भक्तस्य प्राधान्यं तदुदितं प्राक् । रसो वै सः, रसं ह्येवायं लब्ध्वानन्दी भवति, को ह्येवान्यात् कः प्राण्याद् यदेष आकाश

आनन्दो न स्यात्, एष ह्येवानन्दयातीति श्रुतिः। अत्र रसात्मकभगवत्स्वरूपलाभे सत्यानन्दी भवतीत्यानन्दवत्त्वमुक्त्वा जीवनहेतुत्वं परमानन्दहेतुत्वं चोच्यते। मरणहेतूपस्थित्यभावे जीवनहेतुं न वदेत्। अतो रसस्य संयोगवियोगभावत्वेन पूर्णतया विरहतापस्योपमर्दकत्वेन प्राणस्थितिरपि न स्यात् । यद्येषः स्फुरद्रूपः, आनन्दः आकाशो भगवान् न स्यात्। को वा जीवयेन्न कोपीत्यर्थः । एतादृशापन्निवारणं भगवतः एवेति ज्ञापनाय श्रुतौ हिशब्दः । तादृशस्य जीवनमावश्यकमिति ज्ञापनायैवकारः । तापात्मकस्यानन्दरूपत्वाथानन्दपदम्। तदनन्तरं प्रगटीभूय तदन्यः को वा दर्शनस्पर्शाश्लेषणभाषणादिभिः स्वरूपानन्ददानेनाऽन्यात् पूर्वतापनिवृत्तिपूर्वकमानन्दपूर्णं कुर्यादित्यर्थः। अन्यथाऽन्यात् प्राण्यादित्युभयत्रानितेः सस्वात् पौनरुक्त्यं स्यादिति। श्रीमद्भाष्यकारचरणैः, स्पष्टो ह्येकेषामिति सूत्रे, एकेषां शाखिनां भगवत्स्वरूपलाभानन्तरं दुःखतन्निवर्तनलक्षणोऽर्थः स्पष्टः पठ्यत इत्युक्तमिति विस्तरावलोकनेच्छुभिस्ततोऽवधेयम्। दुःखस्य परमफलरूपत्वं तु भाष्यविद्वन्मण्डनादौ निरूपितम्। मयाऽपि श्रुतिरहस्यप्रकाशे प्राकाशि ॥ ९१ ॥

एतत्प्राप्तौ मुख्यं कारणमाहुः ।

इति श्रीवल्लभाचार्यचरणाब्जकृपाभरात् ।
प्राप्यते नान्यथा चैतद् ब्रह्मादीनां सुदुर्लभम् ॥ ९२ ॥

इति श्रीवल्लभाचार्येत्यादि * । आचार्यवान् पुरुषो वेदेति श्रुतेः। कृष्णाऽमृताऽधरास्वादसिद्धिरत्र न संशयः इति वाक्यात्। 'सान्निध्यमात्रदत्तश्रीकृष्णप्रेमा विमुक्तिदः। रासलीलैकतात्पर्यः कृपयैतत्कथाप्रद' इति वाक्याच्च * ब्रह्मादीनां सुदुर्लभमिति *

न स्त्रियो व्रतसुन्दर्यः पुत्र ताः श्रुतयः किल ।
नाहं शिवश्च शेषश्च श्रीश्च ताभिः समा क्वचित् ॥
षष्टिवर्षसहस्राणि मया तप्तं तपः पुरा ।
तथापि न मया प्राप्तास्तासां वै पादरेणव इति बृहद्वामनपुराणवाक्याल्लीलाप्रधानभक्तचरणरेणुरपि दुर्लभस्तदा श्रीकृष्णाऽधराऽमृतास्वादनाद्यतिदुर्लभतरमिति भावः ॥ ९२ ॥

ज्ञानिनां मुक्तिमाह ।

ये तु ज्ञानैकसन्निष्ठास्तेषां तु लय एव हि ।
भक्तानामेव भवति लीलाऽऽस्वादोऽतिदुर्लभः ॥ ९३ ॥

ये त्विति * ऋते ज्ञानान्न मुक्तिः । ज्ञानादेव च कैवल्यमिति । * लय एव हीति * न स पुनरावर्तत इति श्रुतेः । ननु सिद्धान्तेऽक्षरब्रह्मणा सहैक्ये भगवतोद्धारः क्रियत इति, न स इतिश्रुति विरोध इति चेन्न । अनया संसारावर्त्तनं निषिध्यते, न तु ब्रह्मातीतपुरुषोत्तमप्राप्तिः ।

आब्रह्मभुवनाल्लोकाः पुनरावर्त्तिनोऽर्जुन ।

मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यत इति भगवद्वाक्यात् । विशेषतो निरूपणं तु भाष्यविद्वन्मण्डनादौ । यत्राक्षरप्राप्तावपि न पुनरावर्तते, तत्र तदतीतप्राप्तौ तत्सम्भावनापि नेति । * भक्तानामेवेति *

मुक्तानामपि सिद्धानां नारायणपरायणः ॥

सुदुर्लभः प्रशान्तात्मा कोटिष्वपि महामुन इति भागवतवाक्यान्नारायणभक्तस्यातिदौर्लभ्यम् ।

नारायणादिरूपाणि ज्ञातान्यस्माभिरच्युत ।
सगुणं ब्रह्म सर्वेदं वस्तुबुद्धिर्न तेषु नः ॥
ब्रह्मेति पठ्यतेऽस्माभिर्यद्रूपं निर्गुणं परम् ।
वाङ्मनोगोचरातीतं ततो न ज्ञायते तु तदित्याद्युक्त्वा ॥

आनन्दमात्रमिति यद् वदन्तीह पुराविदः ।

तद्रूपं दर्शयाऽस्माकं यदि देयो वरो हि न इत्यादिबृहद्वामनपुराणे श्रुतिप्रार्थनावाक्यात् तत्परस्य पुरुषोत्तमस्य भक्तानां श्रैष्ठ्ये किमु वाच्यम् । तत्र ताभिः स्तुतो भगवान् अक्षरब्रह्मस्थं श्रीवृन्दावनश्रीयमुनाश्रीगिरिगोवर्द्धनादिलोकं, तत्रस्थितश्रीगोपिकाकदम्बस्थितस्वस्वरूपं दर्शयित्वा, भगवानाह, ब्रूत किं करवाणि व इति । ततः श्रुतयो नित्यसिद्धगोपिकावन्मनोरथं याचितवत्यः । ततः ।

दुर्लभो दुर्घटश्चैव युष्माकं, सुमनोरथः ।

मयाऽनुमोदितः सम्यक् सत्यो भवितुमर्हतीत्याहेति लीला-

स्वादोऽनुग्रहैकलभ्योऽतोऽतिदुर्लभो लीलास्वादो भक्तानामेव भवतीत्यर्थः । तत्रैव पुराणे ।

स्त्रियो वा पुरुषा वाऽपि भक्तिभावेन केशवम् ।

हृदिकृत्वा गतिं यान्ति श्रुतीनां नात्र संशय इतिवाक्यात् । एतत्पुराणवाक्यानि विद्वन्मण्डने प्रभुचरणैर्निरूपितानि ॥ ९३ ॥

एवं निरूप्य समाप्तिं प्रतिजानते ।

इति श्रीश्रीमदाचार्यचरणाब्जप्रसादतः ।
प्रोक्तं गिरिधरेणेदं पश्यन्तु हरिभावुकाः ॥ ९४ ॥

इति श्रीश्रीमदाचार्येत्यादि * अत्र श्रीद्वयोपादानमुभयभागस्थितस्वामिनीवाचकम् । तेन लीलास्थपुरुषोत्तमत्वमत एषां चरणाब्जप्रसादेऽयं रसः सदास्वाद्यो भवतीति बोध्यते ॥ ९४ ॥

एतद्ग्रन्थावलोकनकर्तॄणां फलमाहुः ।

सूर्योदये शीतमपैति सर्वं
मार्गावलोको जलजप्रकाशः ।
तमो निवृत्तिर्द्विजकर्मवृत्ति-
स्तथैव मार्तण्डनिबन्धबोधे ॥ ९५ ॥

इति श्रीमन्मुकुन्दरायमहजमाधुरीपरमाऽनिर्वचनीयमरमवदनतामरससुधाहृदावगाहिश्रीमदाचार्यकृपापारस्पारश्रीमत्प्रभुचरणात्मजमहाराजश्रीयदुनाथकुलोद्भवगोस्वामिश्रीगोपालजनुषा श्रीगिरिधरेण विरचितः शुद्धाद्वैतमार्तण्डः समाप्तिमफाणीत् ।

सूर्योदय इत्यादि * । * तथैवेति * शीतस्य जाड्यरूपत्वेन जाड्यं गच्छति । निजाचार्यप्रगटितमार्गज्ञानम् । भक्तहृदयाब्जप्रकाशः । तमोऽज्ञानं तस्य निवृत्तिः । द्विजस्य ब्राह्मणादेः सूर्योदये सन्ध्यावन्दनादिकर्मसु यथा वृत्तिः प्रवृत्तिस्तथा ब्रह्मसम्बन्धिनः, कर्माप्येकं तस्य देवस्य सेवेति वचनाद् भगवत्सेवारूपकर्मणि प्रवृत्तिः ।

आत्मनिवेदिनामेव भगवत्सेवायामधिकारः । आत्मनिवेदिनो हि भगवत्सेवार्हा, नेतरे । गायत्र्युपदेशजसंस्कारवदिति श्रीप्रभुचरणाः । तथाच गायत्र्युपदेशेन द्विजत्वमेवमात्मनिवेदनेनात्र भगवत्सेवाधिकारत्वसम्पादकद्विजत्वम् । यथा जन्म ब्राह्मणकुले, तदनु-गायत्र्युपदेशे कर्माधिकार, एवं शरणमन्त्रोपदेशे वैष्णवत्वं, तदन्वात्मनिवेदने सेवाधिकार इति भावः । निबन्धो * ग्रन्थः ॥ ९५ ॥

इति श्रीयदुनाथानां कुलचूडामणेर्गुरोः ।
श्रीमद्गिरिधरस्याङ्घ्रिसरोरुहपरागलिट् ॥ १ ॥
रामकृष्णः स्वबोधाय व्यरचत् तत्कृपालवात् ।
शुद्धाद्वैताख्यसिद्धान्तमार्तण्डस्य प्रकाशकम् ॥ २ ॥
यदिदं सदसद्वापि प्रोक्तं धार्ष्ट्यान्मयात्र हि ।
तत्र श्रीवल्लभाचार्याः क्षमयन्तु निजेश्वराः ॥ ३ ॥

इति श्रीमदखण्डपाण्डिताडम्बरखण्डनप्रचण्डवचनमरीचिश्रीमदाचार्याऽऽत्मजश्रीमत्प्रभुचरणात्मजश्रीमहाराजश्रीयदुनाथकुलकमलप्रकाशकरश्रीमद्गोपालात्मजश्रीमद्गिरिधरचरणकमलमकरन्दमधुपायमाननेतोपनामकरामकृष्णभट्टविरचितः शुद्धाऽद्वैतमार्तण्डप्रकाशः समाप्तिमगमत् ।

श्रीगिरिधारी तनोतु मङ्गलानि ।

प्रमेयरत्नार्णवः ।

श्रीबालकृष्णभट्टविरचितः ।

गोपीनूतनरूपयौवनमहामाधुर्यलाभोन्मदं
वृन्दाकानननिर्मितोज्ज्वलमयस्वच्छन्दरासोत्सवम् ।
श्रीमद्वल्लभविठ्ठलप्रकटितप्रेमाख्यभक्तिप्रियं
वेदान्तोक्तरसात्मकं प्रभुमहं गोवर्द्धनेशं भजे ॥ १ ॥

नन्दाङ्गनालालितवक्त्रचन्द्रो
विधीशदुष्प्रापपदारविन्दः ।
विराजतां मूर्द्धनि भक्तिगम्यः
श्रीबालकृष्णः कुलदैवतं मे ॥ २ ॥

आनन्दमूर्त्तिं श्रुतिमूर्द्धसिद्धं
श्रीकृष्णमप्राकृतधर्मयुक्तम् ।
यः प्रापयद्दैवजनान् स्वपुष्ट्या
श्रीवल्लभं तं प्रभुमाश्रयामि ॥ ३ ॥

वेदान्तसिद्धं पुरुषोत्तमस्य
स्फुटीकृतं येन रसात्मकत्वम् ।
गोपाङ्गनाप्रेमनिमग्नचित्तं
श्रीविठ्ठलं तं प्रणमामि भक्त्यै ॥ ४ ॥

अथ सुबोधिनीनिबन्धभाष्यविद्वन्मण्डनादिषु स्थितानि प्रमेयानि रत्नानीव सञ्चिनोमि । तत्र भगवद्भजनोपयोगितया प्रपञ्चस्वरूपज्ञानस्य निबन्धोक्तरीत्या प्रथमं तदेव विविच्यते । स आत्मानꣳ स्वयमकुरुत, स हैतावानास, स वै सर्वमिदं जगत्, इदं सर्वं यदयमात्मा, आत्मैवेदं सर्वं, स सर्वं भवति, पुरुष एवेदꣳ सर्वमित्यादिश्रुतिभिर्ब्रह्मात्मकः प्रपञ्चो ब्रह्मकार्यं इति सिद्धान्तः । अविकृतपरिणामवादस्वीकारात् । तथोपपादितं भाष्यकारैः, आत्मकृतेः परि-

णामादित्यत्र। अतो न मायिको, न वा भगवद्भिन्नः, किं तु सत्यत्वादाविर्भावतिरोभावशाली, नोत्पत्तिविनाशवान्। नासतो विद्यते भावो नाभावो विद्यते सत इति वाक्यात्। एवञ्च प्रागभावचतुष्टयमपि नात्रेति ज्ञेयम्। ननु प्रपञ्चस्य ब्रह्माभिन्नत्वेऽपि प्रापञ्चिकघटपटादीनां घटः पटोनेत्यादिप्रतीतिसिद्धोऽन्योन्याभावो दुर्निवारः। अन्यथा घटेनावरणरूपं पटकार्यं स्यादिति चेन्न। बहु स्यामितिश्रुतिसिद्धयेच्छया घटे पटत्वादीनां सर्वेषामेव तिरोभावात्। एकस्य घटत्वस्यैव घटे आविर्भावान्न कार्यान्तरसङ्करः। एवं सति सर्वत्र सर्वे ब्रह्मधर्माः सन्तोऽपि तत्तद्व्यक्तौ तत्तत्कार्यकर्तृत्वस्य भगवता नियमितत्वान्न कार्यान्तरं कर्त्तुं समर्था भवन्ति। अतः प्रमाणसिद्धाभ्यामाविर्भावतिरोभावाभ्यां सर्वकार्यसिद्धौ, नाऽन्योन्याभावोऽङ्गीकर्तव्यः। सर्वं सर्वमयमिति तापनीयश्रुतेः। अत एव, तद्धैतत् पश्यन्नृषिर्वामदेवः प्रतिपेदे अहं मनुरभवं सूर्यश्चेत्यादावुक्तः सर्वभावो युज्यते।

एवमन्योऽन्याभावे निराकृते पदार्थमात्रस्य सर्वरूपत्वेनात्यन्ताभावोऽपि दूरीकृतो ज्ञेयः। तथाहि भूतले घटो नास्तीत्यत्र हि घटानुपलम्भेऽपि तद्भूतले वस्त्वन्तरस्य तृणादेराकाशस्य वा विद्यमानत्वात् तृणादिना आकाशेन वा घटस्यापि सत्त्वान्नात्यन्ताभावः।

अतः सर्वस्य सर्वरूपत्वात् सर्वस्य सर्वत्र विद्यमानत्वाच्च सर्वस्य ब्रह्मत्वमिति शुद्धो ब्रह्मवादः। कारणरूपस्य ब्रह्मणः कार्यरूपेणाविर्भावात् तत्प्रयुक्तं कार्यत्वं निखिलप्रपञ्चे, आत्मकृतेः परिणामात्, पटवच्चेति सूत्राभ्याम्। एतदुक्तं निबन्धीयसर्वनिर्णयप्रकरणे, प्रपञ्चभावो भगवत्येव लीनः प्रकटीभवतीति। अवान्तरकार्येषु घटपटादिषु त्वयं प्रकारः। भगवदिच्छया कारणरूपायां मृदि विद्यमानस्य भगवद्रूपघटस्याविर्भावः। एवं सति यस्मिन् भगवद्रूपे रूपान्तरस्याविर्भावस्तत्कारणम्। यथा मृत्। यस्य प्राकट्यं तत् कार्यं, यथा घट इति कार्यकारणव्यवस्था बोध्या। तथोक्तं निबन्धे, मृदादि भगवद्रूपं घटाद्याकारसंयुतमिति। अतः सर्वं खल्विदं ब्रह्मेति श्रुत्युक्तं ब्रह्मात्मकत्वं निराबाधमेव। 'मनसा वचसा दृष्ट्या गृह्यतेऽन्यैरपीन्द्रियैः। अहमेव न मत्तोऽन्यदिति बुद्ध्यध्वमञ्जसा' इति भा-

गवतोपबृंहणाच्च । परन्तु व्यामोहिका माया जीवं व्यामोहयित्वा तद्दीयबुद्धौ प्रापञ्चिकसद्वस्तुसदृशं मायिकं पदार्थमुत्पाद्य पुरःस्थित-विषये प्रक्षिपति । तदा पदार्थग्रहणे तस्यापि ग्रहणात् तद्विशिष्टज्ञानं भ्रमात्मकं भवति । तथा सति वस्तुग्रहे मायिकधर्माणामपि ग्रह-णाद्, 'यदिदं मनसा वाचा चक्षुर्भ्यां श्रवणादिभिः । नश्वरं गृह्यमा-णं च विद्धि मायामनोमयम् । देहं मनोमात्रमिमं गृहीत्वा, त्वय्यु-च्चवाश्रयति यस्त्रिविधो विकारो मायान्तराऽऽपतति नाद्यपवर्गयोर्य-त्, स्वप्नाभमस्तधिषणं पुरुदुःखदुःखमित्यादिवाक्यानि सावका-शानि भवन्ति । इमानि तादृक्प्रतीतिमूलकानि प्रमाणान्यवलम्ब्य विवर्त्तादिवादानां प्रवृत्तिः । पुराणादौ तादृशवादमूलमायिकत्वो-क्तिर्वैराग्यार्थमुपयुज्यत इति व्यवस्थापितं तत्त्वदीपे । अतः प्रतीतिरेव मुग्धानां मायिकी, न वस्तुनि कश्चिद्दोषः स्वाभाविकः । अत एव ब्रह्माणं प्रति भगवतोक्तम् । 'ऋतेऽर्थं यत् प्रतीयेत न प्रतीयेत चा-त्मनि । तद्विद्यादात्मनो मायां यथा भासो यथा तम' इति । एतद्व्या-ख्याने सुबोधिन्यामुक्तं, तया व्यामोहिता बुद्धिः पदार्थानन्यथा म-न्यते, न तु पदार्था अन्यथा भवन्तीति । अग्रे चोक्तं, प्रमाणभूतो वेदः सर्वं खल्विदं ब्रह्मेत्याह । ब्रह्मविदां प्रतीतिरपि तथा । भ्रान्तप्रतीतेस्तु नार्थनियामकत्वम् । अन्यथा भ्रमदृष्ट्या गृहीतं जगद् भ्रमरूपमेव स्यात् । अतो विषयता काचित् स्वीकर्त्तव्या । यया दृष्टिर्निर्विषया स्यादिति । एवममुपपाद्य स्पष्टीकर्तुं पुनः फलितमुक्तं, विषयता मा-याजन्या, विषयो भगवानिति । एवं सति अब्रह्मविदां विषये विषयता च प्रतीयते इत्युक्तं, भवति । यथा भ्राम्यतः पुरुषस्य, घटो भ्राम्य-तीति प्रत्यक्षे घटगताऽऽकृत्यादिर्वस्तुभूता प्रतीयते । भ्रमणं तु विषय-तारूपम् । विषयरूपं भगवदात्मकं वस्तुभूतम् । यत् पुनस्तत्रैवोत्पत्ति-विनाशकुत्सितत्वान्योन्याभावादि प्रतीयते तद्विषयतारूपं भ्रमणव-न्मायिकं भासते । तथा घटपटादिरूपं जगत् प्रतीयते, न तु मायिकं बोध्यम् । इदमेव विविच्य सुबोधिन्याम्, ऋतेऽर्थं यत् प्रतीयेतेत्यस्यैव व्याख्याने उक्तम् । अतो विषयताजनितं ज्ञानं भ्रान्तम् । विषयजनितं प्रमेतीति । विषयता च द्विधा सुबोधिन्यां विवृता । सा च विषयता द्विधा । आच्छादिकैका । अन्यथाप्रतीतिहेतुश्चापरेत्यारभ्य तस्माद्द-र्पणे मुखजननवत् तेजोऽभावेऽन्धकारजननवन्मायामोहितपुरुषबुद्धा-

षपि विषयताद्वयं जनयतीत्यर्थ इत्यन्तेन ग्रन्थेन। विषयताद्वयं कर्मभूतं माया जनयतीति फक्किकार्थः । पुनर्विषयताद्वयस्यापि स्वरूपं निगमयितुमग्रे भणितम् । तत्रैका ब्रह्मरूपतां न प्रकाशयति। एका तु जगद्रूपा विषयतेति। इह ब्रह्मरूपतां न प्रकाशयतीत्युक्त्या, ऋतेऽर्थं यत् प्रतीयेत न प्रतीयेत चात्मनीत्यत्र, अर्थो न प्रतीयत इति यदुक्तं तदुपपादितम् । एका तु जगद्रूपा विषयतेत्युक्त्या, अर्थम् ऋते यत् प्रतीयेतेति पूर्वं यदुक्तं तत् समर्थितम् । जगद्रूपा विषयता जगदिव सत्यमिव रूपं यस्याः सा जगद्रूपेति समासो ज्ञेयः । एतदेव, यथा भासो यथा तम इति दृष्टान्तेन मूले विवेचितम् । नच जगद्रूपा विषयतेत्युक्त्या दृश्यमानस्य जगतो विषयतात्वं स्वीक्रियतामिति वाच्यम्। विषयो भगवान् विषयता मायाजन्येत्यनेन विषयरूपस्य जगतो विषयतायाः पृथक्त्वस्वीकारात् । अन्यथा ब्रह्मणो विषयत्वस्य वक्तुमशक्यत्वाज्जगतश्च विषयतारूपत्वाङ्गीकाराद्विषयो भगवानित्युक्तिरेव बाधिता स्यात् । अतो जगद्रूपा विषयतेत्यस्याऽस्मदुक्त एवार्थो ज्ञेयः । प्रापञ्चिकनीलवस्तुसदृशं विषयतारूपं नीलं तमः प्रतीयते । इयमेव जगद्रूपा विषयता ।

इदं तु विशिष्य ज्ञेयम् । माया हि कुत्रचिद्विषयतारूपधर्मं सृजति । कुत्रचिद्धर्मिणं विषयतारूपम्। भ्रमरिकादृष्ट्या गृहीते घटे भ्रमणं विषयतारूपम् । तेजोऽभावे तु धर्मी विषयतारूपोऽन्धकारः । एवमुभयविधा विषयता जगत्समानाकारा। अत एव जगद्रूपेत्युच्यते । एवञ्च विषयतया पदार्थानामन्यथाभानं, न तु पदार्था अन्यथेति निष्कर्षः । यतो विषयताद्वयमाच्छादकाऽन्यथाप्रतीतिहेतुरूपं ब्रह्मज्ञानेन नाश्यते । तदुक्तं सुबोधिन्यामत्रैव । तदुभयव्यावृत्त्यर्थं प्रमाणानीति भाव इति ।

अयं प्रपञ्चोऽधिकारभेदेन त्रिधा भासते । तत्र ब्रह्मभूतानां ब्रह्मात्मक एव शुद्धो भासते । यथा यस्मिन् क्षणे स एव शुक्लो गृह्यते तद्वत्। शास्त्रोत्पन्नज्ञानिनां तु ब्रह्मधर्ममायाधर्मयुक्तस्तत्तद्धर्मसत्यत्वमिथ्यात्वविवेकपूर्वकं भासते। यथा पटस्वरूपौपाधिकहरितत्वयुक्तपटे गृहीतेऽपि पटगताऽऽकृत्यादीनां सत्यत्वं, हरितताया मायिकत्वं बुध्यते तद्वत् । अविवेकिनां तु ब्रह्मधर्ममायाधर्मयुक्तस्तत्तद्धर्माणामेकरूपज्ञानपुरःसरं भासते । यथा हरितकाचोपनेत्रयुतचक्षुषा

बालेन गृहीतः पटस्तद्गताऽऽकृत्यादेरौपाधिकहरितत्वादेश्च सत्यत्वावबोधपूर्वकं भासते तथा । एवं सति भान एव भेदो, न स्वरूपे । अतः प्रपञ्चस्य ब्रह्माभिन्नत्वात् सत्यत्वमङ्गीकार्यं श्रुतिशरणैः । ये पुनरुत्पत्तिविनाशकुत्सितत्वभेदादयो धर्माः प्रतीयन्ते, ते मायिका इति सुधीभिराकलनीयम् ।

भगवन्मूर्त्यादौ तु भिन्नः प्रकारः । तथाहि । भगवन्मूर्तिं पश्यतो भक्तिरहितस्य बुद्धौ माया विषयतां सृजति, न तु भगवन्मूर्तौ विषयतां प्रक्षिपति । तत्र भगवद्गुणानामभिव्यक्ततया मायायाः प्रक्षेपसामर्थ्याभावात् । किं तु तादृग्द्रष्टुर्बुद्धावावरणस्य विद्यमानत्वाद्भगवन्मूर्तावन्यथा भानम् । वस्तुतस्तु तत्र भगवत्त्वं निर्दुष्टमेव। अत एव, विष्णोर्वा वैष्णवानां कलिमलमथने पादतीर्थेऽम्बुबुद्धिरित्यादिवाक्यैरन्यथाबुद्धेर्निन्दितत्वं श्रूयते । 'शिलाबुद्धिर्न कार्या च तत्र नारद कर्हिचित् । ज्ञानानन्दात्मको विष्णुर्यत्र तिष्ठत्यचिन्त्यकृद्, इत्यादिवचोभिस्तत्र भगवदावेशकथनात् प्रपञ्चवैलक्षण्यमङ्गीकार्यम् । मल्लिङ्गमद्भक्तजनदर्शनस्पर्शनार्चनमित्येकादशवाक्यात् । पूजनं प्रतिमायां तु उत्तमं परिकीर्तितमिति कालनिर्णयदीपिकास्थविष्णुधर्मवाक्याच्च । निबन्धे च, 'तदभावे स्वयं वापि मूर्तिं कृत्वा हरेः क्वचित् । परिचर्यां सदा कुर्यात् तद्रूपं तत्र च स्थितम्' इत्यस्य व्याख्याने, वस्तुविचारे सर्वस्यापि भगवद्रूपत्वाद्विशेषस्त्वयम् । एनम् उद्धरिष्यामीति, तदा मृदादेः प्रादुर्भूत इत्यादिना प्रपञ्चवैलक्षण्यस्योपपादितत्वाच्च । अत एव महता प्रबन्धेन मूर्तिपूजनं श्रीमद्भागवतैकादशस्कन्धे भगवता श्रीमदुद्धवं प्रत्युक्तमिति दिक् ।

एवमेव यमुनागङ्गादिजलेषु तुलसीगोपीचन्दनादिषु तादृशभक्तेषु साधारणवस्तुवैशिष्ट्यमाप्तवाक्यबलेनैवादरणीयम् । तत्तत्सेवकैस्तत्र तत्रोद्धृत्युपयोगिधर्माणामुपलभ्यमानत्वात् । अत एव भगवन्मूर्त्यादिसम्बन्धाद् बहूनां भगवत्प्राप्तिः पुराणादौ स्मर्यते । वाचनिके शास्त्रे वाचनिक्येव व्यवस्थेति, न शुष्कतर्कैर्भ्रमितव्यमित्यलं लेखेन ।

नन्‌ सर्वस्य ब्रह्मात्मकत्वे सर्वान्तःपातिनो देहस्यापि तथात्वेन तत्र जायमानाया आत्मबुद्धेः प्रमात्वापातः । नचेष्टापत्तिः । देहात्म-

बुद्धेः श्रीमद्भागवतादौ निन्दितत्वादिति चेत् । सत्यम् । अजातब्र-ह्मज्ञानस्य देहं विकारवत्त्वेन पश्यतो मायामोहवशाज्जाताया देहा-त्मबुद्धेरेव सर्वशास्त्रेषु निन्दा । सर्वत्र ब्रह्मत्वेन पश्यतः स्वदेहेऽपि तथा भानाद्भवन्ती आत्मबुद्धिः प्रमारूपैव । तथाह भगवान् भाष्य-कारः, आत्मकृतेरित्यत्र, देहात्मबुद्धिस्तु सत्यां विकारबुद्धौ दोष इति ।

ननु, त्वय्यद्वितीये भगवन्नयं भ्रम इत्यादिवाक्यानां का गति-रिति चेत् । अहन्ताममतात्मकस्य संसारस्य मिथ्याभूतस्यैतादृश-वाक्यविषयत्वमिति बोद्धव्यम् । तथाच प्रपञ्चो ब्रह्मात्मकः । संसार-स्तु अहन्ताममतात्मको मिथ्याभूत एव । एतच्च सुष्ठूपपादितं निब-न्धादिष्विति विशेषजिज्ञासायां ततोऽवधेयमिति दिक् ।

इति श्रीमद्गोवर्द्धनधरश्रीवल्लभाचार्यश्रीविठ्ठलेश्वरचरणानु-चरसेवकेन लालूभट्टोपनामबालकृष्णेन कृते प्रमेय-रत्नार्णवे प्रपञ्चविवेकः सम्पूर्णः ॥ १ ॥

अथ जीवस्वरूपं विचार्यते । तत्र तत्त्वमसि श्वेतकेतो, एषोऽणुरात्मा चेतसा वेदितव्यः, ममैवांऽशो जीवलोके, नाणुरतच्छ्रुतेरिति चेन्नेतराधिकारात्, न नौ पश्यन्ति कवयश्छिद्रं जातु मनागपीति श्रुतिगीताव्याससूत्रसमाधिभाषावाक्यैर्ब्रह्माभिन्नोऽणुर्ब्रह्मांऽशो जीव इति राद्धान्तः । तस्य चावस्थात्रयम् । शुद्धसंसारिमुक्तभेदात् । तथाहि कारणभूतादक्षरब्रह्मणः सकाशाद्यथाग्नेः क्षुद्रा विस्फुलिङ्गा व्युच्चरन्तीति श्रुतेः सच्चिदानन्दात्मकोऽणुरंशो निःसरति । व्युच्चरणानन्तरं कारणरूपाऽक्षरगतस्य, विशुद्धसत्त्वं तव धाम शान्तमित्यादिप्रमाणसिद्धस्य भगवद्धर्मात्मकस्य विशुद्धसत्त्वस्यांशभूतेन तादृक्सत्त्वेन भगवदिच्छया प्रबलीकृतेनानन्दांशस्तिरोभवति । तदा निरुपाधिकोऽणुरूपोऽक्षरांशश्चित्प्रधानस्तिरोहितानन्दो जीवशब्दवाच्यो भवति । तदुक्तं वेदस्तुतिसुबोधिन्यां, स्वकृतपुरेष्वमीष्वित्यत्र, जीवो नाम भगवतश्चिदंश इति । स्फुटीकृतं च भाष्ये, आनन्दांशस्तु पूर्वमेव तिरोहितो येन जीवभाव इति । अत्र पूर्वमेवेत्यस्य भगवदैश्वर्याद्यंशभूतैश्वर्यादितिरोभावात् पूर्वमित्यर्थः । निबन्धे च, ततः साकारा भगवद्रूपा अपि उच्चनीचभावेच्छया निर्गता इति निराकारा जाता इत्युक्तम् । इहाकारशब्देनानन्दाकार उच्यते । आनन्दो ब्रह्मवादे आकारसमर्पक इति तत्र निर्णयात् ।

ननु व्यापकाद् ब्रह्मणो व्युच्चरणं न सम्भवतीति चेन्न । व्यापकत्वेऽपि विरुद्धधर्माश्रयतया, व्युच्चरन्तीतिश्रुतिसिद्धस्य व्युच्चरणस्याङ्गीकारात् । एवं सति व्युच्चरणोपादानभूताद् ब्रह्मणो व्युच्चरतो ब्रह्मभूतस्य ब्रह्मभूते प्रदेशे ब्रह्मभूतं व्युच्चरणमित्युक्ते न कश्चिद्दोषः । सर्वं खल्विदं ब्रह्मेति श्रुतेः । तथैवोक्तं भगवता, 'यत्र येन यतो यस्य यस्मै यद्यद्यथा यदा । स्यादिदं भगवान् साक्षात् प्रधानपुरुषेश्वर' इति । अतो व्युच्चरणे सत्यानन्दांशतिरोधानाज्जीवत्वम् । व्युच्चरणोत्तरम्, आनन्दांशतिरोधाने सत्यविद्यासम्बन्धात् पूर्ववर्त्तिन्यामवस्थायां शुद्धजीव इति व्यवहारः । शुद्धसत्त्वव्यवस्थितिरिति लक्ष्मीतन्त्रात् । जीवे शुद्धत्वं त्वविद्यासम्बन्धराहित्यम् । ततोऽस्मिञ्जीवरूपे भगवदंशे भगवदैश्वर्यादिषड्गुणांशभूतानामैश्वर्यादीनां हरीच्छया तिरोभावः । पराभिध्यानात्तु तिरोहितं, ततो ह्यस्य बन्धविपर्ययाविति तत्त्वसूत्रात् । तदा तेषां मध्ये केषुचिज्जीवेषु रमणेच्छया विचारि-

तस्य बहुत्वभवनस्य सिद्धये उच्चभावेच्छाविषयीभूतं मुक्त्यधिकाररूपं सूक्ष्मसद्वासनाविशिष्टं दैवत्वं सम्पादयति भगवान्। तदैव जीवा मुक्तियोग्या भवन्ति। दैवी सम्पद्विमोक्षायेति भगवद्वाक्यात्। ततो ह्यविद्यासम्बन्धाद् बन्धः। बन्धोऽस्याऽविद्ययानादिरिति वाक्यात्। अनादित्वं तु कार्यान्तरापेक्षया। अमरेष्वमरत्ववत्। तदुपपादितं विद्वन्मण्डने। ततो देहेन्द्रियान्तःकरणाध्यासाः स्वरूपविस्मृतिश्चे-त्यविद्यायाः पञ्चपर्वाणि। तैर्बद्धो दुःखितः। अस्य जीवसंसार उच्यत इति निबन्धात्। उच्यते, न तु जायते। अभिमत्यात्मकत्वात्। ततः सूक्ष्मस्थूलदेहसम्बन्धात् संसारिधर्माञ्जन्ममरणादीन् अनुभवन् भगवत्कृपया सत्सङ्गादि लब्ध्वा पञ्चपर्वात्मिकां विद्यां प्राप्य परमानन्दलक्षणां मुक्तिं लभते।

वैराग्यं सांख्ययोगौ च तपो भक्तिश्च केशवे।

पञ्चपर्वैति विद्येयं यया विद्वान् हरिं विशेदितिवाक्यात्। तत्र यावत् पञ्चपर्वात्मिकां विद्यां प्राप्नुयात्। तावत् संसारीति व्यवहारः। तदग्रे मुक्त इति शास्त्रीयो व्यवहारः।

स च मुक्तजीवो द्विविधः। जीवन्मुक्तो मुक्तश्चेति। तत्र सनकादयो गताविद्यास्ते जीवन्मुक्ता उच्यन्ते। ये तु व्यापिवैकुण्ठेतर-भगवल्लोकवासिनस्ते मुक्ता इत्युच्यन्ते। ततः परमकृपया परममुक्ति-स्तत्र तु शुद्धब्रह्मत्वमेवेति निर्णयः। केचिदुत्तमा दैवास्तु सत्सङ्गादि प्राप्य मार्गरुचिजन्यश्रवणादिसमुद्भूतस्वतन्त्रभक्त्या फलरूपया नित्यलीलायां प्रविशन्ति। स तेषां मोक्षः। ये तु दैवजीवेभ्यो व्यतिरिक्तास्तेषां षड्गुणतिरोधानानन्तरम्, अविद्यासम्बन्धे नीचभावेच्छा-विषयीभूतं मुक्तिप्रतिबन्धकमसद्वासनाविशिष्टमासुरत्वं सम्पादयति भगवान्। तदा ते आसुरजीवा उच्यन्ते। ते ह्यसद्वासनावशात् तादृशं स्थूलदेहं प्राप्य निन्दितकर्मनिरताः सन्तो नीचयोनिगा भवन्ति। ते सर्वदा संसारिण एव। 'क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु। आसुरीं योनिमापन्ना मूढा जन्मनि जन्मनि। मामप्राप्यैव कौन्तेय ततो यान्त्यधमां गतिमिति' वाक्यात्। तेषां तु तदैवाऽविद्याकार्यनाशो यदा भगवानात्मरतीच्छुर्भवति। तदा भगवानविद्या-कार्यं संसारं सर्वत्र स्थितं स्वयमेव जीवकृतसाधनानपेक्षो नाशयति। तदा तेषामासुराणां सर्वदोषाणां नाशात् पुनः शुद्धजीवत्वं भवति।

तत्र सर्वत्र जडजीवात्मकप्रपञ्चे तिरोधानकृतवैजात्यनाशार्थं चिदानन्दौ प्रकटयति । तदा पूर्वोक्तजीवेष्वप्यंशद्वयप्राकट्यम् । ततः प्रपञ्चो भगवति लीयते । तदैक एव भगवान् । अक्षरस्यापि पुरुषोत्तमाभिन्नतया स्थितिः । यो विशिष्येत सोऽस्म्यहमिति भगवद्वाक्यात् । भवानेकः शिष्यते शेषसंज्ञ इति श्रीदेवकीवाक्याच्च । सुबोधिन्यां तथैव व्याख्यातत्वाच्च । अत एव, कृष्णस्यात्मरतौ त्वस्य लयः सर्वसुखावह इति निबन्धे उक्तम् ।

इदमत्र ज्ञेयम् । जीवा द्विविधा दैवा आसुराश्च । तत्र दैवा अपि द्विविधा मर्यादामार्गीयाः पुष्टिमार्गीयाश्च । तस्माज्जीवाः पुष्टिमार्गे भिन्ना एव न संशय इति पुष्टिप्रवाहमर्यादानिरूपणग्रन्थात् । भेदकस्तु बीजरूपो निरुपाधिको भावः । स च भगवता अविद्यासम्बन्धात् पूर्वं दैवत्वसम्पादनानन्तरं मर्यादामार्गीयजीवेभ्यो भेत्तुं विशेषानुग्रहेच्छया पुष्टिमार्गीयफलं प्रापयिष्यत्येवम् । स तूत्तरत्राधिकारविवेके विवेचयिष्यते । मर्यादामार्गीया जीवास्तु ज्ञानभक्तिकर्मयोगादिभिः सच्छास्त्रप्रतिपादितैर्यथायथं मिलिता बहुविधा ज्ञेयाः । तेऽपि मुक्तावधिकारिणः । अतो मुक्तिः पुष्टिमार्गीयाणां मर्यादामार्गीयाणां च । अत एवेतरौ भिन्नौ सान्तौ मोक्षप्रवेशत इत्याचार्यवाक्यात् । परं तु मुक्तौ यो भेदः स उत्तरत्र प्रपञ्चयिष्यते ।

नन्विदं सर्वं जीवस्याणुत्वे सम्भवेत् । तत्तु सर्वदेहव्यापिचैतन्योपलब्ध्यन्यथानुपपत्तिसिद्धेन व्यापकत्वेन बाधितमिति चेन्न । अविरोधश्चन्दनवदिति तत्त्वसूत्रे चन्दनदृष्टान्तेनाणुत्वेऽपि सर्वशरीरव्यापिचैतन्योपलब्धेः साधितत्वात् । ननु चन्दनस्यैकदेशवर्तित्वं प्रत्यक्षेण गृहीत्वा तच्छैत्यं सकलशरीरे लभमानस्तद्बलेनैकदेशस्थस्यापि चन्दनस्य तादृक् सामर्थ्यं कल्पयति । जीवे तु शरीरैकदेशवर्त्तित्वस्य प्रत्यक्षेणानिर्द्धाराद् दृष्टान्तवैषम्येण तादृशसामर्थ्यसिद्ध्यभावान्न पूर्वोक्तसमाहितिरिति चेन्न । प्रमाणवर्षाभ्यः, कतम आत्मा योऽयं विज्ञानमयः प्राणेषु, हृद्यन्तर्ज्योतिः पुरुषः स वा एष आत्मा, हृद्येष आत्मेत्यादिश्रुतिभ्य एकदेशस्थायित्वस्य निश्चयात् । एतदाह सूत्रकारः । अवस्थितिवैशेष्यादिति चेन्नाभ्युपगमाद्धृदि हीति । किञ्च । यथा वृक्षस्य संपुष्पितस्य दू-

राद्गन्धो वात्येवं पुण्यस्य कर्मणो दूराद्गन्धो वातीति श्रुतेर्गन्धस्य द्रव्याधिकदेशवर्तित्वमेवं चैतन्यगुणोऽप्यधिकदेशवर्ती । जीवस्य शरीरैकदेशहृदयस्थायित्वेऽपि सर्वदेहे चैतन्योपलम्भो भवत्येव । तदाह सूत्रकृत् । व्यतिरेको गन्धवदिति । नच चम्पकाद्यवयवानां सूक्ष्माणां दूरदेशे प्रसृतत्वात् तत्र गन्धोपलब्धिः सुवचेति वाच्यम् । हिङ्ग्वादेरनेकचर्मपुटादिवेष्टितत्वेनावयवनिर्गमनाभावेऽपि गन्धग्रहणात् । लशुनस्पृशि करादौ बहुधा क्षालनेनावयवाऽभावेऽपि गन्धानपायाच्च । एतच्च सुष्ठूपपादितं प्रभुचरणैर्विद्वन्मण्डने । नच, स वा एष महानज आत्मेति श्रुतेर्व्यापकत्वमिति वाच्यम् । नाणुरतच्छ्रुतेरितिचेन्नेतराधिकारादिति तत्त्वसूत्रेण ब्रह्माधिकृत्येयं श्रुतिः प्रवृत्तेति प्रदर्श्याणुत्वस्यैव साधितत्वात् ।

ननु नित्यः सर्वगतः स्थाणुरचलोऽयं सनातन इति भगवद्वाक्याद् व्यापकत्वमिति चेन्न । ब्रह्म वेद ब्रह्मैव भवतीतिश्रुतेर्ब्रह्मभावे सति भगवद्धर्माविशे जायमानस्य व्यापकत्वस्य भगवद्वाक्यविषयत्वात् । तदुक्तं निबन्धे, व्यापकत्वश्रुतिस्त्वस्य भगवत्त्वेन युज्यत इति । तर्हि व्यापकतायामणुत्वस्य निवृत्तेरवास्तवमणुत्वमितिचेन्न । ब्रह्मणो विरुद्धधर्माश्रयत्वेन अणुरूपेऽपि व्यापकताया अदोषात् । एतदुपपादितं निबन्धे । अण्वपि ब्रह्म व्यापकं भवति । यथा कृष्णो यशोदाक्रोडे स्थितोऽपि सर्वजगदाधारो भवतीत्यन्तेन । अतो जीवोऽणुरेव । तस्य चैतन्याख्यो गुणः सर्वदेहं व्याप्नोति । तदुक्तं नारदपञ्चरात्रे लक्ष्मीतन्त्रे त्रयोदशाध्याये ।

चैतन्यमस्य धर्मो हि प्रभा भानोरिवामला ।

तया स्फुरति जीवोऽसौ स्वत एवानुरूपयेति । यथाग्नेः क्षुद्रा विस्फुलिङ्गा व्युच्चरन्तीति श्रुतिः स्पष्टमेवांशत्वं ब्रूते । सूत्रकारोऽप्यंशो नानाव्यपदेशादन्यथाचापि दाशकितवादित्वमधीयत एके, इत्यनेनांशतां स्फुटं निरणयदिति पूर्वोक्तमखिलमनवद्यम् ।

इति श्रीगोवर्द्धनधरश्रीवल्लभाचार्यश्रीविठ्ठलेश्वरचरणानुचरसेवकेन लालूभट्टोपनामबालकृष्णभट्टेन कृते प्रमेयरत्नार्णवे जीवविवेकः समाप्तिमगात् ॥ २ ॥

अथ मूलरूपं विचार्यते ।

तत्र कृषिर्भूवाचकः प्रोक्तो णश्च निर्वृतिः वाचकः ।

तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयते ।

ॐ तत् सत् परं ब्रह्म कृष्णात्मको नित्यानन्दैकस्वरूपः सोहमों तद्गोपाल एव परं सत्यमबाधितमिति । परं ब्रह्मैतद्यो ध्यायति रसति भजतीत्यादिश्रुतेर्मत्तः परतरं नान्यत् किञ्चिदस्ति धनञ्जय, अक्षरादपि चोत्तम इति भगवद्वाक्याच्च श्रीकृष्णः परं ब्रह्मेति निष्कर्षः । अत एव, परं ब्रह्म तु कृष्णो हीति मुक्तावल्यां श्रीमदाचार्यैरुक्तम् । स चापाणिपादो जवनो ग्रहीता, अप्राणो ह्यमनाः शुभ्र इत्यादिश्रुतेः प्राकृतपाणिपादादिरहितः सच्चिदानन्दविग्रहः । आनन्दं ब्रह्मणो रूपं, 'सच्चिदानन्दरूपाय कृष्णायाक्लिष्टकर्मणे । नमो वेदान्तवेद्याय गुरवे बुद्धिसाक्षिणे, सर्वतःपाणिपादं तद् इत्यादिश्रुतेरानन्दमूर्तिमजहादतिदीर्घतापम्, आनन्दमात्रकरपादमुखोदरादिरित्यादिपुराणतन्त्राभ्यामानन्दात्मककरचरणादिरूपो, निष्कलं निष्क्रियं शान्तं, सर्वकामः सर्वगन्धः, परास्य शक्तिर्विविधैव श्रूयते इत्यादिश्रुतिभिरप्राकृतधर्माधारः । तदुक्तं निबन्धे ।

सर्वाधारं वश्यमायमानन्दाकारमुत्तमम् ।

प्रापञ्चिकपदार्थानां सर्वेषां तद्विलक्षणमिति । तथाच निषेधकश्रुतीनां प्रातीतिकप्राकृतधर्मविषयत्वं, धर्मविधायकोपनिषदां त्वप्राकृतनित्यश्रौतधर्मविषयत्वमिति व्यवस्थया त्वविरोधोऽस्मत्सिद्धान्ते । यदाह भगवान् भाष्यकारः । प्रतीतं च निषेध्यं, नाप्रतीतं, न श्रुतिप्रतीतमिति । स च परमकाष्ठापन्नः पुरुषोत्तमशब्दवाच्यः कृष्णः सदा प्रकटालौकिकसर्वधर्मा नित्यसर्वलीलः । दशमस्य विशुद्ध्यर्थं नवानामिह लक्षणमितिशुकवाक्याद्, यस्य लीला नवविधाः स शुद्धः पुरुषोत्तम इति निबन्धात् । श्रीकृष्णं परमानन्दं दशलीलायुतं सदेति स्पष्टमेव श्रीभागवतप्रकरणारम्भे निरूपितत्वाच्च ।

स हि द्विभुजचतुर्भुजादिरूपैर्बृहद्वनवृन्दावनव्यापिवैकुण्ठादिषु तत्तद्भक्तैः सह रममाणः सर्वदा विजयते ।

परिपूर्णतमः कृष्णो वैकुण्ठे गोकुले स्वयम् ।

चतुर्भुजश्च वैकुण्ठे गोकुले द्विभुजः स्वयमिति ब्रह्मवैवर्तात् ।

अत एव परमानन्दः । रसो वै सः । एतमानन्दमयमात्मानमुपसंक्रामतीत्यादिश्रुतेः । आनन्दमयोऽभ्यासात् । पुरुषविधोऽन्वयोऽत्र चरमोन्नमयादिषु य इति तत्त्वसूत्रश्रीभागवतीयश्रुतिस्तुतिभ्यां च । एतच्च भाष्यसुबोधिन्योः स्फुटम् । अत एव आत्मानन्दसमुद्रस्थं कृष्णमेव विचिन्तयेदिति मुक्तावल्यामुक्तम् ।

तस्यैव बहुस्यां प्रजायेयेति श्रुत्युक्तयेच्छया सकलकारणकारणभूतं रूपान्तरमाविर्भवति । तस्मिन् रूपे भगवद्धर्मात्मकसत्त्वेनाऽऽनन्दांशस्तिरोहित इव भवति । तदा तद्रूपमक्षरब्रह्मशब्दवाच्यं भवति । तदक्षरं ब्रह्म अधिकारिभेदेन द्विधा स्फुरति । तत्र भक्तानां पुरुषोत्तमधामव्यापिवैकुण्ठाद्यात्मकत्वादिधर्मवत् प्रतीयते । अव्यक्तोऽक्षर इत्युक्तस्तमाहुः परमां गतिं, यं प्राप्य न निवर्तन्ते तद्धाम परमं ममेति गीतावाक्यात् । 'दर्शयामास लोकं स्वं गोपानां तमसः परम् । सत्यं ज्ञानमनन्तं यद् ब्रह्म ज्योतिः सनातनमिति श्रीभागवताच्च । अत एवोक्तं निबन्धे । प्रभुत्वेन हरेः स्फूर्तौ लोकत्वेन तवुद्भव इत्यादि । भक्तप्रत्यक्षविषयीभूतेऽस्मिन्नक्षररूपे केषाञ्चिद् गुणानां प्राकट्यमन्येषां भगवद्गुणानां तिरोधानमेवेति ज्ञेयम् । नच तिरोभावस्याज्ञानमूलकतया न ब्रह्मणि स इति वाच्यम् । आविर्भावतिरोभावौ शक्ती वै मुरवैरिण इति वाक्याद् भगवच्छक्तित्वात् । ननु विद्यमानस्य प्रतीत्यविषयता तिरोभावः । तथा सति सर्वज्ञे ब्रह्मणि न सम्भवस्तस्य । तदानीं जीवस्याभावात् तद्बुद्ध्यभिप्रायेणापि न वक्तुं शक्य इति चेन्न । सतः पदार्थस्य स्वकार्याकारित्वं तिरोभाव इति लक्षणात् । अत एव ब्रह्मनिष्ठस्य प्रलयकर्तृत्वादेः प्रपञ्चस्थित्यवसरे स्वकार्याकारित्वरूप एव तिरोभावोऽङ्गीक्रियते । एवं सर्वत्र बोध्यम् । सद्विषयकप्रतीत्यभावरूपस्तु तिरोभावो मायाकृतो बद्धजीवधर्म एतद्भिन्न इति दिक् ।

प्रकृतं वदामः । ज्ञानिनां तु सच्चिदानन्दत्वदेशकालापरिच्छिन्नत्वस्वयम्प्रकाशत्वगुणातीतत्वादिस्वरूपं भासते । व्यतिरेकस्तद्भावभावित्वान्न तूपलब्धिवदित्यत्र भाष्येऽक्षरस्य द्वेधा स्फूर्त्तिनिरूपणात् । अतो ज्ञानिनां प्रकाशमानेऽक्षरे ब्रह्मणि सर्वेषां धर्माणां तिरोभावादेकस्यास्तिरोधानशक्तेरेव प्राकट्यान्निर्द्धर्मकमिति व्यवह्रियते । 'संसुप्तवच्छून्यवदप्रतर्क्यं तन्मूलभूतं पदमामनन्ति । शब्दो न

यत्र पुरुकारकवान् क्रियार्थो माया परैत्यभिमुखे च विलज्जमाना । तद्वै पदं भगवतः परमस्य पुंसो ब्रह्मेति यद्विदुरजस्रसुखं विशोकम्' इत्यादिवाक्यात् । न तु श्रुत्युक्तधर्मशून्यम् । तथा सत्यसतः सत्ता स्यात् । विश्वतश्चक्षुरुत विश्वतोमुख इत्यादिश्रुत्युक्तधर्मस्वीकारे औपाधिकपक्षो वा स्यात् । अतो वेदोक्तधर्माणां तिरोभाव एव, न त्वभावः । अभावास्त्वस्मन्मते तिरोभावातिरिक्ता न भवन्तीति द्वितीयस्कन्धसुबोधिन्याम् । नचैवं ब्रह्मणि दुःखं नास्तीत्युक्तेर्दुःखतिरोभावस्वीकाराद् दुःखसत्तापत्तिरिति वाच्यम् । दुःखस्य मायिकत्वेन मिथ्यात्वात्तदभावस्यापि मिथ्यात्वस्वीकारात् । अत एव कैश्चिन्निर्द्धर्मवादिभिः स्थूलत्वाद्यभावानां मिथ्यात्वमङ्गीकृतम् । अन्यथा ह्यभावनिरूपितं द्वैतं स्यादिति । अतो मायिकधर्माणां भ्रान्तप्रतीतिमात्रसिद्धानां दुःखादीनां मिथ्यात्वेन तदभावस्यापि मिथ्यात्वम् । वन्ध्यासुततदभाववत् । श्रुत्युक्तधर्मप्रतियोगिका अभावास्तु तिरोभावात्मका इति विवेकः । अतस्तिरोभावस्वीकारे न कश्चिद्दोषः । तदेवं तिरोहितसर्वशक्तिकं सर्वव्यवहारातीतमेकं ब्रह्मणो रूपम् । 'ये त्वक्षरमनिर्देश्यमव्यक्तं पर्युपासते । सर्वत्रगमचिन्त्यं च कूटस्थमचलं ध्रुवम्' इतिगीतावाक्ये एतदेव स्वरूपमुक्तम् । तथाच पुरुषोत्तमशब्दवाच्यं श्रीकृष्णस्वरूपमेकम् । अक्षरं द्वितीयम् । तच्च पूर्वोक्तरीत्या द्विविधमिति ब्रह्मणो रूपत्रयं दर्शितम् । पुरुषोत्तमस्य तस्यैव सर्वनियमनादिकार्यसिद्ध्यर्थं सूर्यमण्डलादौ पृथिव्या अधिदैवादिषु स्थितं यद् रूपं तदन्तर्यामिशब्दवाच्यम् । य आदित्ये तिष्ठन्नादित्यादन्तरो यमादित्यो न वेद यस्यादित्यः शरीरं य आदित्यमन्तरो यमयत्येष त आत्मा अन्तर्याम्यमृत इति श्रुतेः । भेदव्यपदेशाच्चान्य इति सूत्राच्च । य इमं च लोकं परं च लोकं सर्वाणि भूतान्यन्तरो यमयतीत्युपक्रम्य यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरो यं पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथिवीमन्तरो यमयत्येष त आत्मा अन्तर्याम्यमृत इति श्रुतेः । अन्तर्याम्यधिदैवादिषु तद्धर्मव्यपदेशादिति सूत्राच्च । अयं पुरुषशब्देनोच्यते ।

> विष्णोस्तु त्रीणि रूपाणि पुरुषाख्यान्यथो विदुः
> प्रथमं महतः स्रष्टृ द्वितीयं त्वण्डसंस्थितम् ।
> तृतीयं सर्वभूतस्थं तानि ज्ञात्वा विमुच्यत इति वाक्यात् ।

अयं हि सर्वेषां लीलावताराणां मत्स्यादीनां मूलम्। लीलावतारान् पुरुषस्य भूम्न इति द्वितीयस्कन्धात्। ते च पुनरवताराः कस्येत्यपेक्षायां, यस्तु भूमा पुरुषो ब्रह्माण्डादधिकोऽन्तर्यामिरूपो द्वितीयध्यान उक्तस्तस्यावतारा इति सुबोधिन्यां व्याख्याततत्वाच्च। द्वितीयध्यानं तु, केचित्, स्वदेहान्तर्हृदयावकाशे प्रादेशमात्रं पुरुषं वसन्तमित्यत्रोक्तम्। एतद्व्याख्याने पुरुषादतिरिक्तं रूपमतिरेकार्थं भजन्ते। अतिरिक्तमपि पुरुषाकारं वसन्तं तृतीयपुरुषमिति सुबोधिन्यामुक्तम्। एवं सति तृतीयं सर्वभूतस्थमित्यत्रोक्तमन्तर्यामिरूपमिति सूचितम्। अत एव, यत्रोद्यतः क्षितितलोद्धरणाय बिभ्रदित्यस्याभासे, अन्तर्यामिस्वरूपे, प्रादेशमात्रं पुरुषं वसन्तमित्यादिपदैर्यन्निरूपितं भगवत्स्वरूपं तस्यात्र दशावतारा उच्यन्ते इति सुबोधिन्यामुक्तम्। एते चांशकलाः पुंसः कृष्णस्तु भगवान् स्वयमित्यत्र एष एवान्तर्यामी पुंशब्देनोक्तः।पुंसो नारायणस्य ब्रह्माण्डमूर्तेरंशाः कलाश्चेति व्याख्याततत्वात्। अत एव, य आदित्ये तिष्ठन्नित्यारभ्य, स त आत्मान्तर्याम्यमृत इत्यत्रोक्तस्यान्तर्यामिणो नारायणत्वं स्मर्यते। 'ध्येयः सदा सवितृमण्डलमध्यवर्ती नारायणः सरसिजासनसन्निविष्टः। केयूरवान् मकरकुण्डलवान् किरीटी हारी हिरण्मयवपुर्धृतशङ्खचक्र' इति। अतः पुरुषोत्तमस्य रूपान्तरमन्तर्यामिसंज्ञकमेकम्। सर्वे तस्यावताराः। एते चांशकलाः पुंसः कृष्णस्तु भगवान् स्वयमिति वाक्यात्। अक्षराग्निर्गमनं येषामन्तर्यामिणामुक्तं ते त्वेतस्य मुख्यान्तर्यामिणोऽंशा बोध्याः। ते ह्यानन्दप्रधाना जीववत्प्रतिशरीरं भिन्ना नियतनियामकत्वधर्माणस्तत्तज्जीवमात्रनियामकाः। जडजीवान्तर्यामिष्वेकैकांशप्राकट्यादिति। तत्तु समन्वयादिति सूत्रभाष्ये एत एवोक्ताः।

अतः परं लीलावताराणां गुणावताराणां च स्वरूपं विविच्यते। तत्र, विशुद्धसत्त्वं तव धाम शान्तं, सत्त्वं यस्य प्रिया मूर्तिः, सत्त्वं विशुद्धं श्रयते भवान् स्थिताविल्यादिवाक्येभ्यः प्राकृसत्त्वादितरद् भगवद्धर्मात्मकं सत्त्वमस्ति। एवं प्राकृतरजस्तमोभ्यामितरे भगवद्धर्मात्मके रजस्तमसी अपि स्तः। विशुद्धसत्त्वं तव धाम शान्तमित्यस्य सुबोधिन्यां, त्रयाणामप्यप्राकृतत्वानिरूपणात्। सत्त्वं रजस्तम इति निर्गुणस्य गुणास्त्रय इत्यत्र भगवद्गुणत्वेन त्रयाणामुक्तेः। सुबोधिन्यां तथा व्याख्याततत्वाच्च। तत्र अप्राकृतसत्त्वं स्वचिकीर्षितमत्स्या-

द्याकृतिं विधाय तत्रायःपिण्डे वह्निरिवाविर्भूय तत्तत्कार्याणि करोति । अस्मिन् विशुद्धसत्त्वात्मके विग्रहे जगत्स्थितिकार्यचिकीर्षया वह्न्ययोगोलकन्यायेनाविश्य विष्णुसंज्ञां भजते । स गुणावतारो विष्णुः । अप्राकृते रजसि विग्रहभूते वह्न्ययोगोलकन्यायेन प्रविश्य ब्रह्मसंज्ञां भजते । अप्राकृते तमसि विग्रहभूते वह्न्ययोगोलकन्यायेन प्रविष्टः शिवशब्दवाच्यो भवति । एते त्रयो गुणावतारा अप्राकृतदेहा अपि प्राकृतसत्त्वरजस्तमसां, सत्त्वं रजस्तम इति प्रकृतेर्गुणास्तैर्युक्तः परः पुरुष इत्यादिप्रमाणसिद्धानां पूर्वोक्तभगवद्धर्मसत्त्वादिभ्यो भिन्नानां नियामकतया सगुणा उच्यन्ते । अत एवैते पुराणादिषु परब्रह्मधर्मवत्त्वेन स्तूयन्ते । अंशिना कृष्णेनाभेदात् । अत्रैतावान् विशेषः । त्रयाणां गुणावतारत्वेऽपि विष्णौ चतुर्भुजाद्याकाराणां पीताम्बरवनमालादीनां पुरुषोत्तमधर्माणां बहूनां प्रकटत्वेन ब्रह्मशिवापेक्षया उत्कृष्टत्वं ज्ञेयम् । अत एव, श्रेयांसि तत्र खलु सत्त्वतनोर्नृणां स्युरिति श्रीभागवते उक्तम् ।

एतावता ग्रन्थेन सिद्धमेतत् । मूलरूपस्य चत्वारि रूपाणि । तत्रैकं पुरुषोत्तमस्वरूपं श्रीकृष्णशब्दवाच्यम् । एकम् अक्षरं स्वरूपम् । तच्च पूर्वोक्तरीत्या द्विविधम् । एकमन्तर्यामिरूपम् । एवं चातुर्विध्यं ज्ञेयम् । इदमलौकिकं प्रमेयं वेदान्तप्रतिपाद्यं भगवत्कृपैकलभ्यं यथाबुद्धि मया निरूपितम् । विशेषजिज्ञासायां तु भाष्यसुबोधिनीनिबन्धविद्वन्मण्डनादयो ग्रन्था अवलोकनीया इत्यलं लेखेन ।

इति श्रीमद्गोवर्द्धनधरश्रीवल्लभाचार्यश्रीविट्ठलेश्वरचरणानुचरसेवकेन लालूभट्टोपनामबालकृष्णेन कृते प्रमेयरत्नार्णवे मूलरूपविवेकः सम्पूर्णः ॥ ३ ॥

अथेदं विचार्यते । का पुष्टिः, कश्च पुष्टिमार्ग इति ।

तत्र, पोषणं तदनुग्रह इति शुकवाक्यात्, कृष्णानुग्रहरूपा हि पुष्टिः कालादिबाधिकेति निबन्धोक्तत्वाच्चानुग्रहरूपो भगवद्धर्मः पुष्टिः । सा च विलक्षणा लौकिकालौकिकफलसाधिका । अतोऽधिकारिविशेषे निःसाधने श्लाघ्यफलं जनयन्ती तेनैवानुमीयते । तदुक्तं निबन्धे, अनुग्रहो लोकसिद्धो गूढभावान्निरूपित इति । अर्थस्तु गूढभावादनुग्रहस्य गूढत्वाल्लोकसिद्धो लोके उत्तमफलजननेन प्रकटीभूतोऽनुग्रहो निरूपितः षष्ठस्कन्धे वर्णितः । तत्कार्यं विवेचितमजामिलादिषु । यतो निन्दितकर्मनिरतः सङ्केतितभगवन्नाम्ना मोचितः । विश्वरूपदधीचिवृत्राणां कर्मिज्ञानिभक्तानां हन्ताऽनिष्टफलभोगयोग्यः शक्रोऽपि पुष्ट्या रक्षितः । दितिगर्भो वज्रहतोऽपि न मृतः । प्रत्युत बहुत्वं सम्पन्नम् । अत एवोक्तम्,

एवमिन्द्रे महापुष्टिः सर्वबाधा निरूपिता ।
सर्वबाधकरूपा हि दैत्ये पुष्टिरथोच्यत, इति

महापुष्टित्वं तु बलवत्प्रतिबन्धनिवृत्तिपूर्वकस्वपादावाप्तिसाधकत्वम् । सर्वबाधेत्यत्र सर्वशब्देन कालकर्मस्वभावा ग्राह्याः । तदिह कुत्सितकर्मणामनिष्टफलाजनकत्वेन तद्बाध इन्द्रे स्पष्टः । दितिगर्भप्रसङ्गे वज्रप्रहारस्य प्राणवियोगसाधकत्वस्वभावबाधो ज्ञेयः । 'न ममार दितेर्गर्भः श्रीनिवासानुकम्पया । बहुधा कुलिशक्षुण्णो द्रौण्यस्त्रेण यथा भवान्' इतिवाक्यात् । एवमन्यत्रापि बोध्यम् ।

इयं च पुष्टिश्चतुर्विधपुमर्थान् साधयति । अत एव सुबोधिन्यामुक्तम्, सहस्रार्जुनो भगवदंशः पुष्ट्या राजा बभूवेति । निबन्धे देवहूतिमुक्तिश्च पुष्टिकारणिका निरूपिता । योगादीनां तु व्यापारत्वमुक्तमेव, अजामिलादिषु नामादीनामिव । तदुक्तं निबन्धे, नामाध्यानार्चनादिकं, पुरस्कृत्य हरेर्वीर्यं नामादिषु निरूप्यत इति । इदं सामान्यानुग्रहस्वरूपम् । पुष्टिविशेषस्तु केवलं भगवत्स्वरूपफलिकां भक्तिं साधयति । अतस्तज्जन्या भक्तिः पुष्टिभक्तिरित्युच्यते । तदुक्तं सिद्धान्तमुक्तावल्याम् । अनुग्रहः पुष्टिमार्गे नियामक इति स्थितिरिति । पुष्टिमार्गे पुष्टिभक्तिमार्गे इत्यर्थः । तदनुग्रहैकलभ्यां भक्तिं च नुमस्तदीयांश्चेति भक्तिहेतुनिर्णयेऽपि । अत एव, भक्त्या कार्यरूपया पुष्टिविशेषोऽनुमीयते । तदुक्तं पुष्टिप्रवाह-

मर्यादानिरूपणे । भक्तिमार्गस्य कथनात् पुष्टिरस्तीति निश्चय इति । अयमर्थः । मनोगतिरविच्छिन्ना यथा गङ्गाम्भसोऽम्बुधाविल्यारभ्य, स एव भक्तियोगाख्य आत्यन्तिक उदाहृत इत्यन्तं, ग्रन्थादौ भागवते भक्तिमार्गस्य निर्गुणस्य निरूपणाद् भक्तिसत्तायां सिद्धायां तादृशा भक्त्या तत्कारणीभूता पुष्टिरनुग्रहरूपा भगवत्यस्तीति निश्चय इत्यर्थः । सापीशानुकथाशब्देन नवमस्कन्धे व्यवह्रियते । ईशस्य अनुगामिनां कथा भगवच्छ्रवणादिरूपं चरित्रमित्यर्थः ।

तच्च द्विविधं, मर्यादाभक्तिरूपं, पुष्टिभक्तिरूपं च । तत्र विशेषानुग्रहजन्या या भक्तिः सा पुष्टिभक्तिः । तल्लक्षणं तु भगवत्स्वरूपातिरिक्तफलाकाङ्क्षारहितत्वे सति भगवत्स्वरूपात्मकफलाकाङ्क्षावत्त्वम् । अत एव, अक्षण्वतां फलमित्यत्र स्वरूपस्यैव फलत्वं निरणायि । अतः पुष्टिमार्गीया न तदरिक्तं कामयन्ते । न योगसिद्धीरपुनर्भवं वा मय्यर्पितात्मेच्छति मद्विनाऽन्यदिति भगवद्वाक्यात् । एतच्च, वीक्ष्यालकावृतमुखं तव कुण्डलश्रीति पुष्टिभक्तव्रजसुन्दरीवाक्ये स्पष्टम् । भक्तिहंसे च निरूपितं, भक्तौ च न स्वरूपातिरिक्तफलकत्वमित्यनेन ।

सा पुष्टिभक्तिश्चतुर्धा । प्रवाहपुष्टिभक्तिमर्यादापुष्टिभक्तिपुष्टिपुष्टिभक्तिशुद्धपुष्टिभक्तिभेदात् । 'पुष्ट्या विमिश्राः सर्वज्ञाः प्रवाहेण क्रियारताः । मर्यादया गुणज्ञास्ते शुद्धाः प्रेम्णातिदुर्लभा' इति वाक्यात् । पुष्ट्येत्यादि । ये पुष्टिभक्ताः पुनः पुष्ट्या विमिश्रा अनुग्रहान्तरेण भजनोपयोगिज्ञानजनकेन युक्तास्ते सर्वज्ञा भवन्ति । सर्वशब्देन प्रभुतल्लीलातत्परिकरप्रपञ्चस्वरूपादि ग्राह्यम् । सर्ववस्तूनां यथोक्तस्वरूपं विदित्वा ये भजन्ते ते पुष्टिभक्ता इत्यर्थः । प्रवाहेणेति । प्रवाहस्याहन्ताममतात्मकसंसारप्रधानत्वात् तद्धर्मेण केवलं कर्मरुचयः, पुष्टिभक्तत्वाच्च भगवदुपयोगिक्रियायां प्रवर्त्तन्ते प्रवाहपुष्टिभक्ताः । मर्यादयेति । मर्यादा हि जीवस्य रागतो विषयप्रवृत्तिं निराकृत्य निवृत्तिमार्गीयधर्मेषु योजयति । अतो मर्यादया मिश्रणाद्विषयासक्तिमविभाव्य भगवत्कथाश्रवणादौ ये प्रवर्तन्ते ते मर्यादापुष्टिभक्ताः । शुद्धाः प्रेम्णेति । ये केवलं प्रेमप्रधानाः परिचर्यागुणगानादिकं स्नेहेनैव कुर्वन्ति तेऽत्यन्तं दुर्लभाः सर्वोत्कृष्टा इत्यर्थः । स्नेहोत्पत्त्यनन्तरं स्वव्यसनतः क्रियमाणः श्र-

वणादिरुत्तमः पुष्टिभक्तिरिति भक्तिहंसे तेषामेव भक्तेः स्वरूपमुक्तम्। न तु सामान्यतः पुष्टिभक्तिस्वरूपम् । स्नेहानन्तर्यकथनानुक्तमपदप्रयोगाच्च ।

इदमत्र ज्ञेयम्, जीवैः पुष्टिपुष्टिभक्त्यर्थं यतनीयम् । भगवद्भक्त्युपयोगिज्ञानं सम्पाद्य भगवान् भजनीयः । चतुर्थी शुद्धपुष्टिभक्तिस्तु भगवद्दत्ता प्राप्यते। भक्तिः शुद्धा स्वतन्त्रा च दुर्लभेति न सोच्यत इति निबन्धात्। नचानुग्रहे वैलक्षण्याभावात् तज्जन्यभक्तौ कथं नानात्वमिति शङ्क्यम्। 'नेमं विरञ्चो न भवो न श्रीरप्यङ्गसंश्रया। प्रसादं लेभिरे गोपी यत्तत् प्राप विमुक्तिदात्। नायं श्रियोऽङ्ग उ नितान्तरतेः प्रसादः स्वर्योषितां नलिनगन्धरुचां कुतोऽन्याः। रासोत्सवेऽस्य भुजदण्डगृहीतकण्ठलब्धाशिषां य उदगाद् व्रजवल्लवीनाम्' इत्यादिवाक्यैस्तथाऽवधारणात् । अतोऽनुग्रहविशेषेण पुष्टिभक्तिर्लभ्यते। तया भगवांस्तदधीनो भवति। वशे कुर्वन्ति मां भक्त्येत्यादिवाक्यैः। कृष्णाधीना तु मर्यादा स्वाधीना पुष्टिरुच्यत इति निबन्धोक्तेश्च। इह पुष्टिशब्देन पुष्टिभक्तिः । यत्र च भक्तस्य स्वातन्त्र्यं तदिच्छानुसारेण भगवत्कृतिर्यथा दामोदरलीलायां सा पुष्टिरिति व्याख्यास्वारस्यात्। पुष्टिः स्वार्था परार्था तु भक्तिः सा नवमी मतेत्यादिवाक्येषु पुष्टिशब्देनानुग्रह एव ग्राह्यो, न पुष्टिभक्तिः। तथैव ग्रन्थाऽर्थसिद्धेः । तदेवं सुबोधिनीनिबन्धादिषु पुष्टिशब्देन क्वचिदनुग्रहः, क्वचित् तज्जन्या भक्तिरुच्यते । स एव च पुष्टिमार्ग इति सहृदयैर्विभावनीयम्।

नच भगवत्स्वरूपातिरिक्तफलकाङ्क्षारहितत्वं प्रवाहपुष्टिभक्त्यादावव्याप्तं, तादृग्भावस्य शुद्धपुष्टिभक्तेष्वेव प्रसिद्धेरिति वाच्यम् । शुद्धपुष्टिभक्तेतरपुष्टिभक्तेष्वपि मोक्षान्तफलाकाङ्क्षाविरहस्य सिद्धत्वात्। नारायणपरा लोके न कुतश्चन बिभ्यति । स्वर्गापवर्गनरकेष्वपि तुल्यार्थदर्शिन इति वाक्यात्। इदं वाक्यं न शुद्धपुष्टिभक्तपरम्। एतादृशस्तु पुरुषः कोटिष्वपि सुदुर्लभ इत्यस्य व्याख्याने निबन्धे ज्ञानमिश्रनिर्णयात्। न योगसिद्धीरपुनर्भवं वा समञ्जस त्वा विरहय्य काङ्क्षे इति वृत्रवाक्यात् । वृत्रस्य शुद्धपुष्टित्वाभावात् । अतो लक्षणं सुस्थम्।

श्रीहरिरायैस्तु शुद्धपुष्टिभक्तेरेव स्वरूपं कारिकाभिर्विवृतम् ।

न तु पुष्टिर्लक्षिता । विचारे क्रियमाणे तथैवार्थस्फूर्त्तेः । अन्यथा सर्वसाधनराहित्यादिधर्माणां प्रवाहपुष्टिभक्तावव्याप्तेश्च । अतो नेदमसाधारणं लक्षणं, किन्तु शुद्धपुष्टिभक्तेर्धर्माणां निरूपणमिति ज्ञेयम् । तथाहि ।

सर्वसाधनराहित्यं फलाप्तौ यत्र साधनम् ।
फलं वा साधनं यत्र पुष्टिमार्गः स कथ्यते ॥ १ ॥

सर्वेत्यादि । यत्र फलस्य भगवत आप्तौ सर्वसाधनाभावो हेतुः स शुद्धपुष्टिभक्तिमार्गः कथ्यत इत्यर्थः । तामसप्रकरणीयफलप्रकरणेऽन्वेषणगुणगानादिसाधनानि त्यक्त्वा रोदनेन दैन्ये प्रकटीकृते व्रजवधूनां भगवदाप्तिकथनात् । एवं सति साधनाभावस्यापि साधनतायां, न निःसाधनफलत्वं प्रभौ सिध्यतीत्यरुच्या पक्षान्तरमाहुः । फलं वेत्यादिना । फलरूपो भगवानेव स्वरूपात्मकफलाप्तौ साधनमित्यर्थः । अत एव श्रीमदाचार्यैरुक्तम् । ततो भगवान् ब्रह्मा विष्णू रुद्रश्च भूत्वा पुनः कृष्ण एव जात इत्याहेति ॥ १ ॥

अनुग्रहेणैव सिद्धिर्लौकिकी यत्र वैदिकी ।
न यत्नादन्यथा विघ्नः पुष्टिमार्गः स कथ्यते ॥ २ ॥

अनुग्रहेणेत्यादि । साधनान्तरनिरपेक्षेणानुग्रहेण यत्र लौकिकवैदिकसिद्धिः स शुद्धपुष्टिमार्गः । अत एव व्रजस्थानां तथैव वैकुण्ठप्राप्तिः । अह्न्यापृतं निशि शयानमतिश्रमेण लोकं विकुण्ठमुपनेष्यति गोकुलं स्मेति ब्रह्मवाक्यात् । यत्ने कृते तु विघ्न एव भवेत् । एतच्च श्रीनन्दादीनामम्बिकावनयात्राप्रसङ्गे स्पष्टम् ॥ २ ॥

यत्राङ्गीकरणे नैव योग्यतादिविचारणम् ।
अविलम्बः प्रभुकृतः पुष्टिमार्गः स कथ्यते ॥ ३ ॥

यत्रेत्यादि । प्रभुर्जीवयोग्यताविचारमकृत्वैव यत्र शीघ्रमङ्गीकरोति स शुद्धपुष्टिमार्गः । केवलेन हि भावेन गोप्यो गावः खगा मृगा इति वाक्यात् । स्वरूपविचारे तु शास्त्रस्य पुरुषाधिकारकत्वेन पश्वादीनां मोक्षसम्भावनैव नास्तीति ज्ञेयम् ॥ ३ ॥

स्वरूपमात्रपरतातात्पर्यज्ञानपूर्वकम् ।
धर्मनिष्ठा यत्र नैव पुष्टिमार्गः स कथ्यते ॥ ४ ॥

स्वरूपेत्यादि । यत्र धर्मविधायकवाक्यानां भगवत्सम्बन्धे

तात्पर्यमवगत्य फलाप्त्यवसरे तत्प्रतिबन्धकधर्मान् हित्वा धर्मिपरतया स्थीयते, स शुद्धपुष्टिभक्तिमार्गः । अत एव श्रवणाद्दर्शनाद् ध्यानान्मयि भाव इति वाक्यतात्पर्यमवगत्य स्वरूपपरतयैव स्थितं, न तु तद्विरुद्धं गृहगमनमाचरितम् ॥ ४ ॥

यत्र प्रभुकृतौ नैव गुणदोषविचारणम् ।
तत्कृतावुत्तमत्वज्ञा पुष्टिमार्गः स कथ्यते ॥ ५ ॥

यत्रेत्यादि । यत्र रोदनचौर्यादिरूपे चरित्रे हीनत्वबुद्ध्या नानुपादेयत्वरूपदोषदृष्टिः । न वा कालीयदमनदावाग्निमोक्षणादिषु माहात्म्यबोधनादिषु चरित्रान्तरेभ्यो वैशिष्ट्यबुद्धिः । किं तु भगवत्कृतिमात्र उत्तमत्वज्ञानं सर्वत्र स पुष्टिमार्गः ॥ ५ ॥

न वेदलोकसापेक्ष्यं सर्वथा यत्र वर्त्तते ।
सापेक्षता स्वामिसुखे पुष्टिमार्गः स कथ्यते ॥ ६ ॥

न लोकेत्यादि । यत्र तु स्वामिसुखार्थमेवाखिलचेष्टितं, नैहिकपारलौकिकयत्नः स शुद्धपुष्टिभक्तिमार्गः । 'दिष्ट्या पुत्रान् पतीन् देहान् स्वजनान् भवनानि च । हित्वा वृणीत यूयं यत् कृष्णाख्यं पुरुषं परमिति वाक्यात् ॥ ६ ॥

वरणे दृश्यते यत्र हेतुर्नाणुरपि स्वतः ।
वरणं च निजेच्छातः पुष्टिमार्गः स कथ्यते ॥ ७ ॥

वरणेत्यादि । स्वीयत्वेनाङ्गीकृतौ जीवकर्तृकसाधनानां यत्र न कारणता, स शुद्धपुष्टिमार्गः । यतः साधनसम्पन्नेष्वपि न तत्फलं, यदत्यन्तायोग्येषु पुलिन्द्यादिषु दीयते । यमेवैष वृणुते तेन लभ्य इति श्रुतिरत्राप्यनुसन्धेया ॥ ७ ॥

यत्र स्वतन्त्रता भक्तेराविर्भावानपेक्षणात् ।
पूर्वानुभवरूपत्वं पुष्टिमार्गः स कथ्यते ॥ ८ ॥

यत्रेति यत्र वियोगावस्थायां गुणगानादिरूपाया भक्तेरेव स्वरूपानन्दात्मकफलदाने स्वतन्त्रता, न स्वरूपाविर्भावस्य संयोगरससम्बन्धिन आकाङ्क्षा । प्रेमभरेण जायमानस्य श्रवणकीर्त्तनादेरेव सर्वसुखानुभवरूपत्वं, स शुद्धपुष्टिमार्गः ॥ ८ ॥

लोकवेदभयाभावो यत्र भावातिरेकतः ।
सर्वबाधकतास्फूर्तिः पुष्टिमार्गः स कथ्यते ॥ ९ ॥

लोकवेदेत्यादि । यत्र भावातिरेकतो भगवद्भावाधिक्यात् पति-

पुत्रादिभयं पारलौकिकभयं च नास्ति। भगवद्भावे सर्वस्य कालकर्मस्वभावादेर्बाधकोऽयमिति स्फूर्तिः स शुद्धपुष्टिभक्तिमार्ग इत्यर्थः। अत एवाऽस्वर्ग्यमयशस्यं चेत्यादिवाक्यैर्वेदभयं, विचिन्वन्ति ह्यपश्यन्त इत्यादिभिर्लोकभयं च नोत्पन्नम् ॥ ९ ॥

सम्बन्धः साधनं यत्र फलं सम्बन्ध एव हि।
सोऽपि कृष्णेच्छया जातः पुष्टिमार्गः स कथ्यते ॥ १० ॥

सम्बन्ध इत्यादि। यत्र जीवानां भगवता सह देहजभावजान्यतरसम्बन्धः फले साधनम्। यत्र च सम्बन्धः सर्वेन्द्रियाणां प्रभुणा संगमः स एव फलं स शुद्धपुष्टिमार्गः। भगवता सह संलापो दर्शनं मिलितस्य चेत्यादिवाक्यात्। किञ्च सम्बन्धोऽपि यत्र कृष्णेच्छया कृष्णस्य भक्तविषयिण्येच्छया जातः स तथा। मदन्यत् ते न जानन्ति, नाहं तेभ्यो मनागपीति वाक्यात् ॥ १० ॥

तत्सम्बन्धिषु तद्भावस्तद्भिन्नेषु विरोधिता।
उदासीनेषु समता पुष्टिमार्गः स कथ्यते ॥ ११ ॥

तत्सम्बन्धिष्विति। यत्र प्रभुसम्बन्धिषु भगवद्बुद्धिर्भिन्नोदासीनयोर्विरोधिसमत्वबुद्धिः स पुष्टिमार्गः। अत एवोद्धवदर्शने परमोत्साहः। इति स्म सर्वाः परिवव्रुरुत्सुकास्तमुत्तमश्लोकपदाम्बुजाश्रयमिति वाक्यात् ॥ ११ ॥

विद्यमानस्य देहादेर्न स्वीयत्वेन भावनम्।
परोक्षेऽपि तदर्थित्वं पुष्टिमार्गः स कथ्यते ॥ १२ ॥

विद्यमानस्येति। यत्र देहादेर्न स्वीयत्वबुद्ध्या रक्षणादिकमपि तु भगवदीयत्वबुद्ध्या, स पुष्टिमार्गः। किञ्च, परोक्षेऽपि विरहावस्थायामपि भगवदुपयोगं भाविनमालोच्य शरीरादिरक्षा स तथा। त्वयि धृताऽसवस्त्वां विचिन्वत इति वाक्यात्। त्वदर्थमेव प्राणानां धारणमिति व्याख्यानात् ॥ १२ ॥

भजने यत्र सेव्यस्य नोपकारकृतिः क्वचित्।
पोषणं भावमात्रस्य पुष्टिमार्गः स कथ्यते ॥ १३ ॥

भजने यत्रेत्यादि। यत्र सेव्यस्य उपकारकृतिरपेक्ष्यत्वेन नास्ति, यत्र च सेव्यकर्तृकं सेवकाधिकरणकं भावपोषणं स शुद्धपुष्टिमार्गः। अत एव गोवर्द्धनमखप्रसङ्गे अन्यभजनान्निवृत्य स्वभजनयोजनेन भाववृद्धिं कृतवान् प्रभुरिति ज्ञेयम् ॥ १३ ॥

भजनस्यापवादो न क्रियते फलदानतः ।
प्रभुणा यत्र तद्भावात् पुष्टिमार्गः स कथ्यते ॥ १४ ॥

भजनस्यापवाद इत्यादि । यत्र प्रभुणा भजनस्य फलदानेन अपवादो न क्रियते स शुद्धपुष्टिमार्गः । अयमर्थः । विरहानुभवार्थं भगवता वियोगे सम्पादिते गोपिकास्तज्जन्यं तापं भूयांसं प्राप्नुवन्त्यः । यदि तदवस्थायां गुणगानादिना अन्तरेव प्रकटीभूय सुखं दद्याज्ज्ञानमुत्पाद्य ज्ञानिनामिव वा सुखं दद्यात्, तदा पूर्णतापाऽनुभवाभावेनोत्तरदलादानमेव स्यात् । अतो भगवान् न तथा करोति, प्रत्युत तापमेव वर्द्धयति । कृष्णावेशात्मविक्लवमिति वाक्यात् । इहागतोऽहं विरहातुरात्मेति प्राप्तोपदेशोद्धववाक्याच्च ॥१४॥

यत्र वा सुखसम्बन्धो वियोगे सङ्गमादपि ।
सर्वलीलाऽनुभवतः पुष्टिमार्गः स कथ्यते ॥ १५ ॥

यत्रेत्यादि । यत्र वियोगावस्थायां संयोगावस्थातोऽप्यधिकं सुखम् । क्षणे क्षणे एवान्तर्लीलान्तरप्राकट्यात् । कस्याश्चिल्लीलाया भावनेन प्रकटीभूताया अनुभवे पुनरन्यस्या लीलाया दिदृक्षया तत्प्राप्तिसौकर्यात् । अत एव सुबोधिन्यामुक्तम् । आन्तरं तु परं फलं भावमिति ॥ १५ ॥

फले च साधने चैव सर्वत्र विपरीतता ।
फलं भावः साधनं स पुष्टिमार्गः स कथ्यते ॥ १६ ॥

फले चेत्यादि । यत्र साधनफलयोर्वैपरीत्यं स शुद्धपुष्टिभक्तिमार्गः । तमेव स्पष्टयन्ति । फलमित्यादिना । यत्र भावो निरूपधिः स्नेहः फलं प्राप्तव्यमित्यर्थः । स्वरूपानन्दप्राप्तिसाधनस्यापि भावस्य पूर्वप्रार्थनीयत्वेन फलत्वात् । स च भावो भगवद्दत्त एव प्राप्यत इति स फलरूपो भगवानेव तत्र साधनमिति स्फुटमेव साधनफलयोर्वैपरीत्यमिति भावः ॥ १६ ॥

पश्चात्तापः सदा यत्र तत्सम्बन्धिकृतावपि ।
दैन्योद्बोधाय सततं पुष्टिमार्गः स कथ्यते ॥ १७ ॥

पश्चात्ताप इत्यादि । यत्र भगवत्सम्बन्धिकृतौ भगवल्लीलायामनुभूयमानायामपि पश्चात्तापः स शुद्धपुष्टिमार्गः । अयमर्थः । भगवतो व्रजागमनादौ या व्रजभक्तानुगुणा कृतिस्तदानन्दमनुभवन्त्यो वनकृतलीलान्तराननुभवजन्यं पश्चात्तापं कुर्वन्ति । तेन च दैन्य-

माविर्भवति, न तु मानादि । अयं चैको विलक्षणोऽनुभवः, पीत्वा मुकुन्देत्यस्य व्याख्याने स्पष्टः ॥ १७ ॥

आविर्भावे नसापेक्षं दैन्यं यत्र हि साधनम् ।
फलं वियोगजं दैन्यं पुष्टिमार्गः स कथ्यते ॥ १८ ॥

आविर्भाव इत्यादि । यत्र जीवाधिकरणकं दैन्यमन्यनिरपेक्षं भगवदाविर्भावे कारणं स शुद्धपुष्टिमार्गः । वियोगे मिलनार्त्या तदसम्भवजं यद्दैन्यं तद्यत्र फलं प्रार्थनीयमवान्तरफलम् । विरहो हि दैन्यमुत्पादयति । संयोगो मानमिव । तद्दैन्यं च भगवन्तमाविर्भावयति । अतः प्रार्थनीयत्वात् फलत्वम् । अत एव श्रीगोकुलनाथैरुक्तं, तां कृपां कुरु राधेश यया तद्दैन्यमाप्नुयामिति ॥ १८ ॥

समस्तविषयत्यागः सर्वभावेन यत्र हि ।
समर्पणं च देहादेः पुष्टिमार्गः स कथ्यते ॥ १९ ॥

समस्तेत्यादि । यत्र सकललौकिकविषयाणां त्यागः सानुरागग्रहणाभावः स शुद्धपुष्टिमार्गः । सर्वभावेन सर्वात्मना देहादेर्यत्र समर्पणम् । अत एव व्रजवरवधूभिरुक्तं, सन्त्यज्य सर्वविषयांस्तव पादमूलं प्राप्ता इति ॥ १९ ॥

विषयत्वेन तत्त्यागः स्वस्मिन् विषयता स्मृतेः ।
यत्र वै सर्वभावेन पुष्टिमार्गः स कथ्यते ॥ २० ॥

विषयत्वेनेत्यादि । यत्र विषयत्वेन विषयाणां त्यागो ममताविरहो, भगवदीयत्वेन ग्रहणं स पुष्टिमार्गः । कृतात्मनिवेदनानां तावदंशस्यैव त्याज्यत्वात् । क्रीडार्थमात्मन इदं त्रिजगत् कृतं ते स्वाम्यं तु तत्र कुधियोऽपर ईश कुर्युरिति वाक्यात् पदार्थमात्रस्य भगवदीयत्वेन उत्तमत्वम् । तथा सति ममतामात्रस्यैव संसारत्वेनानादरणीयत्वम् । किञ्च । स्वस्मिन्नित्यादि । यत्र सर्वभावेन सर्वात्मना स्वस्मिञ्जीवे भगवत्स्मृतेर्विषयता स शुद्धपुष्टिभक्तिमार्गः । अयमर्थः । भक्तो हि यदि भगवत्कर्तृकस्मृतिविषयो भवति तदा भक्तेः साफल्यम् । यदनुस्मर्यते काले स्वबुद्ध्याऽभद्ररन्धनेति प्रचेतोवाक्यात् । एतच्च, नामभिर्दूरगान् पशून्; क्वचिदाह्वयति प्रीत्येत्यस्य व्याख्याने स्पष्टम् ॥ २० ॥

एवमुक्तोपसंहरन्ति ।
एवंविधैर्विशेषेण प्रकारैस्तु सदाश्रितैः ।

हृदि कृत्वा निजाचार्यान् पुष्टिमार्गो हि बुध्यताम् ॥ २१ ॥

एवमित्यादिना ॥ २१ ॥

एवमन्यैरपि पुष्टिमार्गीयैः शुद्धपुष्टौ श्रद्धाधिक्यात् प्रायस्तत्स्वरूपमेवोच्यते, न तु सामान्यतः पुष्टिभक्तिरूपम् । सामान्यलक्षणं तु पूर्वोक्तमेव निबन्धादिसिद्धमिति कोविदा एव विदाङ्कुर्वन्तु ।

इति श्रीगोवर्द्धनधरश्रीवल्लभाधीशश्रीविट्ठलेश्वरचरणानुचरसेवकेन लालूभट्टोपनामबालकृष्णेन कृते प्रमेयरत्नार्णवे पुष्टिविवेकः समाप्तिमगमत् ॥ ४ ॥

अथ पुष्टिभक्तिमार्गाधिकारो विमृश्यते। तत्र नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन, यमेवैष वृणुते तेन लभ्य इति श्रुतेर्यस्मिन् भगवत्कृपा सोऽधिकारी। तत्र कृपाया अप्रत्यक्षत्वात् तत्कार्यरूपपुष्टिमार्गरुच्या साऽनुमीयते। यतः कृपां विना पुष्टिमार्गे रुचिर्नोदेति। तदुक्तं निबन्धे, कृपायुक्तस्य तु यथा सिद्ध्येत् कारणमुच्यते इति। व्याख्याने, कृपापरिज्ञानं च मार्गरुच्या निश्चीयत इति। एवञ्च पुष्टिमार्गीयफलदित्सासमुद्भूतभगवत्कृपाजन्यपुष्टिमार्गविषयकरुचिमान् अधिकारीति ज्ञेयम्। तादृशरुच्युत्पत्तौ प्रकार उच्यते। तथाहि। दैवजीवेषु यं जीवं पुष्टिमार्गेऽङ्गीकर्तुं हरिर्वाञ्छति, तस्य प्रभुकृपया सत्सङ्गे सति तत्कृपया परिचर्यादिना तत्प्रसङ्गाद्यथासम्भवं श्रवणतनुजसेवनादिरूपभजनानुभवादेतन्मार्गे रुचिराविर्भवति। एवं प्रवृत्तस्य विशुद्धचेतसस्तद्धर्म एवात्मरुचिः प्रजायत इति वाक्यात्। एतादृशरुचिमान् अधिकारी पुष्टिमार्गे। ततो मार्गरुच्या क्रियमाणे श्रवणादौ चित्ते भगवदावेशः। ततश्चित्तशुद्धिः। ततः श्रवणाद्यनुवृत्तिः। तदुक्तं द्वितीयस्कन्धे, 'प्रविष्टः कर्णरन्ध्रेण स्वानां भावसरोरुहम्। धुनोति शमलं कृष्णः सलिलस्य यथा शरत्। धौतात्मा पुरुषः कृष्णपादमूलं न मुञ्चतीति' इति। एवं श्रवणाद्यावृत्तौ भगवति रुचिरुत्पद्यते। ताः श्रद्धया मेऽनुपदं विशृण्वतः प्रियश्रवस्यङ्ग ममाभवद्रुचिरिति वाक्यात्। इयमननुभूतविषया परोक्षरुचिरित्युच्यते। इयं हि श्रवणादिना सत्पुरुषादरदर्शनादिना रुचिराविर्भवतीति प्रथमकक्षापन्ना ज्ञेया। यदनुध्यासिना युक्ता इति श्लोकव्याख्याने सर्वत्रालौकिकेषु पदार्थेषु माहात्म्यश्रवणाद् रुचिरुत्पद्यत इति सुबोधिन्यामियमेव रुचिरुक्तेति बोध्यम्।

सा भक्तिरेव। रुचिः श्रवणादिः प्रेम चेति भक्तिस्त्रिविधेति प्रथमस्कन्धसुबोधिन्यामुक्तेः। ततोऽननुभूतविषयया भगवद्रुच्या श्रवणादिरूपे भजने भक्तिवर्द्धिनीप्रकरणोक्तदिशा बीजरूपो भावः सूक्ष्मभक्तिर्वृद्धिं प्राप्नोति। स भावो भगवता पूर्वमेव जीवत्वसम्पादनोत्तरं पुष्टिमार्गीयत्वसिद्ध्यै सूक्ष्मरूपः स्थापित इति ज्ञेयम्। स बीजभाव इत्युच्यते। स एष भावः परोक्षरुच्या श्रवणादिसहकृतोऽन्तर्भगवत्स्फूर्तिं करोति। श्रवणादिना तु स्वाभाविको भग-

घानाविर्भवतीति द्वितीयस्कन्धनिबन्धात् । तथा सति अन्तर्भगवत्स्फूर्तौ यत्किञ्चिदनुभवाद् रुचिविशेष उत्पद्यते । स च अपरोक्षरुचिरित्युच्यते । तया स एव भावो बीजरूपः श्रवणादिसाधनैर्वृद्धः सन् प्रेमरूपो भवति । स च स्नेहो हरीतरविषयकरागनिवर्तकः । स्नेहाद्रागविनाशः स्यादिति भक्तिवर्द्धिनीग्रन्थात् । भगवद्भिन्नरागनिवर्तको भगवद्भावः स्नेह इति कार्यलक्षणात् । ततः सेवाश्रवणाऽऽवृत्त्या वर्द्धमानः स एवाऽऽसक्तिरूपो भवति । स तु भगवत्सम्बन्धरहितपदार्थेषु बाधकत्वं भासयति । आसक्त्या स्याद् गृहारुचिरिति भक्तिवर्द्धिनीप्रकरणात् । अरुचिर्न रुच्यभावः, किन्तु रुचिविरुद्धो भावः । विरोधार्थे नञः स्मरणात् । गृहस्थानां बाधकत्वमनात्मत्वं च भासत इति तत्रैव विवरणात् । तथाच भगवदितरविषयबाधकत्वस्फूर्तिसम्पादको भाव आसक्तिरिति लक्षणम् । ततः स एवोत्तरोत्तरं वृद्धो व्यसनत्वं प्राप्नोति । विशेषेण अस्यन्ते क्षिप्यन्ते दैहिका धर्मा अनेनेति व्यसनम् । सा व्यसनं भावं प्राप्ता भक्तिर्मानसी सेवेत्युच्यते । सा परानुरक्तिरीश्वर इति भक्तिसूत्रात् । यदा स्याद् व्यसनं कृष्णे कृतार्थः स्यात् तदैव हीति भक्तिवर्द्धिन्याम् । चेतस्तत्प्रवणं सेवा तत्सिद्ध्यै तनुवित्तजेति मुक्तावलीप्रकरणे तदर्थस्यैव स्फुटीकरणात् । मुक्तावलीप्रकाशे एतद्विवृतौ, ता नाविदन्मय्यनुषङ्गबद्धधियः स्वमात्मानमदस्तथेदमित्येकादशवाक्योपन्यासाच्च । 'मनोगतिरविच्छिन्ना यथा गङ्गाम्भसोऽम्बुधौ । लक्षणं भक्तियोगस्य निर्गुणस्य ह्युदाहृतम् 'इति तृतीयस्कन्धे तादृग्भक्तेर्लक्षितत्वाच्च। अत एवैतद्व्याख्याने, यथा कायिकगतिर्गोपिकानामित्यनेन मुख्यभक्ता एवोदाहृताः । अतो व्यसनपर्यन्तं साधनाचरणम् । अत एव सुबोधिनीनिबन्धयोः प्रमाणप्रमेयसाधनाख्यैस्त्रिभिः प्रकरणैः प्रेमासक्तिव्यसनानि निरूप्याग्रे फलं निरूपितम् । अतः श्रीमद्भागवतादौ श्रीमदाचार्योक्तौ श्रीमद्विठ्ठलेशोक्तौ च यत्र यत्र साधनानां प्रेमावधिकत्वं दृश्यते तत्र तत्र प्रेमव्यसनयोरभेदमादायोक्तमिति ज्ञेयम् । प्रेमसेवाऽत एव स्याद्विश्लिष्टव्यक्तिरुक्तमेत्यादावपि प्रेमसेवाशब्देन मानसी सेवा व्यसनशब्दवाच्या ज्ञेया । एवं सति भगवद्रुच्युत्पत्त्यनन्तरं क्रियमाणैः श्रवणादिभिः साध्यायाः प्रेमभक्तेः प्रथमावस्था प्रेमशब्दवाच्या । ततो मध्यमावस्था आसक्तिः । परिपाकावस्था व्यसन-

शब्दवाच्येत्येवमभेदात् कुत्रचित् प्रेमशब्देनासक्तिः, कुत्रचिद् व्यसनमभिधीयत इत्यर्थः स्वारस्याद् बोध्यः। मुख्यफलं तु व्यसनोत्तरमेव। यदा स्याद् व्यसनं कृष्णे कृतार्थः स्यात् तदैव हीत्यत्र एवकारेणान्ययोगव्यवच्छेदात्। इयं व्यसनात्मिकैव भक्तिर्भगवता देवहूतिं प्रत्यात्यन्तिकीत्वेनोक्ता।

अहैतुक्यव्यवहिता या भक्तिः पुरुषोत्तमे।
सालोक्यसार्ष्टिसामीप्यसारूप्यैकत्वमप्युत॥
दीयमानं न गृह्णन्ति विना मत्सेवनं जनाः।

स एव भक्तियोगाख्य आत्यन्तिक उदाहृत इति तृतीयस्कन्धात्। व्याख्यातं चाऽऽचार्यैः। अत्यन्तप्रेमोत्पत्तावेवं भवतीति। अतः प्रेमपरिपाकावस्था व्यसनम्। ततो व्यसनवशात् सर्वत्र पुरुषोत्तमबुद्धौ सर्वत्रैवोत्कटस्नेहो भवति। स सर्वात्मभावशब्दवाच्यः। तत्सिद्धौ पुरुषोत्तमाविर्भावो बाह्याभ्यन्तरभेदेन निरन्तरं सिद्ध्यति। ततः फलावसरे सेवाफलप्रकरणोक्तरीत्या ह्यलौकिकसामर्थ्यं फलं भविष्यतीत्यलं विस्तरेण।

एवमनेन प्रकारेण शुद्धपुष्टिभक्तानामधिकारः फलसहितो निरूपितः।

फलं तु नित्यलीलान्तःप्रवेशलक्षणम्। तदेव सेवाफलविवरणेऽलौकिकसामर्थ्यशब्देनोच्यते। आनन्दमयाधिकरणभाष्ये भगवता सह कामाशनाख्यं यत्फलमुक्तं जीवस्यात्यनुगृहीतस्य तदिदम्। पुष्टिप्रवाहमर्यादानिरूपणग्रन्थे, भगवानेव हि फलमित्यनेन स्वरूपस्यैव फलत्वमुक्तं तदपि नित्यलीलान्तःप्रवेशरूपम्। तच्च बहुप्रकारकं ज्ञेयम्। नित्यलीलायां हि केचन भक्तरूपेण गोपशुपक्षिवृक्षादिरूपेण नद्यादिरूपेण पुरुषोत्तमात्मकं फलं निरवध्यानन्दात्मकम्, आनन्दमयाधिकरणभाष्योक्तरीत्या तादृशमलौकिकं देहं प्राप्य देहेन्द्रियप्राणान्तःकरणजीवेषु भगवदानन्दप्राकट्यात् तादृशा भूत्वाऽनुभवन्ति। अत एव, अहो अमी देववराऽमरार्चितमित्यादिभिर्भगवता स्वलीलापरिकरस्वरूपं तादृशमेव निरूपितम्। पुष्टिमार्गीयो जीवस्तु फलदशायां तत्परिकरमध्येऽन्यतमः कश्चिद्भविष्यति। तत्र भगवदिच्छा नियामिका।

पुष्टिभक्तिश्चतुर्विधा शुद्धपुष्टिपुष्टिपुष्टिमर्यादापुष्टिप्रवाहपु-

ष्टिभेदात् । तत्र पुष्टिभक्तित्वेन रूपेणैक्येऽपि प्रकारभेदाद्भेदः । एवमेतत्फलस्यापि नित्यलीलान्तःप्रवेशत्वेनैक्येऽपि प्रकारभेदो भक्तगोपशुवृक्षादिरूपेण बोध्यः । एतदेव तारतम्यं च । तथा सति सर्वेषां प्रवाहादिभेदभिन्नानां पुष्टिस्थानामेकमेवालौकिकसामर्थ्यरूपं फलं नित्यलीलान्तःपातित्वशब्दवाच्यम् । तदाऽपीतेः संसारव्यपदेशादिति तत्त्वसूत्रे, तदा नित्यलीलान्तःपातलक्षणपुष्टिमार्गीयमुक्तिदशायामिति भाष्योक्तेः । नित्यलीलाश्च शुद्धपुष्टिस्था व्रजसम्बन्धिन्यो ज्ञेयाः। तादृशनित्यलीलान्तःपाते सति पुनः प्रकारविशेषस्त्विष्ट एव । आसामहो चरणरेणुजुषामहं स्यां वृन्दावने किमपि गुल्मलतौषधीनामिति वाक्यात् । अत आधिदैविके बृहद्वृन्दावनादौ भक्तरूपेण गोपादिरूपेण वा स्थित्वा रसानुभवः । आधुनिकानामपि पुष्टिमार्गस्थितानां तादृग्भगवत्कृपया पर्यवसाने फलरूपभावोत्पत्तौ नित्यलीलान्तःपातो भविष्यति । तत्र ये आधुनिका हीनाधिकारिणः पुष्टिमार्गीयास्तेषां चरमजन्माभावाद् बहुभिर्जन्मभिस्तादृशभावोत्पत्तौ नित्यलीलाप्रवेशो भावीति बोध्यम् । तृतीयस्कन्धे, देवानां गुणलिङ्गानामित्यत्र सुबोधिन्याम्, अन्येषां तु यथाकथञ्चित् क्रियमाणा भगवति खण्डशो वृत्तिरक्षयत्वाद् बहुभिर्जन्मभिः पुष्टिङ्गता अन्तिमजन्मनि भक्तिरूपां वृत्तिं जनयिष्यतीति न काप्यनुपपत्तिरित्युक्तेः। निबन्धे सेवाप्रकरणे भक्तिमार्गे मुख्यानां फलमाहेत्युक्त्वा, ये व्याख्यातास्ते सर्वे मर्यादाभक्तिमार्गीया एव । अधुना त्वित्यारभ्य, सायुज्यं कृष्णदेवेनेत्यन्तेन गौणमुख्यभेदेन मर्यादाभक्तानां फलं सायुज्याऽवधि निरूपितम् । अत एव, मर्यादाभक्तिमार्गस्य काष्ठा गङ्गा परा स्मृतेति निबन्धाद् गङ्गाया मर्यादाभक्तिरूपायाः सेवनात् सायुज्यं भवतीति । सायुज्यं वाऽन्यथा तस्मिन् गङ्गातीरे न संशय इति नवमनिबन्धे उक्तम् । सायुज्यं च एकत्वरूपं भगवत्प्रवेशशब्दवाच्यम् । ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरमित्यादिवाक्यसिद्धम् । अग्रे, तदभावे स्वयं वापि मूर्त्तिं कृत्वेत्यारभ्य, गृहस्थस्य प्रकीर्तितमित्यन्तेन पुष्टिभक्तिमार्गीयप्रकार उक्तः । विवरणे तु, एवं कुर्वन् सकुटुम्बो भगवत्सायुज्यमश्नुत इत्यत्र सायुज्यशब्देन अलौकिकसामर्थ्यमेव । अत एव, आदिमूर्त्तिः कृष्ण एव सेव्यः सायुज्यकाम्ययेत्यस्य व्याख्याने, ब्रह्मविदाप्नोति परमित्यत्र यत् सायुज्यं मुख्यतया

निरूपितं तत्कामनायां कृष्ण एव सेव्य इत्यनेन मर्यादामार्गीयसायुज्याद्भेदं निरूप्यालौकिकसामर्थ्यरूपतैव प्रदर्शिता । एतच्चानन्दमयाधिकरणभाष्ये स्पष्टतममुलभ्यत इति ततोऽवधेयम्। सेवाफलग्रन्थव्याख्याने, अलौकिकसामर्थ्यं सायुज्यं सेवोपयोगिदेहो वैकुण्ठादिष्वेत्यनेन यत् फलत्रयमुक्तं, तत्रालौकिकसामर्थ्यं पुष्टिमार्गीयाणां फलम् । शिष्टं फलद्वयं तु मर्यादाभक्तानामिति ज्ञेयम् । मूलेऽपि, यादृशी सेवना प्रोक्तेत्यत्र सेवनाशब्देन मर्यादासेवा पुष्टिसेवा चोक्तेति बोद्धव्यम् । विवृतौ फलत्रयं सेवाद्वयस्योक्तम् । तत्र प्रथमं पुष्टिसेवायाः, शिष्टं फलद्वयं मर्यादासेवाया इति विवेकः । अत एव सायुज्यं सेवोपयोगिदेहप्राप्तिश्चान्यत्रापि मर्यादाभक्तस्योक्ता । 'देहभावे दृढे तु स्याद् भक्तानां कृष्णदासता । सायुज्यं वान्यथा तस्मिन् गङ्गातीरे न संशय'इति नवमस्कन्धनिबन्धे । तदविरोधात्त्रापि तत्फलद्वयं मर्याभक्तस्यैवेति निश्चयः ।

विद्यायाः पञ्चपर्वमध्ये या भक्तिरुक्ता सा मार्यादिक्येवेति । यया विद्वान् हरिं विशेदिति निबन्धात् । क्वचिन्मार्यादिक्यां भक्तौ प्रेमशब्दव्यवहारो दृश्यते, तत्र भगवति मोचकत्वबुद्ध्या प्रेमास्तीति तत्सोपाधि प्रेम, नतु पुष्टिमार्गीयाणामिव निरुपाधिकम् । तदुक्तं तृतीयाध्याये, गतेरर्थवत्त्वमुभयथान्यथा हि विरोध इति तत्त्वसूत्रीयभाष्ये । मर्यादापुष्टिभेदेनाङ्गीकारे वैलक्षण्यादाद्यायामङ्गीकृतानां मुमुक्षयैव श्रवणादौ प्रवृत्तिस्तद्दातृत्वेनैव भगवति प्रेमाऽपि, न तु निरुपाधिरिति । आसन् यस्य हरेर्वापि सेवयेत्यस्य व्याख्याने, सायुज्यब्रह्मभावौ हरिसेवयैव भवतो, नान्यसेवयेत्यत्रापि सेवा मार्यादिकीति ज्ञेयम् । अत एव मर्यादास्थानामेव सायुज्यं फलम् । पुष्टिस्थास्तु दीयमानं न गृह्णन्ति विना मत्सेवनं जना इत्यादिवाक्येभ्यो, नाद्रियन्ते सायुज्यान्तमुक्तिम् । एतच्च, वीक्ष्याऽलकावृतमुखमित्यस्य सुबोधिन्यां स्पष्टम् । तत्र हि प्रथमं सारूप्यं सालोक्यं सामीप्यं सायुज्यमिति मोक्षभेदा इत्युक्त्वाग्रेऽलकादिस्वरूपं तत्फलं च व्याख्याय, हसितावलोकमित्यस्य व्याख्याने, ब्रह्मानन्दे प्रविष्टानां न भक्तिविलास इत्यारभ्य, अनुभवरसो हि भिन्नतया स्थितौ भवतीत्यन्तेन सायुज्यं नाकाङ्क्षितमित्युपपादितम् । अतः सायुज्यं प्राप्तानां, सायुज्ये तु रसाधिक्यं भेदेनानुभवात् सदेति-

वाक्याद्भवत्रपि परमानन्दानुभवः स्वस्वरूपेणैव, न त्वलौकिक-सामर्थ्यं प्राप्तानामिव सर्वेन्द्रियैरात्मना च। ब्रह्मानन्दे प्रविष्टानामात्मनैव सुखप्रमेति निबन्धात्। अतः सायुज्यं स्वरूपान्तःपातः, स नापेक्षितः पुष्टिभक्तानां, किन्तु नित्यलीलान्तःपात एवेति सुधीभिर्विभावनीयम्।

एतद्भक्त्यधिकारो विशेषानुग्रहसाध्यः। 'यदा यस्यानुगृह्णाति भगवानात्मभावितः। स जहाति मतिं लोके वेदे च परिनिष्ठिताम्' इति वाक्यात्।

एतद्भक्तिप्रवर्त्तका व्रजभक्ता एव। 'भगवत्युत्तमश्लोके भवतीभिरनुत्तमा। भक्तिः प्रवर्तिता दिष्ट्या मुनीनामपि दुर्लभेति' वाक्यात्। व्याख्यातं च श्रीमदाचार्यैः। एतेन शास्त्रप्रसिद्धायां भक्तौ दानादिसाधनानि श्रूयन्ते। अस्यां तु प्रसिद्ध्यभावात् साधनमपि न पश्याम इति भावः सूचित इति। अतः सर्वोत्तमेयं पुष्टिभक्तिरिति भाग्यवद्भिर्ज्ञेयम्।

इति श्रीमद्गोवर्द्धनधरश्रीवल्लभाचार्यश्रीविठ्ठलेश्वरचरणानुचर-सेवकेन लालूभट्टोपनामबालकृष्णेन कृते प्रमेयरत्नार्णवे पुष्टिभक्त्यधिकारविवेकः समाप्तिमगमत्॥ ५॥

पुरुषोत्तमलाभे यो मुख्यहेतुतयोदितः ।
तस्य सर्वात्मभावस्य स्वरूपमिह वर्ण्यते ॥ १ ॥

भगवद्विषयको निरुपधिस्नेहो भक्तिविशेषः सर्वात्मभावः । तथाहि । भावो नाम रतिः । रतिर्देवादिविषया भाव इत्यभिधीयत इति वाक्यात् । आत्मनो भाव आत्मभावः । यथा आत्मन्यात्मनो भावो निरुपधिरेव । न वा रे पुत्राणां कामाय पुत्राः प्रिया भवन्तीत्यादिश्रुतेः । नृप स्वात्मैव वल्लभ इत्यादिवाक्याच्च । अतो यथात्मनि शुद्धः स्नेहस्तथा भगवति कर्त्तव्य इति श्रुतितात्पर्यार्थः । अत एव, स त आत्मान्तर्याम्यमृत इत्यादिना आत्मत्वं बोधयति । तत् त्वमसीत्यत्रापि तथैवाशयः । एतच्च तत्त्वदीपे शास्त्रार्थप्रकरणे उपपादितम् । भगवता ब्रह्माणं प्रतीदमेवाभाणि । 'अहमात्माऽऽत्मनां धातः प्रेष्ठः सन् प्रेयसामपि । अतो मयि रतिं कुर्याद् देहादिर्यत्कृते प्रिय' इति । अनेन भगवद्वाक्येन, श्रुतावप्यात्मत्वकथनं स्नेहार्थमेवेति निर्णीयते । अतो मयि रतिं कुर्यादिति हेतुकथनपूर्वकोपदेशात् । निर्णीतं च विधिना । तदुक्तं द्वितीयस्कन्धे । 'भगवान् ब्रह्म कार्त्स्न्येन त्रिरन्वीक्ष्य मनीषया । तदध्यवस्यत् कूटस्थो रतिरात्मन्यतो भवेदिति' । अत आत्मनो भावो भगवद्विषयोऽत्यादरेण सम्पादनीयः । तस्य सिद्धौ तिरोधाननाशे सर्वत्र पदार्थमात्रे वस्तुतोऽपि भगवद्रूपे परमानन्दरूपस्य पुरुषोत्तमस्य स्फूर्तौ सर्वत्रात्मभावो भवति । तथाच सर्वस्मिन्नात्मभावः सर्वात्मभाव इति फलितम् । 'तव परि ये चरन्ति' इत्यस्य सुबोधिन्यां तवेति षष्ठ्या त्वत्सम्बन्धिनं पदार्थं यं कञ्चन परिचरन्ति, परं सर्वात्मभावोऽपेक्ष्यते । मृत्योः स मृत्युमाप्नोति य इह नाना पश्यतीति भेददर्शन एव मृत्युपराक्रमश्रवणादित्युक्तम् । एतेन सर्वात्मभावपदे सप्तमीतत्पुरुषो भगवत्स्फूर्त्तिरभेदेनैवाद्दतेत्यध्यवसीयते । आत्मपदेन भगवत्प्रीतिरभेदावगाहिनी, न त्वधिष्ठानभेदसंसृष्टा । तन्त्रान्तरवत् । यत आत्मनि जायमानो भावो ज्ञानमप्यभेदेनैव वस्तुमहिम्नोत्पद्यते । भावपदेन च 'चिन्तयानो हृषीकेशमपश्यत् तन्मयं जगदिति वाक्योक्ते तादृग्भगवत्स्फुरणं नातिप्रसक्तिः । द्वेषप्रयुक्ततया भावत्वाभावात् । तदेवोक्तं श्रीधरस्वामिभिः, सर्वात्मभाव एकान्तभक्तिरिति । एकान्तभक्तिर्गोविन्दे यत् सर्वत्र तदीक्षणमिति तल्लक्षणादस्मदुक्त्या सहै-

ध्यं ज्ञेयम् । तथा सति सर्वस्मिन्नात्मभावः सर्वात्मभाव इति निष्कर्षः ।

स च मर्यादापुष्टिभेदेन द्विविधः । तत्राद्यो नवमस्कन्धेऽम्बरीषस्योक्तः । 'सर्वात्मभावं विदधन्महीमिमां तन्निष्ठविप्राभिहितः शशास हेति' । द्वितीयस्तु शुद्धपुष्टिभक्तिमार्गीयाणां व्रजसुन्दरीणां दशमे निरूपितः । विप्रयोगदशायां विगाढभावेन सर्वत्र भगवत्स्फूर्तौ सर्वात्मभावः सिद्ध्यति । एतावान् विशेषः पूर्वस्मात् । एतासां श्रीकृष्णे श्रृङ्गाररससम्बन्धिभावानां बहूनां सम्भवात् तत्तद्भावसमानाधिकरणः सर्वात्मभावो भजनानन्दानुभावनेऽत्यन्तं निपुण इति शुद्धपुष्टिमार्गीयैस्तोष्ट्रूयते । तदाह भगवान् भाष्यकारः, लिङ्गभूयस्त्वात् तद्धि बलीयस्तदपीति सूत्रे । एतेन सर्वात्मभावस्वरूपमेव विवृतं भवति । तत्र विरहभावे अतिविगाढभावेन सर्वत्र तदेव स्फुरतीति स एवाधस्तादित्यादिनोक्त्वा कदाचित् स्वस्मिन्नेव भगवत्स्फूर्तिरपि भवतीत्यथाहङ्कारादेश इत्यादिना तामुक्त्वा एतेषां व्यभिचारिभावत्वेनानियतत्वं ज्ञापयितुं पुनः सर्वत्र भगवत्स्फूर्तिमाहाथात आत्मादेश इत्यादिनेत्यादि ।

अयं पुष्टिमार्गीयः सर्वात्मभावः श्रृङ्गाररसमध्यपाती । एतत्प्राप्तौ शुद्धपुष्टिभक्तानामेवाधिकारः । भाष्ये त्वयमेव विशिष्य विवृतः । मर्यादामार्गीयस्तु श्रुतिस्तुतिसुबोधिन्युक्तदिशाऽम्बरीषादिभक्तगम्यः । उभयविधोऽप्युभयत्र परमकाष्ठापन्नभक्तिरूप इति कोविदा विदाङ्कुर्वन्तु ।

नच भ्रमरगीतीयस्य, सर्वात्मभावोऽधिगतो भवतीनामधोक्षज इति श्लोकस्य विवृतौ, सर्वोऽप्यात्मनो भाव इति विवृतत्वान्न पूर्वोक्तं लक्षणमिति वाच्यम् । उद्धवोक्तौ पूर्वोक्तसर्वात्मभावस्याभावात् । किन्तु सर्वोऽप्यात्मनोऽन्तःकरणस्य भावो भवतीनां मम ज्ञानविषयोऽभूदित्यर्थात् । यद्यप्येताः पूर्वोक्तपुष्टिमार्गीयसर्वात्मभाववत्यस्तथाऽप्युद्धवैः स न ज्ञातः, किन्तु तदुक्तश्रृङ्गाररससम्बन्धिभावमात्रं बुद्धमिति ज्ञेयम् । 'मधुप कितवबन्धो मा स्पृशाङ्घ्रिं सपत्न्या' इत्यादिवाग्विलासैर्घोषभूषणसीमन्तिनीभिस्तदतिरिक्तस्यैव स्फुटीकरणात् । नच 'मामेकमेव शरणमात्मानं सर्वदेहिनाम् । याहि सर्वात्मभावेन यास्यसे ह्यकुतोभयम्'इत्यत्र सर्वात्मभावेन मां शरणं

याहीत्युक्तत्वाच्छरणसाधनीभूतस्य सर्वात्मभावस्य न पूर्वोक्तरूपतेति वाच्यम् । सर्वदेहिनामात्मानं शरणं शरणभूतं मां सर्वात्मभावेन याहीत्यभिप्रायात् । सूत्रभाष्ये, अथवेति पक्षान्तरेण अस्यैवार्थस्यादृतत्वात् । एवं सर्वात्मभावस्य पूर्वोक्त एव महिमा, लक्षणं च पूर्वोक्तमेवेत्यलं विस्तरेण ।

इति श्रीमद्गोवर्द्धनधरश्रीवल्लभाचार्यश्रीविठ्ठलेश्वरचरणाऽनुचरसेवकेन लालूभट्टोपनामबालकृष्णेन कृते प्रमेयरत्नार्णवे सर्वात्मभावविवेकः समाप्तः ॥ ६ ॥

अथ पुष्टिमार्गीयाणां फलं विचार्यते। तत्र प्रथमं 'भगवत्युत्त-मश्लोके भवतीभिरनुत्तमा। भक्तिः प्रवर्त्तिता दिष्ट्या मुनीनामपि दुर्लभा' इत्युद्धववाक्यान्मार्गप्रवर्त्तकत्वेन मुख्यत्वात् तेषां व्रजभक्ता-नां फलप्रकारो लिख्यते। तत्र, निरोधोऽस्यानुशयनमात्मनः सह शा-क्तिभिरिति द्वितीयस्कन्धीयशुकवाक्याच्छक्तिभिः सहितस्य भगव-तः प्रपञ्चे क्रीडा निरोधः। आत्मशब्दस्य भगवद्वाचित्वात्। अनु-शयनशब्देन तत्तल्लीलानुरूपा स्थितिरुच्यते, नतु निद्रा। पुरुषशब्दे पुरि शयनं पुरुषस्योच्यते, पुरि शेते इति व्युत्पत्त्या। तत्र स्थितिरेव शीङ्धातोरर्थो, न तु निद्रा। एवमिहापि। अत एव सुबोधिन्यां निबन्धे च, 'निरोधोऽस्यानुशयनं प्रपञ्चे क्रीडनं हरेः। शक्तिभिर्दु-र्विभाव्याभिः कृष्णस्येति हि लक्षणम्' इत्युक्तम्।

सा भगवतो निरोधरूपा लीला त्रिविधा। निरोध्यभक्तानां तामसराजससात्त्विकभेदेन त्रिविधत्वात् तत्तन्मनोरोधकतायै क्रिय-माणा लोकानुसारिणी त्रिविधा भवति। 'स्वभावस्यान्यथा भावो न वै शक्यः कथञ्चन। अतस्त्रिविधजीवेषु त्रिविधा भगवत्कृतिरिति'सु-बोधिन्याम्। तया त्रिविधलीलया क्रियमाणा भक्तानां प्रपञ्चविस्मृति-पूर्विका भगवदासक्तिः। सापि निरोधशब्दवाच्या। नितरां रोधो निरो-ध इति व्युत्पत्तेः। रोधः कस्येत्यपेक्षायां भक्तानामिति पूर्वस्कन्धसङ्ग-त्या लभ्यते। अपादानापेक्षायां प्रपञ्चो ग्राह्यः। तथा सति प्रपञ्चाद् रोध इति सिद्धम्। 'भक्ताः पूर्वत्र निर्दिष्टास्ते रोद्धव्या विमुक्तये' इति निबन्धात्। 'हरिणा ये विनिर्मुक्तास्ते मग्ना भवसागरे। ये नि-रुद्धास्त एवात्र मोदमायान्त्यहर्निशम्' इति निरोधलक्षणग्रन्थाच्च। प्रपञ्चाद्रोधेऽपि 'कर्मेन्द्रियाणि संयम्य य आस्ते मनसा स्मरन्। इन्द्रियार्थान् विमूढात्मा मिथ्याचारः स उच्यत' इति न्यायेन प्र-पञ्चस्मरणं चेन्न भगवल्लीलानुभवे मुख्योऽधिकारः स्यादतः प्रप-ञ्चविस्मरणमपेक्षितम्। तदुपसर्गेण लभ्यते। नितरां रोधो निरोध इति, प्रपञ्चास्फूर्तिरिति यावत्। कस्मिन् निरोध इत्यपेक्षायां भगव-ति निरोध इति। 'कृष्णे निरुद्धकरणा भक्ता मुक्ता भवन्ति हीति' निबन्धात्। स हि परमरुच्युत्पादकलीलाजन्यत्वेन परमसुखरू-पत्वादासक्तिरूपः। अन्यथा निग्रहमात्रं स्यात्। तत्तु न सुखकरम्। मनोनिग्रहकर्षिता इति वाक्यात्। प्रपञ्चविस्मृतावेव भगवत्सुखा-

ऽनुभवादासक्तिरूपत्वं सिद्ध्यति निरोधस्य । अतः प्रपञ्चविस्मृतिपूर्विका भगवदासक्तिर्निरोधपदवाच्येति। 'इति नन्दादयो गोपाः कृष्णरामकथां मुदा । कुर्वन्तो रममाणाश्च नाविन्दन् भववेदनाम् ॥ शय्यासनाटनालापस्नानक्रीडाशनादिषु । न विदुः सन्तमात्मानं वृष्णयः कृष्णचेतस' इत्यादौ तथैव निरूपितत्वात् । तथाच प्रपञ्चविस्मृतिपूर्वकभगवदासक्तिसम्पादिका प्रपञ्चाधिकरणिका भगवल्लीला निरोधपदवाच्या । सेयं भगवद्धर्मः । तादृशलीलाजन्या प्रपञ्चविस्मृतिपूर्विका भगवदासक्तिर्निरोधपदवाच्या । सा जीवधर्मः ।

तदुभयं दशमस्कन्धे प्रतिपाद्यते । 'समुदायो जन्मवाची क्रीडायुक्तस्य वै हरेः । प्रपञ्चविस्मृतिः सक्तिर्भक्तानां चापि योगत'-इति निबन्धात् । तत्र प्रथमं तामसप्रकरणम् । व्रजस्थानां तामसत्वं त्रिविधम् । अविहितभक्तिरसानुभवसाधनरूपं पारिभाषिकमेकम् । धर्मविशेषरूपं द्वितीयम् । भगवन्मायाकृतं तृतीयं च । तत्राद्यं तु स्वमनोरथानुकूललोकसदृशभगवल्लीलारुचिमत्त्वबाह्यदर्शनैकाभिलाषवत्त्वस्वावियोगासहिष्णुत्वादिरूपम् । तामसा हि हठप्रधानास्तेषां यत्राग्रहः पतति स न गच्छति, ज्ञानरहिता मुग्धाश्च भवन्ति । ज्ञानराहित्यादेव लोकवेदोल्लङ्घनं कुर्वन्ति । व्रजस्था अपि भगवति परमाग्रहवन्तो लीलानुपयुक्तज्ञानशून्याः । 'एवं मदर्थोज्झितलोकवेदस्वानामिति'वाक्याद्भगवदर्थं लोकवेदोल्लङ्घनशीलाश्चेत्येतावद्धर्मसाम्येन तामसत्वमुच्यते, परोक्षवादाय । परोक्षप्रिया इव हि देवा इतिश्रुतेः । परोक्षं मम च प्रियमिति भगवद्वाक्याच्च । इदं तामसत्वं तामसप्रकरणे सर्वेषु भक्तेष्वनुगतम् । द्वितीयं तु यत्र यत्रोद्गच्छति तत्र तत्र तादृशकार्यं करोति । यथा 'शरदुदाशये साधुजातसत्सरसिजोदरश्रीमुषा दृशा। सुरतनाथ ते शुल्कदासिका वरद निघ्नतो नेह किं वध' इत्यादिवाक्यानि। इदं तामसत्वं भावविशेषरूपम् । एवं राजसत्वसात्त्विकत्वे अपि भावविशेषरूपे एव । अत एव तामसप्रकरणस्थाया एव कस्याश्चिद्राजसीत्वम्, अन्यस्याः सात्त्विकीत्वं कस्याश्चिन्निर्गुणात्वमुच्यते । अतो ज्ञायते इदं तामसत्वादिकं भावविशेष एव । अत एव 'मधुप कितवबन्धो'इत्यादौ एतस्य तामसत्वस्यानुवृत्ती राजसप्रकरणेऽपि दृश्यते । तृतीयं तु

भगवन्मायाकार्यम् । मायात्र लीलासृष्टिस्थजीवसम्बन्धिनी ज्ञेया । 'न वव्राथेऽपवर्गं मे मोहितौ मम मायया'इत्यत्र, इयं विशेषमायेत्यादिना सुबोधिन्यामतिरिक्तायाः प्रदर्शितत्वात् । वैष्णवीं व्यतनोन्मायामित्यत्र मूले वैष्णवीपदाच्च । अतः सा पशुपुत्रगृहाद्यासक्तिं जनयति । तत्कार्यं व्रजस्थेषु प्रतीयते । अह्न्यापृतं निशि शयानमतिश्रमेणेति वाक्यात् । क्वचिद् भगवद्विस्मृतिं जनयति । 'नैवाऽशृणोद्वै रुदितं सुतस्य सेति' वाक्यात् । अतृप्तमुत्सृज्य जवेन सा ययाविति वाक्याच्च । क्वचिन्मायिकधर्माणां भगवति प्रतीतिः, 'मेहनादीनि वास्ताविन्यत्र निरूपिता । यत् सम्परेतः पुनरेव बालक इत्यादिवाक्यान्यपि अज्ञानमूलानि विशेषमायाकार्यभूतेन तामसत्वेन । अत एतस्य दोषरूपत्वम् । इदं मायाकार्यरूपं तामसत्वं भगवान् क्रमेण लीलाभिर्नाशयति । अग्रे निवर्तनीयस्यापि पूर्वं स्थापनं त्वत्यन्तविरुद्धसाधनवत्स्वपि ब्रह्मादिदुरापफलदानेन पुष्टिमार्गीयभगवन्महिमख्यापनार्थमिति ज्ञेयम् । तामसप्रकरणीयलीलासमाप्तौ इदं मायाकार्यं तामसत्वे विवृतम् । एवं तामसानां निरोधे जातेऽग्रिमकार्यार्थचिकीर्षितलीलाप्रतिबन्धकीभूतस्य आद्यतामसत्वस्य वियोगासहिष्णुत्वलोकवेदोल्लङ्घनशीलत्वादिरूपस्य निवारणम् । अत एव 'निवारयामः समुपेत्य माधवं किं नोऽकरिष्यन् कुलवृद्धबान्धवा' इत्युक्त्वापि न कृतवत्यः । तामसभावस्य परिहृतत्वात् । ततो राजसभावः । स च, 'विकुर्वन् क्रियया चाधिरनिवृत्तिश्च चेतसः । गात्रास्वाथ्यं मनोभ्रान्तं रज एतैर्निशामय'इति वाक्यान्मनोविक्षेपकर्ता । अत एव, 'भवतीनां वियोगो मे न हि सर्वात्मना क्वचित् । आत्मत्वाद् भक्तवश्यत्वात् सत्यवाक्त्वात् स्वभावत'इत्यादिसन्देशोपदिष्टात्मज्ञानम् एतासां जातम् । तेन, नास्माकं भगवद्वियोग इति बुद्धम् । 'ततस्ताः कृष्णसन्देशैर्व्यपेतविरहज्वराः । उद्धवं पूजयाञ्चक्रुर्ज्ञात्वात्मानमधोक्षजमिति'वाक्यात् । एवमात्मत्वेन ज्ञानानन्तरमपि, इत्थंवमादि गोपीनां कृष्णावेशात्मविक्लवमितिवाक्यादुपदिष्टज्ञानं तिरोभवति । रजोगुणेन विक्षेपकरणात् । तथा सति भगवद्विरहोऽस्तीति ज्ञानात् पुनः खेद एव । यावद्राजसभावस्तावदुपदिष्टस्फूर्तौ विरहाभावज्ञानात् सुखम् । उपदिष्टविस्मृतौ विरहज्ञानाद् दुःखमित्युभयं वर्त्तत इति ज्ञेयम् ।

ततो राजसभावस्याऽपि निवृत्तौ सत्त्वमुर्वरितम् । तदा सात्त्विका उच्यन्ते। तत्र हि, सत्त्वात् सञ्जायते ज्ञानमितिवाक्याद् उद्धवद्वारोपदिष्टं ज्ञानं स्थिरमभूत्। अत एव कुरुक्षेत्रप्रसङ्गे, गेहञ्जुषामपि मनस्युदियात् सदा न इत्येव प्रार्थितम् । अन्यथा पुरःस्थिते भगवति व्रजे भगवदागमनं प्रार्थयेयुः। अतो भगवच्छास्त्रप्रकारेण भगवन्मेलनं समीचीनं सार्वदिकं चेति ताभिर्बुद्धमित्यध्यवसीयते। ततः सत्त्वनिवृत्तौ निर्गुणावस्था। ततो भगवद्रूपतायां नित्यलीलाप्रवेशो मुक्तिः । मुक्तिर्हित्वाऽन्यथारूपं स्वरूपेण व्यवस्थितिरिति। ततो रमणादिकमपि सर्वं पुरुषोत्तमात्मकमिति आश्रयप्राप्तिरिति भगवदीयैर्विभावनीयम्।

अथाधुनिकानां पुष्टिमार्गीयाणां फलं लिख्यते॥ तत्र श्रीमद्भागवते द्विधा बोधोऽस्तीति ज्ञेयम् । तत्रैको वाचनिको द्वितीय आर्थिक आध्यात्मिकशब्दवाच्यः । तत्र वाचनिको हि शाब्दबोधमर्यादया जायते। द्वितीयस्तु लीलातात्पर्यादिज्ञानानन्तरं ज्ञानविशेषाज्जन्यते। तत्राद्यो यथा। अहं भक्तपराधीन इति नवमस्कन्धे भगद्वाक्यश्रवणाद् भगवान् भक्ताधीन इत्यवगत्यात्मकः। द्वितीयस्तु, गोपीभिः स्तोभितोऽनृत्यद्भगवानितिवाक्यात् तादृशलीलायास्तात्पर्यज्ञानानन्तरं पुष्टिभक्तिपरवशत्वं भगवतो निर्द्धार्यते। तत्र ज्ञेयः। यथावा। योषित्सङ्गाद्यथा पुंस इति वाचनिकः। वाचं दुहितरं तन्वीं स्वयम्भूर्हरतीं मन इत्यत्रार्थिकः। एवं सर्वत्रोह्यम् । सोऽयं सुबोधिनीनिबन्धादावाध्यात्मिकः पक्षस्तत्तल्लीलाप्रसङ्गे साधितोऽस्ति। एवं सति आधुनिकपुष्टिस्थानां कथं प्राप्तिरिति जिज्ञासायाम्, 'एवं धर्मैर्मनुष्याणामुद्धवात्मनिवेदिनाम्' इत्यादिभिः प्रकारलाभेऽपि, 'मां च योऽव्यभिचारेण भक्तियोगेन सेवते। स गुणान् समतीत्यैतान् ब्रह्मभूयाय कल्पत' इत्यादिवाक्यैर्नैर्गुण्यावस्थानन्तरं फलप्राप्तिरित्याद्याकारकसिद्धान्तसिद्धावपि नैर्गुण्यानन्तरं फलमित्यार्थिकोऽपि सिद्धान्तः सम्पद्यते।

सोऽयं भागवतमूलकयोः सुबोधिनीनिबन्धयोर्वर्त्तत इति। ततो बोधसौकर्यायोद्धृत्य लिख्यते। तत्र येषु जीवेषु भगवता पारमार्थिकफलविशेषसाधनार्थमलौकिकानुग्रहविशेषेण पुष्टिभक्तिबीजरूपा स्थापितास्ति ते पुष्टिमार्गीयाः। तेषां साधनैः फलं भविष्यतीति

प्रकारो निर्द्धार्यते । तत्र, त्रैगुण्यं सर्वं एव हीति भगवद्वाक्यात् ते मायाकार्यतामसादिगुणैर्व्याप्ताः सन्ति । यद्यपि सर्वेषु त्रयो गुणाः सन्ति, तथाऽपि, प्राधान्येन व्यपदेशा भवन्तीति न्यायेन यस्मिन् यस्य गुणस्याऽऽधिक्यं स तेन गुणेन व्यपदिश्यते । तत्र सात्त्विकानां सेवाश्रवणादिसाधनैः शीघ्रं प्रेमोत्पत्तिः। अत एवोक्तं निबन्धे । सात्त्विका भगवद्भक्ता ये मुक्तावधिकारिण इति, निबन्धीयसेवाप्रकरणे, सात्त्विकानुपदिशतीति च। अतस्ते प्रथमाधिकारिणः। शिष्टौ मध्यमहीनौ । अत एव भक्तिस्कन्धीयभक्तेषु हीनमध्यमोत्तमाः सर्वेऽपि कथिताः । 'पुंसामीशकथाः प्रोक्ता हरेश्चास्यानुवर्त्तिनाम्' इत्यनेन सामान्यतः सर्वेषां भक्तत्वं सूचितम् । अधुना तु कलिकालदोषान्मोहलोभादियुतास्तामसा राजसा बहवः सन्ति । ते हि पूर्वस्थापितस्य पुष्टिभक्तिबीजस्य अनश्वरत्वेन सत्त्वाद् भगवत्परिचर्याश्रवणादि कुर्वाणा अपि दोषप्राबल्यान्न प्रेमलक्षणां भक्तिं लभन्ते । प्रतिबन्धकाभावस्य सर्वत्र कारणत्वात् । तेषाम्, आदरः परिचर्यायामित्यादिभगवदुक्तसेवाश्रवणादिसाधनैर्बीजदार्ढ्ये सति सेवयैव क्रमेण तमोरजःसत्त्वानि निवर्त्तन्ते । मां च योऽव्यभिचारेण भक्तियोगेन सेवते इत्यादिवाक्यात् । तदेतद् गोकुलस्थानां प्रसङ्गे सूचितं च । यतस्तेषां पूर्वं तमो निवृत्तम् । पश्चाद्रजःसत्त्वे । तदुक्तं निबन्धे । 'इतोऽपि चेद्धरिर्गच्छेन्नीत्वा सर्वस्य तामसम् । राजसास्ते भविष्यन्ति गोकुलस्था न संशयः । उभये च ततस्त्वग्रे सात्त्विकास्त्वगुणास्ततः। त्रयोऽपि सम्भविष्यन्ति मुक्तौ तेषां निरूपणम्' इति। इतोऽपि चेदित्यादि। ननु तामसप्रकरणीयलीलासमाप्तिपर्यन्तं गोकुलस्थानां तामसत्वं स्थितमेव पश्चाद्भगवन्मथुरागमनानन्तरं लीलानां बाह्यतस्तिरोभावाच्छास्त्रीयसाधनानां च गोकुलस्थेऽभावात् कथं तामसभावनिवृत्तिरित्याशङ्क्य तन्निवृत्तिप्रकारमाहुः । इतोऽपि चेदित्यादिना । अयमर्थः। यद्यपीह भक्तिशास्त्रीयमर्यादाविचारे तामसत्वनिवृत्तौ न किञ्चित् कारणम् । कारणाभावेऽपि यदि कार्योत्पत्तिस्तदा सर्वमर्यादोच्छेदः स्यात् । तथापि हरिश्चेत्तामसत्वं स्वयं गृहीत्वा गच्छेत् तदा शास्त्रीयमर्यादाया दुर्बलत्वात् तामसत्वं गच्छत्येव । अतः प्रमेयबलस्यैव मुख्यत्वं, न प्रमाणबलस्येति । प्रमेयबलेन राजसास्ते भविष्यन्ति । अस्मिन्नर्थे संशयो नास्ति । अतो न

कश्चिद्विरोधः । न वा मर्यादाभङ्गः । प्रमाणबलविचारे तथात्वेऽपि प्रमेयबलविचारेण समाधानादिति कारिकार्थः फलितः। यद्यपि लीलासृष्टिस्थभक्तास्तु, 'यो नन्दः परमानन्दो यशोदा मुक्तिरूपिणी । गोप्यो गाव ऋचस्तस्य'इत्यादिभिः कृष्णोपनिषत्स्वतिश्लाघितस्वरूपाः प्रापञ्चिकविलक्षणास्तथाऽप्यंशविशेषे दृष्टान्तीकरणान्न दोषः । नच पुष्टिभक्तेर्निर्गुणत्वात्तद्वतो राजसत्वं तामसत्वं च न सम्भवतीति वाच्यम् । वृत्रे तामसत्वदर्शनात् । रजस्तमःस्वभावस्य ब्रह्मन् वृत्रस्य पाप्मन इति वाक्यात् । अजातपक्षा इव मातरं खगा इत्यादिवाक्यैर्वृत्रस्य पुष्टिभक्तत्वनिर्द्धारात् । अतो भक्तेर्निर्गुणत्वेऽपि भक्तानां सगुणत्वमस्त्येव । अभिसन्धाय यद्धिंसामित्यादिवाक्यैस्तादृक्कामजन्याया एव भक्तेः सगुणत्वं, न त्वस्याः । अत इयं भक्तिर्निर्गुणैव । भक्तानां तु त्रैविध्यं वर्तत एव ।

अत आधुनिकानां पुष्टिभक्तानां साधनसापेक्षत्वादादित आरभ्य सेवाश्रवणादिप्रकारस्तामसादिगुणनिवृत्तिप्रकार आध्यात्मिकरीत्या निरूप्यते । तथाहि । यथा लीलासृष्टौ तामसप्रकरणारम्भे प्रथमाध्याये भगवदाविर्भावोत्सवस्तथेहापि साधकस्य श्रीमूर्तेराविर्भावोत्सवः । अत एव निबन्धे सेवाप्रकरणे, एनमुद्धरिष्यामीति तदा मृदादेः प्रादुर्भूत इत्युक्तम् । मूर्त्तिरूपेण प्रभोराविर्भाव एवाङ्गीकृतः । तथा यत्र । यथा, नेह स्थेयं बहुतिथं सन्त्युत्पाताश्च गोकुल इत्यनेन प्रादुर्भूतभगवत्सुखानुभवप्रतिबन्धकज्ञाने वसुदेवस्य कारणता एवमत्रापि गुरोः सकाशाद्भक्तिमार्गप्रतिबन्धकज्ञानम् । ततः पूतनामरणं सा चाऽविद्यारूपा । अविद्या पूतना नष्टा इति वाक्यात् । नच पूतनाबकादीनामविद्यादम्भादिरूपत्वे मानाभाव इति वाच्यम् । लोभक्रोधादयो दैत्या इति कृष्णोपनिषत्सु सर्वेषां दैत्यानां परिदृश्यमानस्वरूपातिरिक्तलोभादिरूपत्वेन प्रतिपादनात् । लोभक्रोधादयो दैत्या इत्यत्रादिशब्देन सर्वेषां संग्रहात् । एतदुपनिषन्मूलिकैव धेनुकादौ देहाध्यासत्वाद्युक्तिः सुबोधिन्यामिति ज्ञेयम् । एवं सति तत्र अविद्यारूपा पूतना नाशिता तथेहापि भगवद्बहिर्मुखत्वसम्पादिका अविद्या सेव्यमानेन प्रभुणा नाश्यते । सकृदिष्टाऽऽदिपुरुषमिति वाक्यात् । तत्र यथा वसुदेवमुखादुत्पातश्रवणे, तन्निवृत्त्यर्थं श्रीनन्देन, हरिं जगाम शरणमिति वाक्याच्छरणागमने

क्षतं तथेह साधकेन गुरुद्वारा भक्तिमार्गप्रतिबन्धकानि श्रुत्वा तन्निवृत्तये हरिशरणागमनं कार्यम् । तदुक्तं निबन्धे ।

आद्ये तु भगवन्मार्गे बाधकानि बहूनि हि ।
द्वितीये तदभावो हि हरिणैव भवेदिति ।

तत्र यथा पूर्वं सञ्चितस्वासक्तिविषयीभूतभगवदनुपयुक्तगृहरूपशकटस्य भक्तिरूपचरणेनोत्क्षेपणमेवं साधकस्यापि भगवदनुपयुक्तवस्तुसम्बन्धो निवर्तते । तृणावर्तो भगवत्साक्षात्कारप्रतिबन्धरूपो रजोगुणात्मा हतः । एवमस्यापि भजनप्रतिबन्धरूपो रजोगुणो नश्यति । ततो यथा श्रीयशोदाया विश्वरूपदर्शनेन महिमज्ञापनं, तथेहापि साधकस्य सेव्यस्वरूपे स्वप्नादिद्वारा कश्चिदनुभावो ज्ञाप्यते । ततो गर्गेण एकान्ते भगवन्नामान्युक्तानि । तत्र रूपगुणलीलावैशिष्ट्यं निरूपितम् । 'बहूनि सन्ति नामानि रूपाणि च सुतस्य ते । गुणकर्मानुरूपाणि तान्यहं वेद नो जना' इत्यनेन सन्तीति प्रयोगेण तेषां नामरूपगुणकर्मणां नित्यत्वं बोधितम् ।

तथाच सिद्धमेतत् । साधकेन भगवदीयमुखाद् गुणलीलाविशिष्टानां नाम्नां दुःसङ्गवर्जनपूर्वकं स्वरूपं श्रुत्वा तत्तल्लीलासंयुतस्वरूपगुणस्मरणपूर्वकं तन्नाम ग्राह्यम् । यथा गोवर्द्धनोद्धरणधीर इति नामग्रहणे गोवर्द्धनोद्धरणात्मकलीलाविशिष्टं वामकरकमलधृतगोवर्द्धनं श्रीकृष्णस्वरूपं हृद्यानेयमिति । एतच्च नामकरणप्रसङ्गसुबोधिन्यां विस्तृतं श्रीमदाचार्यचरणैः ।

ततो जानुरिङ्गणलीलायां, द्वे जानुनी सुतलं विश्वमूर्त्तेरिति वाक्याज्जानुनोः सुतलाधिदैविकत्वात् । तत्र च दैत्यानां निवासाज्जानुभ्यां गमनेन गुप्ततयैवालौकिकप्रकारेण दैत्यमर्दनमाचरितम् । तथेहापि सेव्यमानो भगवान् अनेकधा स्थितान् अज्ञातानपि बहूनासुरभावान् दूरीकरोति । चौर्यादिप्रसङ्गे व्रजसुन्दरीभिर्भगवतो दोषेषु निवेदितेषु महिमज्ञानाभावेऽपि केवलस्नेहान्न मातृचरणैर्दोषा गृहीताः । न ह्युपालब्धुमैच्छादिति वाक्यात् । एवमेव भगवदीयो ज्ञानरहितोऽपि भजनस्वभावान्न भगवति दोषं गृह्णाति । ततो मृद्भक्षणप्रसङ्गे, नाहं भक्षितवानम्बेत्यादिना सर्वसाधारणरीत्या प्रतीतोऽशनरूपो धर्मो मयि नास्ति । क्षुत् खलु वै मनुष्यस्य भ्रातृव्य इति श्रुतेर्भक्षणकारणीभूतक्षुधो मनुष्याऽसाधारणधर्मत्वेन

मय्यभावादित्युक्तं हरिणा । तथाच क्षुधितः सन्नाश्नाति, भक्तिपूर्वकं भक्तेन दत्तमश्नात्येव । 'पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति। तदहं भक्त्युपहृतमश्नामि प्रयतात्मन'इति वाक्यात् । अशनं चात्र भोगो, न तु भक्षणमात्रम् । पुष्पादीनां संग्रहात् । तथाच सर्वमेव वासोभूषणस्रगादि भक्त्यादत्तं स्वीकरोति । अत इमं प्रकारं बुद्ध्वा नैवेद्यादि भक्त्यैव समर्पणीयमिति लभ्यते स्म । एतत्तु मृद्भक्षणप्रसङ्गटिप्पण्यां स्फुटम् । श्रीमातृचरणानां साधारणरीत्याऽशनधर्मे प्रतीते मुखं व्यादाय विश्वरूपं प्रदर्श्य सर्वसाधारणनिखिलधर्माऽभावो बोधितः । अग्रे तु, यन्माययेत्थं कुमतिः स मे गतिरिति वाक्यात् स्नेहस्य सर्वथा तिरोधाने, वैष्णवीं व्यवतनोन्मायामिति वाक्याल्लीलास्थजीवनियामिकया वैष्णव्या मायया मोहयित्वा स्नेहं वर्द्धितवान् । एवमस्यापि सेव्यस्वरूपे लौकिकभावस्फूर्त्तौ तन्निराकृतये भागवताद्यर्थविशेषस्फुरणेन महिमानं बोधयति । तत्राप्यत्यन्तमहिमस्फूर्त्तौ स्नेहोपचारशैथिल्ये स्नेहिभक्तसङ्गादिना स्नेहोपचारश्रद्धां द्रढयति भगवान् । ततो, द्रोणो वसूनां प्रवर इत्यादिप्रश्नोत्तराभ्यां श्रीनन्दयशोदयोर्भक्तौ महापुरुषकृपैव कारणमिति सिद्धान्तितम् । एवमिहापि श्रीमदाचार्यचरणश्रीविठ्ठलेश्वरकृपातो भक्तिर्भवतीति ज्ञेयम् । ततो मातृचरणानां दधिमन्थनावसरे. भगवद्गुणगानं, दधिनिर्मन्थने काले स्मरन्ती तान्यगायतेति वाक्यात् । एवं साधकेनापि गुणगानादि कुर्वतैव व्यावृत्तिः कार्या । ततो दधिमण्डभाजनभेदः । शिक्यस्थनवनीतस्य मर्कटेभ्यो दानम् । तदुभाभ्यामिदं सिद्ध्यति । भगवदावेशाभावदशायां भगवदितरभोगोपयोगबुद्ध्या सम्पादितान् पदार्थान्नाङ्गीकरोति भगवान् । एवं सति समर्पणीयस्य वस्तुनः संपादनदशामारभ्य भगवदुपयोगसमयावधि चित्तस्य कृष्णैकपरतैव रक्षणीयेति बोद्धव्यं साधकेन । ततः श्रीयशोदा दाम्ना बद्धुं प्रवृत्ता । तथा न बद्धः । यदा खेदं दृष्टवान् भगवाँस्तदा कृपया भक्तवश्यतां सूचयन् बद्धोऽभूत् । तथा साधकोऽप्यनेकसंभृतसपर्यया न पुरुषोत्तमं वशीकर्त्तुं शक्नोत्यपि तु भक्त्यैव । ततो यमलार्जुनप्रसङ्गे भगवदीयनारदसमागमेन श्रीमदरूपमहादोषजन्यस्त्रीसङ्गादिनिवृत्तौ व्रजे वृक्षदेहं प्राप्य स्थितौ नलकूबरमणिग्रीवौ

हरिर्मोचितवान् । तत्रापि, तत्तथा साधयिष्यामि यद्गीतं तन्महाऽऽत्मनेति भक्तानुगृहीतौ मोचयिष्यामीत्युक्तवान् प्रभुः । अतो भक्तानां सङ्गमः सकलपुमर्थसाधक इति सिद्धम् । ततो गोपीभिः स्तोभितोऽनृत्यदित्यत्र भक्तिवश्यत्वं स्फुटमेव । ततो वृन्दावनक्रीडा । तत्र, चारयामासतुर्वत्सान्नानाक्रीडापरिच्छदाविति वाक्याद्, भ्रमरचक्रसूक्ष्मदण्डकाष्ठखण्डकृत्रिमरथवादित्राकर्षणादीनि क्रीडापरिच्छदानि गृहीत्वा क्रीडति हरिः । एवं सति सेवायामपि तानि स्थापनीयानि । 'एवं तौ लोकसिद्धाभिः क्रीडाभिश्चेरतुर्वने' इति पञ्चदशाध्याये वक्ष्यमाणत्वाच्च । यद्यदिष्टतमं लोके यच्चातिप्रियमात्मनः । तत्तन्निवेदयेन्मह्यं तदानन्त्याय कल्पत' इति भगवद्वाक्याच्च । विस्तृतं चैतत् सेवाकौमुद्याम् । ततो वत्सासुरवधः । स हि वत्सचारणसामग्रीरूपाणां वत्सानां दोषरूपः । तस्य निवारणेन वत्सा निर्दोषाः कृताः । एवमिहापि सेवोपयोगिसामग्री प्रभुणा शोध्यते । तत्र यथा वयस्यानां भक्तानां दोषरूपो लोभानृतसहितदम्भात्मको नाशितस्तथेहापि लोभाऽनृतसहितो दम्भादिदोषः सेवया नश्यति । तत्र यथा 'इति नन्दादयो गोपा' इति वाक्याद् गुणगानं प्रेम च सूचितं, तथात्र भगवदीयादिरूपगुणगानम् । एवं प्रमाणप्रकरणसमाप्तौ यथा तेषां प्रेमपूर्णत्वं सिद्धं तथात्र साधकस्य एतावत्साधनसम्पत्तौ प्रेम पूर्णमुत्पद्यते । तत्र यथा देहाध्यासरूपो धेनुको नाशितस्तथात्र सेवाकर्तुर्देहस्य स्वकीयत्वाध्यासो गच्छति । यथा कालीयशिरांसि विषयसंसृष्टेन्द्रियरूपाणि चरणारविन्देन भक्तिरूपेण विमर्द्य शोधितानि । 'अनुग्रहोऽयं भवता कृतो हि न' इति वाक्यात् । तथेहापि विषयोन्मुखानीन्द्रियाणि भजनेन संशोध्य भगवत्पराणि क्रियन्ते । यथा इन्द्रियदोषाभिमानिनो दावाग्नेः सकाशात् सर्वेषां रक्षा, तथेहापीन्द्रियदोषनियामकादासुरभावाद् भक्तस्य रक्षा । यथा अन्तःकरणदोषात्मप्रलम्बो हत एवमिहापि सेवां कुर्वतोऽन्तःकरणदोषा निवर्त्तन्ते । यथा अज्ञानात्मा आत्मदोषो द्वितीयो दावाग्निस्तन्निवृत्तिः कृता, तद्वदत्रापि स्वरूपाज्ञाननिवृत्तिर्भवति । यथा भक्तानां भावविशेषेण गानम् अष्टादशाध्याये निरूपितं, तथेहापि सेवाया अनवसरे भगवतः कीर्त्तनादिरूपं गानम् । तत इन्द्रयागभङ्गं कृत्वा स्वयागः कारितः । तत्र शक्रकृतोपद्रवे गोवर्द्धनोद्धर-

णेन व्रजो रक्षितस्तथा सति साधकैरन्याश्रयो न कर्त्तव्यः ।

एवं सति केवलभगवदाश्रये यदि कश्चिदुपद्रवो भवेत् तदा भगवान् पालयिष्यतीति विश्वासो रक्षणीयः। एवं भगवदुक्तवर्णाश्रमधर्माचरणेन परोपकारादिधर्माचरणेन च वैष्णवान्नभक्षणेनाऽन्याश्रयत्यागेन भगवान् सेव्यः। ततः कुमारिकाव्रतप्रसङ्गे यज्ञपत्नीव्रतप्रसङ्गे यथाऽऽध्यात्मिकः पक्षः सिद्धः। तदुक्तं निबन्धे। 'कृष्णवाक्यं सदा कार्यं मायामोहं निवार्य हि। वृक्षवत्तु स्थितिः कार्या शुद्धान्नेन च वर्त्तयेद्' इति । अयमर्थः। व्रतप्रसङ्गे अग्निकुमारैर्लज्जां परित्यज्य सर्वं कृतं, तेन भगवत्प्रसादोऽभूत् । अतो भगवद्वाक्यं सर्वथा कर्त्तव्यम् । तदत्र श्रुतिस्मृत्यादिरूपं कर्त्तव्यमिति फलितम् । मायामोहं निवार्य वृक्षवत्तु स्थितिः कार्येति । मायया जातो यो मोहो ममेदमित्यज्ञानात्मकस्तं दूरीकृत्य वृक्षवत् केवलपरोपकारतया स्थेयम् । अहो एषां वरं जन्म इत्यारभ्य, तैश्चैः कामान् वितन्वत' इत्यनेन परोपकृतेः प्रभुणोपदिष्टत्वात् । शुद्धान्नेन च वर्तयेदिति । ' एषा वै ' बाधते क्षुन्न' इति गोपविज्ञापितो, मां ज्ञापयत पत्नीभ्य इत्युक्त्वा यज्ञपत्नीसन्निधौ प्रेषयित्वा ताभिरानीतेनान्नेन गोपानां तृप्तिः सम्पादिता । ता हि भगवदीयाः । ' भगवत्युत्तमश्लोके दीर्घश्रुतधृताशया ' इति वाक्यात् । अत इदमत्र लब्धं, वैष्णवानामेवान्नं ग्राह्यम् । तत उक्तम्, शुद्धान्नेन च वर्तयेदिति। तत 'एवंविधा भगवतो या वृन्दावनचारिणः । वर्णयन्त्यो मिथो गोप्यः क्रीडास्तन्मयतां ययुरिति वाक्यात् । यथा तासामासक्तिरेवं साधकस्याप्येतावत्साधनसम्पत्तावासक्तिः सिद्ध्यति । प्रतिबन्धकपापनाशे भगवत्प्रसादे च क्रियमाणायाः श्रवणादिरूपायाः पोषो बीजभावदार्ढ्यव्यसनभावरूपो भगवति भवति। ततो वृद्धौ क्रमेण गुणानां नाशः। लीलासृष्टिस्थानां यथा, 'दर्शयामास लोकं स्वं गोपानां तमसः परम् । सत्यं ज्ञानमनन्तं यद् ब्रह्म ज्योतिः सनातनमिति' वाक्याद् व्यापिवैकुण्ठात्मकाऽक्षरब्रह्मानुभवस्तथा पूर्वोक्तरीत्या सेवया व्यसनसिद्धौ गुणनाशे ब्रह्मभावः । 'स एव भक्तियोगाख्य आत्यन्तिक उदाहृतः । येनातिव्रज्य त्रिगुणं मद्भावायोपपद्यत' इति वाक्यात् । ततः फलप्रकरणे यथा सर्वात्मभाववतीनां तासां भजनानन्दानुभवस्तथेह साधकस्यापि सर्वात्मभावोत्पत्तौ सदैव पुरुषोत्तमाविर्भावात् सेवायां भजनानन्दानुभवः फ-

लति। ततो, भोगेन त्वितरे क्षपयित्वाऽथ सम्पद्यते इतिसूत्रभाष्योक्त-रीत्या स्थूललिङ्गशरीरयोर्नाशे भगवल्लीलोपयोगिदेहं प्राप्य नित्य-लीलायां प्रविशति । स एव मुक्तिपदार्थः । मुक्तिर्हित्वान्यथारूपं स्वरूपेण व्यवस्थितिरिति लक्षणात्। तत्र च, सोऽश्नुते सर्वान् कामा-न् सह ब्रह्मणा विपश्चितेति श्रुत्युक्तरीत्या पुरुषोत्तमेन सह पुरुषोत्त-मात्मकानां पुरुषोत्तमात्मकभोगाशनमाश्रयप्राप्तिरिति निष्कर्षः ।

निरोधलीलामुक्काथ मुक्तिस्तदनुवर्ण्यते ।

मुक्तानामश्रयः कृष्णो नान्येषामिति शास्त्रत इति सुबोधिन्याः ।

इति श्रीमद्गोवर्द्धनधरश्रीवल्लभाचार्यश्रीविठ्ठलेश्वरचरणानुचर-सेवकेन लालूभट्टोपनामबालकृष्णेन कृते प्रमेय-रत्नार्णवे पुष्टिमार्गीयफलविवेकः समाप्तिमफाणीत् ॥ ७ ॥

१ अस्यां चौखम्बा-संस्कृतग्रन्थमालायां प्रतिमासं पृष्ठशतके सुन्दरैः सीसकाक्षरैरुत्तमेषु पत्त्रेषु एकः स्तबको मुद्रयित्वा प्रकाश्यते।

२ एकस्मिन् स्तबके एक एव ग्रन्थो मुद्र्यते।

३ प्राचीना दुर्लभाश्चाऽमुद्रिता मीमांसावेदान्तादिदर्शन, व्याकरण:, धर्मशास्त्र, साहित्य, पुराणादिग्रन्था एवात्र सुपरिष्कृत्य मुद्र्यन्ते।

४ काशिकराजकीयप्रधानसंस्कृतपाठालयाऽध्यापकाः पण्डिता अन्येच शास्त्रदृष्टयो विद्वांसः एतत्परिशोधनादिकार्यकारिणो भवन्ति।

५ भारतवर्षीयै, ब्रह्मदेशीयैः, सिंहलद्वीपवासिभिश्च एतद्ग्राहकैर्देयं वार्षिकमग्रिमं मूल्यम् मुद्राः ७ आणकाः ८

६ कालान्तरे प्रतिस्तबकं " " १ " ०

७ प्रापणव्ययः पृथग् नास्ति।

८ साम्प्रतं मुद्र्यमाणा ग्रन्थाः- मुद्रिताः स्तबकाः

ग्रन्थः	विषयः	मुद्रिताः स्तबकाः
(१) संस्काररत्नमाला। गोपीनाथभट्टकृता	(संस्कारः)	२
(२) शब्दकौस्तुभः। भट्टोजिदीक्षितकृतः	(व्याकरणम्)	१०
(३) श्लोकवार्तिकम्। भट्टकुमारिलविरचितम् पार्थसारथिमिश्रकृत-न्यायरत्नाकराख्यया व्याख्यया सहितम् सम्पूर्णम्।	(मीमांसा)	१०
(४) भाष्योपबृंहितं तत्त्वत्रयम् विशिष्टाद्वैतदर्शन प्रकरणम् श्रीमल्लोकाचार्य्यप्रणीतम्। श्रीनारायणतीर्थ विरचित भाट्टभाषा प्रकाश सहितम्। स०	(वेदान्तः)	२
(५) करणप्रकाशः। श्रीब्रह्मदेवविरचितः सम्पूर्णः	(ज्योतिषः)	१
(६) भाट्टचिन्तामणिः महामहोपाध्याय-श्रीगागाभट्ट विरचितः। तर्कपादः	(मीमांसा)	२
(७) न्यायरत्नमाला-श्रीपार्थसारथिमिश्र वि० स०	(मीमांसा)	२
(८) ब्रह्मसूत्र भाष्यम-वादरायण प्रणीत वेदान्त सूत्रस्य यतीन्द्र श्रीमद्विज्ञानभिक्षु कृत व्याख्यानम्। सम्पूर्णः।	(वेदान्तः)	६
(९) स्याद्वादमञ्जरी-मल्लिषेणनिर्मिता सम्पूर्णा।	(जैनदर्शनम्)	२
(१०) सिद्धित्रयम्-विशिष्टाद्वैत-ब्रह्मनिरूपणपरम्-श्रीभाष्यकृतां परमगुरुभिः श्री ६ यामुनमुनिभिर्विरचितम्। सम्पूर्णम्	(वेदान्तः)	१
(११) न्यायमकरन्दः। श्रीमदानन्दबोधभट्टारकाचार्यसंगृहीतः आचार्यचित्सुखमुनिविरचितव्याख्योपेतः	(वेदान्तः)	३

पत्रादिप्रेषणस्थानम् } हरिदासगुप्तः,
बनारस सिटी